53. अभिचाराणि सर्वाणि मन्त्रयन्त्राणि भूतले ।
भूचराः खेचराश्चैव कुलजाश्चौपदेशिकाः ॥



भूतले अभिचाराणि मन्त्रयन्त्राणि–on the earth all witch-craft, incantations and amulets भूचराः खेचराः च एव–living beings moving in the earth and in the sky जलजाः- born of water औपदेशिकाः– caused by certain base deities.

54. सहजा कुलजा माला डाकिनी शाकिनी तथा ।
अन्तरिक्षचरा घोरा डाकिन्यश्च महारवाः ॥

सहजा–those deities that accompany a person from his birth onwards कुलजा–hereditary deities अन्तरीक्षचरा-moving in the atmosphere घोरा–horrific महारवाः - big terrible sound.

55· ग्रहभूतपिशाचाश्च यक्षगन्धर्वराक्षसाः ।
ब्रह्मराक्षसवेतालाः कूष्माण्डा भैरवादयः ॥

ग्रहभूतपिशाचाः च–(stars) planets, demons, evil spirits यक्षगन्धर्वराक्षसाः- demi-gods who are described as attendants of Kubera, the god of riches the demi gods who are regarded as the singers or musicians of gods and demons or evil friends ब्रह्मराक्षसवेतालाः- ghosts of Brahmanas and ghosts occupying dead bodies कूष्माण्डाः–a kind of evil spirit भैरवादय –frightful spirits like Bhairava

56· नश्यन्ति दर्शनात्तस्य कवचेनावृतो हि यः ।
मानोन्नतिर्भवेद्राज्ञस्तेजोवृद्धिः परा भवेत् ॥

यः कवचेन आवृतः-one who is protected by this Kavacha तस्य दर्शनात् नश्यन्ति-by the mere sight of this the evil spirits mentioned above are destroyed राज्ञः परा तेजोवृद्धिः मानोन्नतिः भवेत्-he will be held in high esteem by the king which will bring him all prosperity.

By wearing this Kavacha, all types of deeds and hymns used for black magic, those deities wandering in the earth and sky, those born of water certain base deities those deities which accompany a person from his birth onwards hereditary deities, such decties as Māta, Dakini and Shakini, Kooshmanda, horrible deities (spirits) those moving in the atmosphere with terrible sound, planets, demons, evil spirits, demi-gods who are attendants and singers, the ghosts of Brahmins, ghosts occupying dead bodies, certain terrible forms of deities and the like — all these get destroyed at the mere sight of one who is protected by Kavacha. Such a person will be held in high esteem by the King which will bring him all prosperity.

57. यशोवृद्धिर्भवेत् पुंसां कीर्तिवृद्धिश्च जायते ।
तस्मात् जपेत् सदा भक्तः कवचं कामदं मुने ॥

पुंसां यशोवृद्धिः भवेत्-men will win great fame and prosperity कीर्ति वृद्धिः च जायते-and fame will



spread far and wide मुने, तस्मात् भक्तः कामदं कवचं जपेत्-Oh sage, so a devotee should chant this Kavacha which fulfils desires.

You will get greater fame and that fame will spread far and wide. Oh sage, so a devotee should chant this Kavacha which fulfils all desires.

58. जपेत सप्तशतीं चण्डीं कृत्वा तु कवचं पुरा ।
निर्विघ्नेन भवेत् सिद्धिश्चण्डीजपसमुद्भवा ॥

कवचं पुरा कृत्वा तु-in the beginning you read Kavacha सप्तशतीं चण्डीं जपेत्-then chant seven-hundred slokas (verses) Chandi चण्डीजपसमुद्भवा सिद्धि निर्विघ्नेन भवेत्-the fulfilment siddhi which you attain by chanting the Chandi will have no break.

You begin chanting Chandi by reading the Kavacha first. The siddhi which you acquire by chanting the Chandi will be unbroken.

59. यावद्भूमण्डलं धत्ते सशैलवनकाननम् ।
तावत्तिष्ठति मेदिन्यां सन्ततिः पुत्रपौत्रिकी ॥

यावत् सशैलवनकाननम् भूमण्डलं धत्ते-as long as the earth with its mountains and forests exists तावत् पुत्रपौत्रिकी सन्ततिः मेदिन्यां तिष्ठति-till then his progeny of sons and grandsons will exist on this earth.

As long as this earth with its mountains and forests continue to exist, till then his progeny of sons and grand sons will continue on this earth.

60· देहान्ते परमं स्थानं सुरैरपि सुदुर्लभम् ।
प्राप्नोति पुरषो नित्यं महामायाप्रसादत: ॥

महामायाप्रसदत: -by the grace of the divine mother पुरुष: - the devotee सुरैरपि सुदुर्लभम्-unattainable even by the devas परमं-great नित्यं-everlasting स्थानं-state देहान्ते when death occurs प्राप्नोति-gets

A devote (who chants this) when his body falls· attains that everlasting state which is unattainable even by the devas·

61. तत्र गच्छति गत्वासौ पुनश्चागमनं नहि ।
लभते परमं स्थानं शिवेन समतां व्रजेत् ॥

तत्र गच्छति-attaining that state असौ गत्वा-he after going there पुन: च आगमनं नहि-does not come back again लभते- attaining परमं स्थानं-the highest state शिवेन समतां व्रजेत्-gets equality with Siva.

One who attains that supreme state will not come back to this earth. For, when he attains that, he becomes one with Lord Siva·

शुभमस्तु



# अथ प्रथमचरित्रम्

## महाकालीध्यानम्

## MEDITATION OF MAHĀKĀLI

ॐ खड्गं चक्रगदेषुचापपरिधान् शूलं भुशुण्डीं शिर:
शङ्खं सन्दधतीं करैस्त्रिनयनां सर्वांङ्गभूषावृताम् ।
यां हन्तुं मधुकैटभौ जलजभूस्तुष्टाव सुप्ते हरौ
नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकाम् ॥

(अहं) नीलाश्मद्युति आस्यपाददशकां, करै:
खड्गं चक्रादेषुचापपरिधान् शूलं भुशुण्डीं शिर:
सन्दधतीं हरौ सुप्ते मधुकैटभौ हन्तुं
यां जलजभू: तुष्टाव, तां महाकालिकां सेवे

नीलाश्मद्युतिम्-who shines like a blue jewel आस्यपाददशकां-who has ten faces & ten legs [यां-whom] हरौ सुप्ते-when Hari was sleeping (for what?) मधुकैटभौ हन्तुं -to kill the demons Madhu and Kaitabha जलजभू: -Brahma तुष्टाव-praised खड्गं-sword चक्र-disc गदा-mace इषु-arrows चाप-bow परिघ-club शूल-spear भुशुण्डी-missile शिर:-human head शङ्ख-conch करै: -with hands सन्दधतीं-holding त्रिनयनां-with three eyes सर्वाङ्गभूषावृताम्-all her limbs adorned (decorated with ornaments) महाकालिकां-mahakali सेवे-serve with devotion.

(I) serve (with devotion) that Mahakali who shines like a blue jewel who has ten faces and ten legs who wields in her hands sword, disc, mace, arrows bow, club, spear, missile, human head and conch, who has three eyes, who is adorned with ornaments on all body parts, and whom Brahman praised to kill (the demons) Madhu and Kaitabha.

ॐ नमश्चण्डिकायै

ॐ ऐं मार्कण्डेय उवाच 1

2. सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः ।
निशामय तदुत्पत्ति विस्तराद्गदतो मम ॥

मार्कण्डेयः उवाच—

यः सूर्यतनयः सावर्णिः अष्टमः मनुः कथ्यते तदुप्तत्ति मम विस्तरात् गदतः निशामय ॥

मार्कण्डेयः -Markandaya उवाच-said सावर्णिः - Sawarni सूर्यतनयः-son of Surya यः who अष्टमः - eighth मनुः - Manu कथ्यते-is called मम-by me (mine) विस्तरात्- in detail गदतः -describing तदुत्पत्ति- his birth निशामय-listen.

I am going to describe in detail the birth of Sawarni, Son of surya who became the eighth Manu. Please listen.



3. महामायानुभावेन यथा मन्वन्तराधिपः ।
स बभूव महाभागः सावर्णिस्तनयो रवेः ॥

रवेः तनयः महाभागः स सावर्णिः महामायानुभावेन यथा मन्वन्तराधिपः बभूव ॥

रवेः तनयः-the son of surya महाभागः -great & illustrious सः सावर्णिः-that Savarni महामायानुभावेन- by the grace of Mahamaya यथा (how)- (इव) like मन्वन्तराधिपः-Lord of Manwanthara बभूव-became.

(Listen) while I describe how that great son of Savarni became the Lord of the eighth Manvantara.

4. स्वारोचिषेऽन्तरे पूर्वं चैत्रवंशसमुद्भवः ।
सुरथो नाम राजाभूत्समस्ते क्षितिमण्डले ॥

पूर्वं स्वारोचिषे अन्तरे चैत्रवंशसमुद्भवः सुरथः नाम राजा समस्ते क्षितिमण्डले राजा अभूत् ॥

पूर्वं-in old times स्वारोचिषे, अन्तरे-during the Manwantara of Swaro-chisha चैत्रवंशसमुद्भवः- born in the dynasty of Chaitra सुरथो नाम राजा- A king named Suratha समस्ते-in all क्षितिमण्डले- in the whole world राजा अभूत्--became the king.

Once upon a time, during the period of Swarochishes (Manwantara) a king by name Suratha, born in the Chaitra dynasty, became the king of the whole world.

5· तस्य पालयतः सम्यक् प्रजाः पुत्रानिवौरसान् ।
बभूवुः शत्रवो भूपाः कोलाविध्वंसिनस्तदा ॥

प्रजाः औरसान् पुत्रान् इव सम्यक् पालयतः तस्य तदा कोलाविध्वंसिनः भूपाः शत्रवो बभूवुः ॥

प्रजाः -the people औरसान्-own पुत्रान्-children इव-like सम्यक्-in the best way पालयतः-protecting तस्य-his तदा-then कोलाविध्वंसिनः-who destroyed the Kolas भूपाः-kings शत्रवः-enemies बभूवुः-became.

While he looked after his subjects with great care as his own children, the kings who destroyed the Kolas, became his enemies·

6· तस्य तैरभवद्युद्धमतिप्रबलदण्डिनः ।
न्यूनैरपि स तैर्युद्धे कोलाविध्वंसिभिर्जितः ॥

अतिप्रबलदण्डिनः तस्य तैः युद्धं अभवत् । न्यूनैरपि तैः कोलाविध्वंसिभिः सः युद्धे जितः ॥

अतिप्रबलदण्डिनः -possessed of very powerful weapons तस्य-his तैः-with them युद्धः-battle अभवत्-took place न्यूनैरपि-though few in number तैः-by them कोलाविध्वंसिभिः-destroyers of Kolas सः युद्धे जितः -he was defeated in battle.

Though, he was well equipped with very powerful weapons, a battle took place between



them· In the battle, though they were small in number, he was defeated by the destroyers of Kolas

7. ततः स्वपुरमायातो निजदेशाधिपोऽभवत् ।
आक्रान्तः स महाभागस्तैस्तदा प्रबलारिभिः ॥

ततः स्वपुरमायातः सः निजदेशाधिपः अभवत् । तदा सः महाभागः तैः प्रबलारिभिः आक्रान्तः ॥

ततः-afterwards स्वपुरमायातः-he returned to his own city निजदेशाधिपः -king of his own country अभवत्-became.

Afterwards he returned to his own country and became the king of his own country· Then that great king was attacked by those powerful enemies.

8· अमात्यैर्बलिभिर्दुष्टैर्दुर्बलस्य दुरात्मभिः ।
कोशो बलं चापहृतं तत्रापि स्वपुरे ततः ॥

ततः तत्र स्वपुरे अपि दुर्बलस्य तस्य दुष्टैः, बलिभिः दुरात्मभिः, अमात्यैः कोशः बलं च अपहृतम् ।

ततः-then तत्र-there स्वपुरे अपि-even in his own city दुर्बलस्य तस्य-who had no strength दुष्टैः-wicked बलिभिः-strong दुरात्मभिः -evil minded अमात्यैः-by ministers कोश -treasury (wealth) बलं च-army अपहृतम्-was looted

There in his city, because he had now no strength of his own, he was robbed of his wealth and army by his own evil minded, wicked and strong ministers.

9. ततो मृगयाव्याजेन हृतस्वाम्यः स भूपतिः ।
एकाकी हयमारुह्य जगाम गहनं वनम् ॥

ततः हृतस्वाम्यः सः भूपतिः मृगयाव्याजेन एकाकी हयं आरुह्य गहनं वनं जगाम ।

ततः –thereafter हृतस्वाम्यः –robbed of sovereignty सः भूपतिः –that king मृगयाव्याजेन–under the pretext of hunting एकाकी–alone हयम्–on the horse आरुह्य-mounting गहनं-dense वनम्-forest जगाम–went.

Thereafter, that king, now robbed of his own king ship, mounted on a horse and left on for the dense forest alone under the pretext of hunting.

10· स तत्राश्रममद्राक्षीद्द्विजवर्यस्य मेधसः ।
प्रशान्तःश्वापदाकीर्णं मुनिशिष्योपशोभितम् ॥

तत्र सः द्विजवर्यस्य मेधसः प्रशान्तश्वापदाकीर्णं मुनिशिष्योपशोभितं आश्रमं अद्राक्षीत् ।

तत्र – there – सः –he द्विज वर्यस्य- best of Brahmins मेधसः -of the sage Sumedhas मुनिशिष्योप-



शोभितं-graced by the disciples of the sage, प्रशान्तश्वापदाकीर्णं-inhabited by wild animals which were calm and peaceful आश्रमम्-hermitage अद्राक्षीत्-saw.

He, (by now being quiet) saw there the hermitage of the great sage Sumedhas which was graced by his own disciples and where wild animals lived peacefully.

11. तस्थौ कञ्चित्स कालं च मुनिना तेन सत्कृतः ।
इतश्चेतश्च विचरंस्तस्मिन् मुनिवराश्रमे ॥

सः तेन मुनिना सत्कृतः तस्मिन् मुनिवराश्रमे इतः च इतः च विचरन् कञ्चित् कालं तस्थौ ।

सः -he (thinking) तेन मुनिना–by that sage सत्कृतः –entertained तस्मिन् मुनिवराश्रमे–in that hermitage इतः च इतः -here and there विचरन्–wandering कञ्चित् कालं तस्थौ–lived for sometime.

There in that hermitage, he lived for some time, entertained by the sage, spending his time, wandering here and there.

12. सोऽचिन्तयत्तदा तत्र ममत्वाकृष्टमानसः ॥

तदा सः ममत्वाकृष्टमानसः अचिन्तयत् ।

तदा–then तत्र–there ममत्वाकृष्टमानसः–over come with attachment सः-he अचिन्तयत्-thought.

Being over come with attachment for his own kith and kin, he began to think.

13· मत्पूर्वैः पालितं पूर्वं मया हीनं परं हि तत् ।
मद्भृत्यैस्तैरसद्वृत्तैर्धर्मतः पाल्यते न वा ॥

पूर्वं मत्पूर्वैः पालितं मया हीनं तत् हि, पुरं असद्वृत्तैः मद्भृत्यैः तैः धर्मतः पाल्यते न वा ।

पूर्वं–in olden days मत्पूर्वैः–my ancestors पालितं–protected मया–me, हीनं–without तत् हि पुरम्–that same city असद्वृत्तैः–people of evil conduct मद्भृत्यैः तैः–my servants धर्मतः in righteous manner पाल्यते–is being protected नवा–or not.

In olden days my ancestors looked after this my city with great care. Now in my absence, I wonder whether my servants who are of evil behaviour, will look after the same righteously·

14 न जाने स प्रधानो मे शूरो हस्ती सदामदः ।
मम वैरिवशं यातः कान् भोगानुपलप्स्यते ॥

शूरः प्रधानः सदामदः सः मे हस्ती मम वैरिवशं यातः कान् भोगान् उपलप्स्यते इति न जाने ।

शूरः–heroic प्रधानः–chief सदामदः–always elated सः मे हस्ती–my elephant मम–my यातः–gone वैरिवशं–under the control of enemies कान्–what भोगान्–



enjoyments उपलप्स्यते–will get इति न जाने–do not know.

My chief elephant, who was very brave and always elated and now under the custody of enemies I wonder what enjoyments he will get·

15· ये ममानुगता नित्यं प्रसादधनभोजनैः ।
अनुवृत्तिं ध्रुवं तेऽद्य कुर्वन्त्यन्यमहीभृताम् ॥

प्रसादधनभोजनैः नित्यं मम अनुगताः ये ते अद्य अन्यमहीभृतां अनुवृत्तिं ध्रुवं कुर्वन्ति ।

प्रसादधनभोजनैः–those favours, riches and food नित्यं मम अनुगताः ये–who followed me always ते–they अद्य–now अन्यमहीभृताम्–of other kings अनुवृत्ति obeisance ध्रुवं–certainly कुर्वन्ति–do.

Those who followed me always and received favours, riches and food from me must be certainly doing obeisance to other kings now·

16. असम्यग्व्ययशीलैस्तैः कुर्वद्भिः सततं व्ययम् ।
सञ्चितः सोऽतिदुःखेन क्षयं कोशो गमिष्यति ॥

अतिदुःखेन सञ्चितः सः कोशः असम्यग्व्ययशीलैः सततं व्ययं कुर्वद्भिः तैः क्षयं गमिष्यति ।

अतिदुःखेन–with great care सञ्चितः–gathered सः कोशः–that treasure असम्यग्व्ययशीलैः–spendthrifts

तै:-by them सततं-always व्ययं कुर्वद्भि:-spending क्षयं गमिष्यति-will be destroyed and squandered.

The wealth, which I had gathered with great difficulty, will be squandered in no time by these spendthrifts, who spend lavishly in improper ways.

17. एतच्चान्यच्च सततं चिन्तयामास पार्थिव: ।
तत्र विप्राश्रमाभ्याशे वैश्यमेकं ददर्श स: ।।

पार्थिव: सततं एतत् च अन्यत् च चिन्तयामास । स: तत्र विप्राश्रमाभ्याशे एकं वैश्यं ददर्श ।

पार्थिव:-the king सततं-always एतत् च-this अन्यत् च-other things चिन्तयामास-thought स: तत्र-he there विप्राश्रमाभ्याशे-near the sage's hermitage एकं वैश्यं-one merchant ददर्श saw.

The king constantly thought of these and other things. He saw there, near the Ashrama, a merchant.

18. स पृष्टस्तेन कस्त्वं भो हेतुश्चागमनेऽत्र क: ।
सशोक इव कस्मात्त्वं दुर्मना इव लक्ष्यसे ।।

स: तेन पृष्ट: भो! त्वं क: ? अत्र आगमने क: हेतु: च ।
त्वं कस्मात् सशोक: इव दुर्मना: इव लक्ष्यसे ।।



स:-he तेन-by him पृष्ट: -was asked भो! त्वं क:-sir, who are you अत्र-here आगमने-coming (here) क: हेतु: च-what is the reason त्वं-you कस्मात्-for what reason सशोक: इव-looking grief stricken दुर्मना: इव-sad in heart लक्ष्यसे-appear to be.

The king asked him—"Sir who are you? —What is the reason for your coming here?" Why are you looking sad at heart as if you are stricken down with grief.

19. इत्याकर्ण्य वचस्तस्य भूपते: प्रणयोदितम् ।
प्रत्युवाच स तं वैश्य: प्रश्रयावनतो नृपम् ।।

तस्य भूपते: प्रणयोदितम् वच: आकर्ण्य स: वैश्य: प्रश्रयावनत: तं नृपं प्रत्युवाच ।

तस्य-his भूपते: -of the king प्रणयोदितम्-spoken with love वच:-words आकर्ण्य-having heard स:-that वैश्य:-merchant प्रश्रयावनत:-bowing repectfully तं नृपम्-to that king प्रत्युवाच-replied.

Hearing these loving words of the king, the merchant bowed respectfully and told the king.

20. वैश्य उवाच ।।

वैश्य: उवाच-the merchant said.

21. समाधिर्नाम वैश्योऽहमुत्पन्नो धनिनां कुले ।
पुत्रदारैर्निरस्तश्च धनलोभादसाधुभिः ॥

अहं समाधिः नाम वैश्यः, धनिनां कुले उत्पन्नः । धनलोभात् असाधुभिः पुत्रैः दारैः च निरस्तः च ॥

अहं-I समाधिः नाम-by name Samadhi वैश्यः-a merchant धनिनां कुले-In a family of wealthy people उत्पन्नः-born धनलोभात्-because of greed for money असाधुभिः-wicked पुत्रैः-sons दारैः च-and wife निरस्तः च-driven away.

I am a Vaisya-Merchant. My name is Samadhi and am born in a wealthy family. Because of their greed for wealth, my wicked sons and wife have driven me away.

22 विहीनश्च धनैर्दारैः पुत्रैरादाय मे धनम् ।
वनमभ्यागतो दुःखी निरस्तश्चाप्तबन्धुभिः ॥

मे धनं आदाय धनैः दारैः, पुत्रैः च विहीनः आप्तबन्धुभिः निरस्तः च दुःखी अहं वनं अभ्यागतः ।

मे-my धनं-wealth आदाय-having confiscated धनैः-wealth दारैः-wife पुत्रैः च-sons विहीनः-bereft of (lost) आप्तबन्धुभिः-by dear and near ones निरस्तः च-driven away दुःखी-with sorrow अहं-I वनं-wood अभ्यागतः-have come to.



My wealth was taken away by my sons and wife and now I have no wealth, sons and wife. Driven away by them, now I am very sad and came to the forest.

23. सोऽहं न वेद्मि पुत्राणां कुशलाकुशलात्मिकाम् ।
प्रवृत्तिं स्वजनानां च दाराणां चात्र संस्थितः ॥

सः अहं पुत्राणां, दाराणां, स्वजनानां च कुशलाकुशलात्मिकां प्रवृत्तिं न वेद्मि । अत्र संस्थितः च ।

सः अहं-I पुत्राणां-of my sons दाराणां-wife स्वजनानां च-and relatives कुशलाकुशलात्मिकां-welfare and otherwise (good or bad) प्रवृत्तिं-doings न वेद्मि-do not know अत्र-here संस्थितः च-dwelling.

Because I am staying here, I do not know anything good or bad about the deeds of my sons, wife and relatives.

24-25. किं नु तेषां गृहे क्षेमम् अक्षेमं किं नु साम्प्रतम् ।
कथं ते किं नु सद्वृत्ताः दुर्वृत्ताः किं नु मे सुताः ॥

साम्प्रतम् तेषां गृहे किं क्षेमं नु, किं अक्षेमं नु । ते मे सुताः कथम् सद्वृत्ताः किं नु, दुर्वृत्ताः किं नु ।

साम्प्रतम्-at present तेषां-for them गृहे-in the house किं क्षेमं नु किं अक्षेमं नु-they are well or not ते मे सुताः-my sons कथम्-how are they? सद्

वृत्ता: किं नु-leading good lives, दुर्वृत्ता: किं नु-or leading bad lives.

At present I am thinking whether they are well off at home or not well, whether they are leading good lives or bad lives.

26. राजोऽवाच ॥

राजा उवाच-the king said.

27-28 यैर्निरस्तो भवाँल्लुब्धैः पुत्रदारादिभिर्धनैः ॥
तेषु किं भवतः स्नेहमनुबध्नाति मानसं ॥

यैः पुत्रदारादिभिः लुब्धैः धनैः निरस्तः तेषु किं भवतः मानसं स्नेहं अनुबध्नाति ?

यैः-by whom पुत्रदारादिभिः-by sons and wife लुब्धैः - covetous धनैः wealth निरस्तः-deprived of तेषुः in them किं-why भवतः-your स्नेहं-love अनुबध्नाति-attached.

You have been deprived of your wealth, by this covetous folk, your sons, wife and others. Then why is your mind affectionately attached to these people.

29. वैश्य उवाच ॥

वैश्यः उवाच-the merchant said.



30. एवमेतद्यथा प्राह भवानस्मद्गतं वचः ।
किं करोमि न बध्नाति मम निष्ठुरतां मनः ॥

भवान् एतत् यथा वचः प्राह, अस्मद्गतं वचः एव प्राह । अहं किं करोमि मम मनः निष्ठुरतां न बध्नाति ।

भवान्-you एतत्-this यथा-thus वचः-words प्राह-told अस्मद्गतं वचः-my words एव-same प्राह-told अहं-I किं-what करोमि-shall do मम-my मनः-mind निष्ठुरतां-hardness न बध्नाति-does not bind.

These same thoughts are in my mind just now when you spoke the same. What shall I do? My mind does not become hard against them.

31. यैः सन्त्यज्य पितृस्नेहं धनलुब्धैर्निराकृतः ।
पतिस्वजनहार्दं च हार्दितेष्वेव मे मनः ॥

यैः धनलुब्धैः पितृस्नेहं, पतिस्वजनहार्दं च संन्त्यज्य निराकृतं तेषु एव मे मनः हार्दि ।

यैः-by whom धनलुब्धैः-greedy for money पितृस्नेहं-love for a father पतिस्वजनहार्दं च-love for husband and Kinsmen संत्यज्य-having given up निराकृतः I am driven away मनः-mind तेषु एव-in them itself मे-my हार्दि-heart is tender.

32. किमेतन्नाभिजानामि जानन्नपि महामते ।
यत्प्रेमप्रवणं चित्तं विगुणेष्वपि बन्धुषु ॥

33· तेषां कृते मे निःश्वासो दौर्मनस्यं च जायते ।।

34· करोमि किं यन्न मनस्तेष्वप्रीतिषु निष्ठुरम् ।।

महामते, यत् विगुणेषु अपि बन्धुषु जानन् अपि चित्तं प्रेमप्रवणं एतत् किं न अभिजानामि । तेषां कृते मे निःश्वासः दौर्मनस्यं च जायते तेषु अप्रीतिषु मनः न निष्ठुरं यत् किं करोमि ।

महामते-Oh great one बन्धुषु-relatives यत् विगुणेषु अपि-devoid of all virtues जानन् अपि-even knowing चित्त-this mind प्रेमप्रवणम्-is bound by love एतत् किं-why is it so? न अभिजानामि-I do not know तेषां for them मे निःश्वासः-I sigh दौर्मनस्यं च जायते-become weak minded too तेषु-in them अप्रीतिषु-unkind people मनः-my mind न निष्ठुरम्-is not hard यत् किं करोमि-what shall I do?

Being greedy for money, they having given up the love for a father, love for a husband and love for kinsmen. They have driven me out of home. For them I have so much love in my heart. Oh, virtuous one! why is it that I have so much love in my heart even though they are devoid of all virtues. Even knowing this my mind does not recognise this. I am sighing profusely out of grief for these people and my heart is very sad on account of them.



There is no love at all in their minds, Still there is no harshness in my mind towards them. What shall I do for this?

35. मार्कण्डेय उवाच ।।

मार्कंडेय उवाच-Markandeya said.

36. ततस्तौ सहितौ विप्र तं मुनिं समुपस्थितौ ।।

विप्र-Oh, Brahmana, ततः-then तौ-they सहितौ-together तं-that मुनि-sage समुपस्थितौ-approached the sage.

विप्र, ततः तौ सहितौ तं मुनिं समुपस्थितौ ।

The sage Markandeya spoke.

O Brahmin, then the king Suratha and the merchant Samadhi together approached the sage Sumedhas.

37· समाधिर्नाम वैश्योऽसौ स च पार्थिवसत्तमः ।।

समाधिःनाम असौ वैश्यः सः पार्थिवसत्तमः च ।

समाधिः नाम-named samadhi असौ वैश्यः-the Servant सः पार्थिवसत्तमः-the best of kings च-and.

38· कृत्वा तु तौ यथान्यायं यथार्हं तेन संविदम् ।
उपविष्टौ कथाः काश्चिच्चक्रतुर्वैश्यपार्थिवौ ।।

वैश्यपार्थिवौ तौ तु यथान्यायं यथार्हं तेन संविदम् कृत्वा उपविष्टौ काश्चित् कथाः चक्रतु ।

तौ वैश्यपार्थिवौ-they merchant & the king यथान्यायं-what is right or proper यथार्हं-deserving तेन-with him संविदम्-etiquette कृत्वा-having observed उपविष्टौ-sat near him काश्चित्-some कथा:-stories चक्रतु:-did.

That king named Suratha and the merchant Samadhi did obeisance to the sage and after observing the etiquette which he rightly deserved sat near him and talked with him on some topics.

39. राजोवाच ।।

राजा उवाच-the king said.

40. भगवंस्त्वामहं प्रष्टुमिच्छाम्येकं वदस्व तत् ।।

41. दु:खाय यन्मे मनस: स्वचित्तायत्ततां विना ।।

42. ममत्वं गतराज्यस्य राज्याङ्गेष्वखिलेष्वपि ।
जानतोऽपि यथाज्ञस्य किमेतन्मुनिसत्तम ।।

भगवन् अहं त्वां एकं प्रष्टुं इच्छामि तत् वदस्व ।

मुनिसत्तम, गतराज्यस्य जानत: अपि अज्ञस्य यथा अखिलेषु राज्याङ्गेषु अपि ममत्वं एतत् किं?

भगवन्-Oh sage अहं-I त्वां-to you एकं-one thing प्रष्टुं-to question इच्छामि-desire तत् वदस्व-tell me that यत्-which मे-my मनस:-of mind



दु:खाय-for affliction स्वचित्तायत्ततां विना-without control of intellect मुनिसत्तम-Oh, great sage गतराज्यस्य-I who have lost my kingdom जानत अपि-even knowing अज्ञस्य यथ-like foolish one अखिलेषु-all राज्याङ्गेषु अपि-In the kingdom & paraphernalia ममत्वं-attachment एतत् किं-why is it.

Oh, sir, I want to ask you a thing, please reply. My mind is not under my control-and I am sad at heart.

My kingdom has gone out of my hands, Oh, sage, I know it is a fact still I feel attachment for the lost kingdom its various paraphernalia just like an ignorant man. Why is it?

43. अयं च निकृत: पुत्रैर्दारैर्भृत्यैस्तथोज्झित: ।
स्वजनेन च सन्त्यक्तस्तेषु हार्दी तथाप्यति ।।

अयं च-this merchant also पुत्रै:-by sons दारै:-wife भृत्यै:-servants निकृत:-driven तथा and in the same way उज्झित:-discarded स्वजनेन च-by relatives सन्त्यक्त:-given up तथा अपि-still तेषु-in them हार्दी-affectionate.

In the same way this merchant also has been disowned by his sons, wife & servants and

driven away from home by his own relatives still he has deep love for them even now. Why is it ?

44. एवमेष तथाहं च द्वावप्यत्यन्तदु:खितौ।
दृष्टदोषेऽपि विषये ममत्वाकृष्टमानसौ ॥

एवं एष: तथा अहं च द्वौ अपि दृष्टदोषे अपि विषये ममत्वाकृष्टमानसौ अत्यन्तदु:खितौ—

एवं-thus एष:-this merchant तथा अहं च-and I also द्वौ अपि-both of us दृष्टदोषे अपि-even though defects have been detected विषये-in objects ममत्वाकृष्टमानसौ-with minds drawn with attachment अत्यन्त-most दुखितौ sorry.

This merchant and I both of us have seen the defects in objects of enjoyment. Still we are very much drawn to these objects owing to our attachment to them and are very unhappy.

45. तत्केनैतन्महाभाग यन्मोहो ज्ञानिनोरपि ।
ममास्य च भवत्येषा विवेकान्धस्य मूढता ॥

महाभाग, ज्ञानिनो: अपि मम अस्य च एषा विवेकान्धस्य मूढता यत् भवति तत् केन एतत् मोह: ।

महाभाग!-Oh great one ज्ञानिनो: अपि-even though we have knowledge मम अस्य च-for me



and him एषा-this विवेकान्धस्य-blind with ignorance यत् मूढता-this delusion भवति-occurs तत् केन एतत् मोह:- why this delusion.

Oh, great one, we both have knowledge and discrimination. Still we are having this delusion occurring only to those who have no discrimination. How is it that this has come to us.

46. ऋषिरुवाच ॥

ऋषि: उवाच the sage replied.

47. ज्ञानमस्ति समस्तस्य जन्तोर्विषयगोचरे ।
विषयाश्च महाभाग यान्ति चैवं पृथक्पृथक् ॥

महाभाग, समस्तस्य जन्तो: विषयगोचरे ज्ञानमस्ति एवं विषया: च पृथक् पृथक् यान्ति च ।

समस्तस्य जन्तो:-to every being विषयगोचरे in perceivable objects ज्ञान knowledge अस्ति-there is एवं-thus विषया: sense objects पृथक् पृथक्-differently यान्ति-go.

Oh, great king, every creature has the knowledge of percievable objects. And this object reaches the senses in different ways also.

48. दिवान्धा: प्राणिन: केचिद्रात्रावन्धास्तथापरे ।
केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टय: ॥

केचित् प्राणिनः दिवा अन्धाः केचित् रात्रौ अन्धाः च ।
केचित् प्राणिनः दिवा तथा रात्रौ तुल्यदृष्टयः ।

केचित्-some प्राणिनः-beings दिवा-at day time केचित्-some अन्धाः-blind रात्रौ-at night दिवा रात्रौ च-at day & night time तुल्यदृष्टयः-with equal vision.

Some beings are blind at day time & some are blind at night time. But some have equal vision both day and night.

49. ज्ञानिनो मनुजाः सत्यं किन्तु ते न हि केवलम् ।
यतो हि ज्ञानिनः सर्वे पशुपक्षिमृगादयः ॥

मनुजाः ज्ञानिनः सत्यं । किन्तु केवलम् ते । न हि-यतः सर्वे पशुपक्षिमृगादयः ज्ञानिनः ।

मनुजाः-human beings ज्ञानिनः-have knowledge सत्यं true किन्तु-but केवलम्-not only ते हि-they alone यतः for सर्वे-all पशुपक्षिमृगादयः animals birds and other creatures ज्ञानिनः हि have knowledge indeed.

It is true that human beings have knowledge, but not they alone have this knowledge—For all animals, birds and other beings have knowledge of sense objects.



50. ज्ञानं च तन्मनुष्याणां यत्तेषां मृगपक्षिणाम् ।
मनुष्याणां च यत्तेषां तुल्यमन्यत्तथोभयोः ॥

यत् तेषां मृगपक्षिणाम् तत् ज्ञानं मनुष्याणाम् च मनुष्याणाम् च यत् तत् तेषां च। तथा उभयोः तुल्यं

यत्-what तेषां-for them तत् ज्ञानं-that knowledge मृगपक्षिणाम्-animals and birds मनुष्याणम् च-for men too यत्-what मनुष्याणाम् च-for human beings तत्-that तेषां च-for them also तथा-so अन्यत्-knowledge उभयोः-to both तुल्यम्-equal.

The knowledge regarding body demands that human beings possess, the beasts & birds also possess. And what they have, human beings also have. So this is the same to both.

51. ज्ञानेऽपि सति पश्यैतान् पतंगाञ्छावचञ्चुषु ।
कणमोक्षादृतान् मोहात्पीड्यमानानपि क्षुधा ॥

ज्ञाने सति अपि क्षुधा पीड्यमानानपि मोहात् शाव चञ्चुषु कणमोक्षादृतान् एतान् पतंगान् पश्य—

ज्ञाने सति अपि-though they have knowledge क्षुधा-by hunger पीड्यमानान् अपि-even though distressed मोहात्-by delusion शाव चञ्चुषु-into the beaks of young ones कणमोक्षादृतान्-engaged in dropping grains एतान् पतंगान् these birds पश्य see,

See these birds, though they have knowledge and are distressed by hunger, by being deluded, they are engaged in dropping grains in the mouths of their young ones,

52. मानुषा मनुजव्याघ्र साभिलाषा: सुतान् प्रति ।
लोभात् प्रत्युपकाराय नन्वेतान् किं न पश्यसि ॥

मनुजव्याघ्र मानुषाः लोभात् प्रत्युपकाराय सुतान् प्रति साभिलाषाः ननु एतान् किं न पश्यसि ?

मनुजव्याघ्र -Oh! tiger among men मानुषाः-men generally प्रत्युपकाराय-expecting a return लोभात्-by greed एतान् सुतान् प्रति-towards these sons साभिलाषाः-with love ननु-no doubt किं न पश्यसि-don't you see that.

Oh tiger among men! Human beings are fond of children because of their desire for return help from them. Don't you see that·

53· तथापि ममतावर्ते मोहगर्ते निपातिताः ।
महामायाप्रभावेण संसारस्थितिकारिणा ॥

तथापि संसारस्थितिकारिणा महामायाप्रभावेण ममतावर्तै मोहगर्ते निपतिताः ।

तथापि-even so संसारस्थितिकारिणा-causing the existence of the world. महामायाप्रभावेण-by the power of the great delusion ममतावर्ते-into the



whirlpool of attachment मोहगर्ते-into the whirlpool of ignorance or delusion निपातिताः-are thrown.

Even so, human beings are thrown into this whirlpool of attachment by the power of the great illusion which is the cause of the existence of the world.

54· तन्नात्र विस्मयः कार्यो योगनिद्रा जगत्पतेः ।
महामाया हरेश्चैषा तया सम्मोह्यते जगत् ॥

तत् अत्र विस्मयः न कार्यः । एषा महामाया जगत्पतेः हरेः योगनिद्रा । तया जगत् सम्मोह्यते ।

तत्-so अत्र-in this विस्मयः-wonder न कार्यः-is not to be entertained एषा महामाया-this great illusion जगत्पतेः-of the Lord of the world' हरेः-of Hari योगनिद्रा-tamasic power of Hari तया-by her जगत्-the whole world सम्मोह्यते-is under delusion.

There is no cause for wonder in this matter· This great delusion is the Lord's Yoganidra or tamasic power of Vishnu. It is through her power the world is under the great delusion·

55· ज्ञानिनामपि चेतांसि देवी भगवती हि सा ।
बलादाकृष्य मोहाय महामाया प्रयच्छति ॥

सा भगवती देवी महामाया ज्ञानिनामपि चेतांसि बलात् आकृष्य मोहाय प्रयच्छति ।

सा-that भगवती देवी-Devi Bhagavati महामाया-the great illusion ज्ञानिनां अपि-even of the wise men चेतांसि-minds बलात्-by force आकृष्य-by attracting मोहाय-delusion प्रयच्छति-causes.

That goddess Mahamaya or the great delusion by forcibly attracting the minds of even men of knowledge causes the delusion.

56. तया विसृज्यते विश्वं जगदेतच्चराचरम् ।
सैषा प्रसन्ना वरदा नृणां भवति मुक्तये ॥

एतत् चराचरम् विश्वं, जगत् तया विसृज्यते सा एषा प्रसन्ना वरदा नृणाम् मुक्तये भवति ।

एतत्-this चराचरम्-consisting of moving and non-moving विश्वं, जगत्-entire world तया-by her विसृज्यते-is created सा एषा-she herself प्रसन्ना-if pleased वरदा-boon giver नृणां-of men भवति-becomes cause मुक्तये-for liberation.

This whole world moving and non-moving is created by her. If she is pleased, she gives boon and causes the liberation of men from birth and death.

57. सा विद्या परमा मुक्तेर्हेतुभूता सनातनी ॥

58. संसारबन्धहेतुश्च सैव सर्वेश्वरेश्वरी ॥



सा मुक्तेः हेतुभूता सनातनी परमा विद्या । सा एव संसारबन्धहेतुः सर्वेश्वरी च ।

सा-that devi सनातनी-eternal मुक्तेः-of liberation हेतुभूता-cause of परमा विद्या-the supreme knowledge. सा एव-she himself is संसारबन्धहेतुः-the cause of binding one with सर्वेश्वरी च-supreme goddess this world.

She is the supreme knowledge, eternal and the cause of final liberation. She alone is the cause of binding one with this changing world and she is the Goddess of all Gods.

59. राजोऽवाच ॥

राजा उवाच king said.

60. भगवन् का हि सा देवी महामायेति यां भवान् ।
ब्रवीति कथमुत्पन्ना सा कर्मास्याश्च किं द्विज ॥

भगवन्, द्विज, यां भवान् महामाया इति ब्रवीति सा देवी का हि सा कथं उत्पन्ना । अस्याः कर्म च किं ?

भगवन्-sir, द्विज-Brahmin यां-of whom भवान्-you महामाया-Mahamaya इति ब्रवीति-speak of as सा का हि-who is she? कथं-how उत्पन्ना-is born अस्याः-her कर्म-action किं-what.

Revered sir, who is that goddess whom you call Mahamaya? How is she born? What is her sphere of action?

61. यत्प्रभावा च सा देवी यत्स्वरूपा यदुद्भवा ॥
62. तत्सर्वं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां वर ॥

ब्रह्मविदां वर! सा देवी यत्प्रभावा यत्स्वरूपा, यदुद्भवा तत्सर्वं त्वत्तः श्रोतुं इच्छामि ॥

ब्रह्मविदां वर-O best of Brahmins सा देवी-that goddess यत्प्रभावा-of what nature यत्स्वरूपा-of what form यदुद्भवा-of what origin तत् सर्वं-all that त्वत्तः- from you श्रोतुं- to hear इच्छामि- I desire.

Oh, Best of Brahmins, of what nature is she, what is her form and how was she born? All that I want to hear from you.

63. ऋषिरुवाच ॥

ऋषिःउवाच- the sage said.

64. नित्यैव सा जगन्मूर्तिस्तया सर्वमिदं ततम् ॥
65. तथापि तत्समुत्पत्तिर्बहुधा श्रूयतां मम ॥

सा-she जगन्मूर्तिः-of the form of the universe नित्य एव-is eternal indeed तया-by her इदं सर्वं-the whole of this ततम्-is filled तथा अपि-even so



तत्समुत्पत्तिः - her incarnation or birth बहुधा-in various ways मम श्रूयतां-hear from me.

Oh King! that supreme goddess has no beginning or end. She is eternal. The whole universe is Her form. And she pervades the whole universe. Still her manifestations are many. Youh ear it from me.

66. देवानां कार्यसिद्ध्यर्थमाविर्भवति सा यदा ।
उत्पन्नेति तथा लोके सा नित्याप्यभिधीयते ॥

सा यदा देवानां कार्यसिद्ध्यर्थं आविर्भवति तदा सा नित्या अपि लोके उत्पन्ना इति अभिधीयते ।

यदा-when सा-she देवानां-of the Devas कार्यसिद्ध्यर्थं-for accomplishing their cause आविर्भवति-manifests सा-she नित्या अपि-even though eternal तदा- then लोके-in the world उत्पन्ना-born अभिधीयते-is said to be.

Even though she has no birth, when she incarnates herself for accomplishing the cause of the Devas then the world speaks of her as incarnated.

67. योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते ।
आस्तीर्य शेषमभजत् कल्पान्ते भगवान् प्रभुः ॥
68. तदा द्वावसुरौ घोरौ विख्यातौ मधुकैटभौ ।
विष्णुकर्णमलोद्भूतौ हन्तुं ब्रह्माणमुद्यतौ ॥

यदा कल्पान्ते जगति एकार्णवीकृते भगवान् प्रभुः विष्णुः शेषं आस्तीर्य योगनिद्रां अभजत् ।

तदा विष्णुकर्णमलोद्भवौ मधुकैटभौइतिविख्यातौ द्वौ घोरौ असुरौ ब्रह्माणं हन्तुं उद्यतौ

यदा–when कल्पान्ते–at the end of a kalpa जगति–the whole world एकार्णवीकृते–was one ocean भगवान् प्रभुः विष्णुः–the Lord Vishnu शेषं–On the serpent Sesha आस्तीर्य–lying on योगनिद्रां–yogic sleep अभजत्–took to तदा–then विष्णुकर्णमलोद्भूतौ–born of the ear-wax of Vishnu घोरौ–terrible विख्यातौ–well known मधुकैटभौ–by name Madhu and Kaitabha द्वौ असुरौ–two demons ब्रह्माणं–Brahma हन्तुं–to kill उद्यतौ–got ready

When at the end of a cycle the whole world was an ocean because of the great Deluge, Lord Vishnu lying on the bed of sesha took to sleep (yoga Nidra) then two terrible, Asuras who were born out of the dirt of Vishnu's ears by name Madhu and Kaitabha attempted to kill Brahma.

69. स नाभिकमले विष्णोः स्थितो ब्रह्मा प्रजापतिः ।
दृष्ट्वा तावसुरौ चोग्रौ प्रसुप्तं च जनार्दनम् ।।

विष्णोः नाभिकमले स्थितः सः प्रजापतिः ब्रह्मा तौ असुरौ उग्रौ च जनार्दनं प्रसुप्तं च दृष्ट्वा हरेः विबोध विबोधनार्थाय हरिनेत्रकृतालयां योगनिद्रां एकाग्र हृदयः स्थितः तुष्टाव ।



विष्णोः–of Vishnu नाभिकमले–in the lotus coming out of navel स्थितः–sitting सः प्रजापतिः–that Lord of creation ब्रह्मा–Brahma तौ असुरौ–those demons उग्रौ–fierce जनार्दनं–Vishnu प्रसुप्तं–sleeping दृष्ट्वा–seeing हरेः–of Vishnu प्रबोधनार्थाय–to wake up हरिनेत्रकृतालयाम्–sitting on the eyes of Vishnu तां योगनिद्रां–that mystic sleep एकाग्रहृदयः स्थितः–with concentration of mind तुष्टाव–extolled.

Brahma, who was seated on the lotus coming out of the navel of Vishnu saw these furious demons (set to kill him) and Lord Vishnu asleep. With the purpose of waking up Vishnu from the mystic sleep he with concentrated mind began to propitiate Yoganidra dwelling on Vishnu's eyes.

70. तुष्टाव योगनिद्रां तामेकाग्रहृदयः स्थितः ।
विबोधनार्थाय हरेर्हरिनेत्रकृतालयाम् ।।

71. विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम् ।
निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः ।।

तेजसः प्रभुः विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीं विष्णोः अतुलां भगवतीं निद्राम् तुष्टाव ।

तेजसः प्रभुः–Brahma, the resplendent विश्वेश्वरीम्–the queen of the universe जगद्धात्रीं–who is the supporter of the whole universe स्थितिसंहारकारिणीम्–cause of sustenance and dissolution

विष्णो: – Vishnu's भगवतीं-goddess अतुलां- incomparable निद्रां-Yoganidra.

Brahma praised the queen of the universe, who is the supporter of the world, who is the cause of its existence and destruction and who is the incomparable goddess of Vishnu.

72· ब्रह्मोऽवाच ॥

ब्रह्मा उवाच- Brahma said.

73. त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कार: स्वरात्मिका ।
सुधा त्वमक्षरे नित्ये त्रिधामात्रात्मिका स्थिता ॥

त्वं स्वाहा-you are swaha त्वं स्वधा-you are swadha त्वं हि-you indeed are वषट्कार: -the vashatkara स्वरात्मिका-embodiment of swara त्वं सुधा-you are the nectar नित्ये-Oh eternal अक्षरे-imperishable one त्रिधामात्रात्मिका-embodiment of three fold matras स्थिता-exist

O, mother, you are swaha, you are swadha, and you are the vashatkara, and you are swava embodied. You are the heavenly nectar which gives life. In the eternal world Anuswara you exist as the three matras of अ, उ, म

74. अर्धमात्रा स्थिता नित्या यानुच्चार्या विशेषत: ।
त्वमेव सा त्वं सावित्री त्वं देवजननी परा ॥

नित्या अपि या विशेषत: अनुच्चार्या अर्धमात्रा स्थिता ।



नित्या-eternal या-who विशेषत:-specifically अनुच्चार्या-can not be uttered अर्धमात्रा-half a matra.

Though eternal, you are half a matra which cannot be uttered.

(You are the Bindu in प्रणव-which is not separately uttered.

सा त्वं एव सावित्री त्वं परा देवजननी ।

सा-that त्वं-you एव-indeed सावित्री-are savithri त्वं-you परा-supreme देवजननी-mother of the devas

That you are savithri and you the Mother of Devas, you are the supreme Mother.

75. त्वयैतद्धार्यते विश्वं त्वयैतत् सृज्यते जगत् ।
त्वयैतत् पाल्यते देवि त्वमत्स्यन्ते च सर्वदा ॥

देवी, त्वया एतत् विश्वं धार्यते । त्वया एतत् जगत् सृज्यते । त्वया एतत् पाल्यते । अन्ते सर्वदा त्वं अत्सि च ।

देवि-divine mother त्वया-by you एतत् विश्वं-this universe धार्यते-is borne त्वया-by you एतत् जगत्-this universe सृज्यते-is created त्वया-by you एतत्-this पाल्यते-is proctected अन्ते-in the end सर्वदा-always त्वं-you अत्सि-devour च-too.

Divine Mother, you alone sustain this universe, you alone create this universe, and you protect it. And at the end of this cycle you alone devour the same.

76. विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने ।
तथा संहृतिरूपान्ते जगतोऽस्य जगन्मये ॥

जगन्मये त्वं अस्य जगतः विसृष्टौ सृष्टिरूपा, पालने स्थितिरूपा च तथा अन्ते संहृतिरूपा ।

अस्य जगतः - of this world विसृष्टौ–during creation सृष्टिरूप - creator पालने - protection स्थितिरूपा–you are in the form of Protector.

तथा–the same way अन्ते - in the end संहृतिरूपा–in the form of destroyer.

Oh'mother of universe, when the world is created you are in the form of creator, you are the protector of this universe, and in the end of the cycle, you are in the form of destroyer also.

77. महाविद्या महामाया महामेधा महास्मृतिः ।
महामोहा च भवती महादेवी महासुरी ॥

महाविद्या, महामाया, महामेधा, महास्मृतिः, महामोहा महादेवी, महासुरी च ।

You are the supreme knowledge, great llusion, great intellect, great contemplating



power, and great Goddess as well as great demoness.

78. प्रकृतिस्त्वं च सर्वस्य गुणत्रयविभाविनी ।
कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा ॥

सर्वस्य गुणत्रयविभाविनी प्रकृतिः त्वं च । दारुणा कालरात्रिः महारात्रिः च ।

सर्वस्य–of all गुणत्रयविभाविनी–creator of three gunas प्रकृतिः–primordial cause त्वं च–you are दारुणा–terrible कालरात्रिः–night of deluge महारात्रिः–great night मोहरात्रि–night of delusion.

You are the primordial power, which is the cause of the three Gunas You are also the terrible night of deluge, the great night and the great delusion.

79. त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा ।
लज्जा पुष्टिस्तथा तुष्टिस्त्वं शान्तिः क्षान्तिरेव च ॥

त्वं श्रीः, त्वं ईश्वरी, त्वं ह्रीः, त्वं बोधलक्षणा बुद्धिः, त्वं लज्जा, तुष्टिः, तथा शान्तिः, क्षान्तिः च ।

त्वं श्रीः–you are Goddess of wealth त्वं ईश्वरी–you are the ruler of all त्वं ह्री–you are modesty बोधलक्षणा बुद्धिः–discriminatory (know ledge) तथा–same way त्वं–you are लज्जा–shyness पुष्टिः–nourishment तुष्टिः–contentment शान्तिः–peace क्षान्तिः–forbearance also.

You are the goddess of wealth, you are the ruler of all, you are modesty, and discriminatory knowledge. In the same way, you are shyness, nourishment, contentment, peace and forbearance also.

80. खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ।
शङ्खिनी चापिनी बाणभुशुण्डीपरिघायुधा ॥

खड्गिनी-armed with sword शूलिनी-armed with spear घोरा-terrible गदिनी-having the club चक्रिणी-discus तथा शंङ्खिनी-also having conch चापिनी having armed with bow बाण भुशुण्डी परिघायुधा-having arrows slings and iron mace as weapon. You wield sword, spear, club, discus, conch, bow, arrows, slings, and mace.

81. सौम्या सौम्यतराशेषसौम्यभ्यस्त्वतिसुन्दरी ।
परापराणां परमा त्वमेव परमेश्वरी ॥

त्वं एव सौम्या अशेषसौम्येभ्यः तु सौम्यतरा अतिसुन्दरी परापराणां परमा परमेश्वरी च ।

त्वं-you एव-indeed सौम्या-modest अशेषसौम्येभ्यः of all modest things सौम्यतरा-more modest अतिसुन्दरी-exceedingly beautiful परापराणां-of everything high and low परमा-supreme परमेश्वरी-the supreme lordly power.



You indeed are modest, even more modest than all modest things, exceedingly beautiful, supreme over everything high and low, indeed you are the supreme overlording power.

82. यच्च किञ्चित्क्वचिद्वस्तु सदसद्वाखिलात्मिके ।
तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे मया ।

हे अखिलात्मिके यत् किञ्चित् क्वचित् च सत् असत् वा वस्तु अस्ति सर्वस्य तस्य या शक्तिः सा त्वं मया किं स्तूयसे ?

हे अखिलात्मिके-Oh you of universal form, यत्-whatever किञ्चित्-however little क्वचित्-wherever सत्-real असत्-unreal वा-or अस्ति-exists सर्वस्य-of all तस्य-of that या-what शक्तिः-power सा-that त्वं-thou मया-by me किं-how स्तूयसे-can be praised

Oh you, the soul and embodiment of everything, whatever wherever and however little a thing exists, real or unreal, of all that you are the power. Then how can you be extoled by me?

83. यया त्वया जगत्स्रष्टा जगत्पातात्ति यो जगत् ॥
सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः ॥

यः जगत्स्रष्टा जगत्पाता जगत् अत्ति च सः अपि यया त्वया निद्रावशं नीतः (तां) त्वां स्तोतुं कः ईश्वरः ।

यः-who जगत्स्रष्टा-creator of the universe जगत्पाता-sustainer of the universe जगत्-universe

अत्ति-devours (destroys) च-and सः-he अपि-too यया-by whom त्वया-by you निद्रावशं-subject to sleep नीतः-led त्वां you स्तोतुं-to extol कः-who ईश्वरः-able

He too who is the creator, sustainer and destroyer of the universe, was led to sleep by you. Who is then capable of praising you.

84. विष्णुः शरीरग्रहणमहमीशान एव च ।
कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत् ।

विष्णुः अहं ईशानः एव च यतः ते शरीरग्रहणं कारिताः अतः कः त्वां स्तोतुं शक्तिमान् भवेत् ?

विष्णुः-Vishnu अहं-myself ईशानः-Siva एव च-also यतः-whereby ते-by you

शरीरग्रहणम्-to become embodied कारिताः-made by ततः त्वां-you कः-who स्तोतुं-to extol शक्तिमान्-who has strength भवेत्-will be.

Who will be able to extol you by whose power Vishnu, I myself and Siva have got these embodied forms.

85. सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता ।
मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ ॥

इत्थं स्वैः उदारैः प्रभावैः संस्तुता सा त्वं एतौ दुराधर्षौ असुरौ मधुकैटभौ मोहय ॥



देवि-goddess इत्थं-thus स्वैः-yours उदारैः-great प्रभावैः-greatness संस्तुता-extoled सा त्वं-you एतौ-these दुराधर्षौ-unassailable असुरौ-demons मधुकैटभौ-by name Madhu and Kaitabha मोहय-bewitch them.

Oh, Devi, you thus praised for your great qualities, please delude these two demons Madhu and Kaitabha who are unassailable by any one else.

86. प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु ॥
87. बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ ॥

जगत्स्वामी अच्युतः लघु प्रबोधम् नीयतां च
एतौ महासुरौ हन्तुं बोधः क्रियतां च ।

जगत्स्वामी अच्युतः-may the Lord Vishnu प्रबोधं नीयतां-be awakened लघु-soon एतौ महासुरौ-these two great demons हन्तुं-to kill अस्य बोधः क्रियतां च-he be roused up.

Please soon awaken Vishnu, the Lord of the world and let him be aroused to kill these great demons.

88. ऋषिरुवाच ॥

ऋषिः उवाच-the sage said.

89. एवं स्तुता तदा देवी तामसी तत्र वेधसा ।
विष्णोः प्रबोधनार्थाय निहन्तुं मधुकैटभौ ।

90. नेत्रास्यनासिकाबाहुहृदयेभ्यस्तथोरस: ।
निर्गम्य दर्शने तस्थौ ब्रह्मणोऽव्यक्तजन्मन: ॥

एवं वेधसा मधुकैटभौ निहन्तुं विष्णो: प्रबोधनार्थाय स्तुता तामसी देवी नेत्र-आस्य नासिका बाहु हृदयेभ्य: तथा उरस: निर्गम्य अव्यक्तजन्मन: ब्रह्मण: दर्शने तस्थौ ।

एवं-thus वेधसा-by Brahma मधुकैटभौ-Madhu and Kaitabha निहन्तुं-to kill विष्णो:-Vishnu's प्रबोधनार्थाय - to wake up तामसी देवी-Devi of Delusion तत्र-there नेत्रास्यनासिकाबाहुहृदयेभ्य:-from eyes mouth, nose, hands and heart तथा उरस:-from breast निर्गम्य-coming out अव्यक्त जन्मन:-whose birth is unknown ब्रह्मण:-of Brahma दर्शने-in the sight तस्थौ-stood.

In this way when Brhama extoled Devi inorder to wake up Vishnu to kill the demons Madhu and Kaidabha, the Devi of delusion came out from the eyes, mouth, nostrils, hands heart, and chest and stood before him whose origin was unknown.

91. उत्तस्थौ च जगन्नाथस्तया मुक्तो जनार्दन: ।
एकार्णवेऽहिशयनात्तत: स ददृशे च तौ ॥

92. मधुकैटभौ दुरात्मानावतिवीर्यपराक्रमौ ।
क्रोधरक्तेक्षणावत्तुं ब्रह्माणं जनितोद्यमौ ॥



जगन्नाथ: जनार्दन: तथा मुक्त: एकार्णवे अहिशयनात् उत्तस्थौ च । तत: स: मधुकैटभौ दुरात्मानौ अतिवीर्यपराक्रमौ क्रोधरक्तेक्षणौ ब्रह्माणं अत्तुं जनितोद्यमौ तौ ददृशे च ।

जगन्नाथ: - Lord of the universe जनार्दन:- Vishnu तया मुक्त:-released by her (free from delusion) एकार्णवे-in the universal ocean अहिशयनात्-from his bed of serpent उत्तस्थौ-rose up तत:-then स:-he तौ - these two दुरात्मानौ-evil minded अतिवीर्य पराक्रमौ-who had great strength and valour क्रोधरक्तेक्षणौ-with red eyes due to anger मधुकैटभौ-Madhu and Kaitabha ब्रह्माणं Brahma अत्तुं-to kill जनितोद्यमौ-attempting ददृशे च-saw.

Freed from the slumber of delusion Vishnu, the Lord of the whole universe rose up from his bed of serpent in the universal ocean and he saw those two demons Madhu and Kaitabha, who were evil minded, who possessed great valour and strength, whose eyes were red with anger and who were attempting to kill Brahma.

93. समुत्थाय ततस्ताभ्यां युयुधे भगवान् हरि: ।
पञ्चवर्षसहस्राणि बाहुप्रहरणो विभु: ॥

तत: समुत्थाय विभु: भगवान् हरि: पञ्चवर्षसहस्राणि बाहुप्रहरण: ताभ्यां युयुधे ।

तत:-afterwards समुत्थाय-having got up विभु:-all pervading भगवान् हरि:-the Lord Vishnu पञ्चवर्षसहस्राणि-five thousand years बाहुप्रहरण:-hitting with his arms ताभ्यां-with them युयुधे-fought.

The all pervading Lord Vishnu got up and fought with them for five thousand years using his own arms as weapons.

94. तावप्यतिबलोन्मत्तौ महामायाविमोहितौ ।

95. उक्तवन्तौ वरोऽस्मत्तो व्रियतामिति केशवम् ॥

तौ अपि अतिबलोन्मत्तौ महामायाविमोहितौ अस्मत्तः वरं व्रियताम् इति केशवम् उक्तवन्तौ ।

तौ अपि-they two अतिबलोन्मत्तौ-becoming mad with their strength महामाया विमोहितौ-deluded by the great illusion अस्मत्त:-from us वरं-boon व्रियतां-accept केशवम्-Kesava उक्तवन्तौ-told.

They two haughty with their own power and deluded by Mahamaya asked Vishnu to accept a boon from them.

96. श्रीभगवानुवाच ॥

श्री भगवान् उवाच-Vishnu said



97. भवेतामद्य मे तुष्टौ मम वध्यावुभावपि ॥

मे तुष्टौ उभौ अपि अद्य में वध्यौ भवेताम् ।

मे तुष्टौ-if you are pleased with me उभौ अपि-both of you अद्य-today मे वध्यौ-killed by me भवेतां-may you two be.

If you are pleased with me both of you must be slain by me now itself.

98. किमन्येन वरेणात्र एतावद्धि वृतं मम ॥

अन्येन वरेण-by another boon अत्र किं-what need is there मम-my वृतं-choice एतावत् हि-only this much.

What is the need for another boon here! I have chosen only this much.

99. ऋषिरुवाच ॥

ऋषिः उवाच-The sage said

100. वञ्चिताभ्यामिति तदा सर्वमापोमयं जगत् ।
विलोक्य ताभ्यां गदितो भगवान् कमलेक्षण: ॥

101. आवां जहि न यत्रोर्वी सलिलेन परिप्लुता ॥

ताभ्यां सर्वं जगत् आपोमयं विलोक्य भगवान् कमलेक्षणः गदितः यत्र उर्वी सलिलेन न परिप्लुता तत्र आवां जहि ।

इति वञ्चिताभ्यां ताभ्यां-by these two who were thus cheated सर्वं जगत्-the whole world आपोमयं-covered with water विलोक्य-having seen भगवान् कमलेक्षण:-the Lord Vishnu गदित:-was told यत्र-where उर्वी-the earth सलिलेन-by water न परिप्लुता-not immersed तत्र-there आवां जहि-kill both of us.

We are cheated by this Lord, they said and seeing this whole world under water they told the Lord Vishnu to kill them on a spot on earth where there was no water.

102. ऋषिरुवाच ॥

ऋषि: उवाच—The sage said

103. तथेत्युक्त्वा भगवता शङ्खचक्रगदाभृता ।
कृत्वा चक्रेण वै छिन्ने जघने शिरसी तयो: ॥

तथा इति उक्त्वा शङ्खचक्रगदाभृता भगवता तथा शिरसी जघने कृत्वा चक्रेण छिन्ने वै ।

तथा इति-be it so उक्त्वा-having told शङ्खचक्रगदभृता-by him who had conch, disc, and club in his hands भगवता-by the Lord तयो: शिरसी-their heads जघने कृत्व -on the fore part of the loins (where there was no water चक्रेण-by the disc छिन्ने-cut.

The Lord said 'be it so'. The Lord who had the conch, disc & club in his hands kept



their heads on the fore part of loins and cut them with the disc (killed)

104. एवमेषा समुत्पन्ना ब्रह्मणा संस्तुता स्वयम् ।
प्रभावमस्या देव्यास्तु भूय: शृणु वदामि ते ॥

ब्रह्मणा स्वयं संस्तुता एषा एवं समुत्पन्ना अस्या: देव्या: प्रभावं तु भूय: शृणु । (अहं ते वदामि ।

ब्रह्मणा-by Brahma स्वयं-himself संस्तुता-extolled एषा-Devi एवं-this way समुत्पन्ना-appeared अस्या: देव्या:-of this Devi प्रभावं-greatness भूय:-again शृणु-hear ते-to you वदामि-I will tell.

Extolled by Brahma himself Devi thus appeared. I will tell you again the greatness of this Devi-please listen.

इति श्री मार्कण्डेयपुराणे सावर्णिके मन्वन्तरे
देवीमाहात्म्ये मधुकैटभवधो नाम प्रथमोऽध्याय: ।

# अथ मध्यमचरित्रम्

महालक्ष्मीध्यानम्

ॐ ऋषिरुवाच ।।

1. ऋषिः उवाच–the sage said

2. देवासुरमभूद्युद्धं पूर्णमब्दशतं पुरा ।
महिषेऽसुराणामधिपे देवानां च पुरन्दरे ।।

पुरा महिषे असुराणां अधिपे पुरन्दरे देवानां च अधिपे पूर्णं अब्दशतं देवासुरं युद्धं अभूत् ।

पुरा-In the olden days महिषे असुराणं अधिपे–when Mahisha was the king of asuras पुरन्दरे देवानां च–when Indra was the king of devas पूर्णं–full अब्दशतम्–hundred years देवासुरं–between devas & asuras युद्धं–war अभूत्–took place

In olden days a war broke out between the Devas and Asuras when Mahisha was the king of the asuras & Indra the Lord of Devas which lasted for a full hundred years.

3. तत्रासुरैर्महावीर्यैर्देवसैन्यं पराजितम् ।
जित्वा च सकलान् देवानिन्द्रोऽभून्महिषासुरः ।।



तत्र महावीर्यैः असुरैः देवसैन्यं पराजितम् । सकलान् देवान् जित्वा महिषासुरः इन्द्रः अभूत् च ।

तत्र-then महावीर्यैः असुरैः-by the Asuras who were of great prowess देवसैन्यं-the Army of the Devas पराजितम्–was defeated सकलान् देवान्–all Gods जित्वा-having conquered महिषासुरः–Mahishasura इन्द्रः अभूत् च–Became Indra too.

In that war the Asuras who had great prowess defeated the Devas and Mahishasura became Indra.

4. ततः पराजिता देवाः पद्मयोनिं प्रजापतिम् ।
पुरस्कृत्य गतास्तत्र यत्रेशगरुडध्वजौ ।।

ततः पराजिताः देवाः पद्मयोनिं प्रजापतिं पुरस्कृत्य यत्र ईशगरुडध्वजौ तत्र गताः ।

ततः–then पराजिताः देवाः–the Devas who were defeated पद्मयोनिं –Born from the lotus प्रजापतिं–Brahma पुरस्कृत्य–led by यत्र–where ईश गरुडध्वजौ–Siva and Vishnu तत्र–there गताः-went

Then the Devas led by Brahma, the creator of Beings went to the place where Siva and Vishnu were present.

5. यथावृत्तं तयोस्तद्वन्महिषासुरचेष्टितम् ।
त्रिदशाः कथयामासुर्देवाभिभवविस्तरम् ॥

तत्र त्रिदशाः तयोः महिषासुरचेष्टितम् देवाभिभवविस्तरं यथावृत्तं कथयामासुः ।

तत्र-there त्रिदशाः-the Devas तयोः-to them महिषासुरचेष्टितम्-the deeds of Mahishasura देवाभिभवविस्तरम्-the defeat of the Devas in detail यथावृत्तं-the news as it took place कथयामासुः-told

There the Devas told both of them (as it took place) about the deeds of Mahishasura and the defeat of the Devas in detail as happened.

6. सूर्येन्द्राग्न्यनिलेन्दूनां यमस्य वरुणस्य च ।
अन्येषां चाधिकारान्स स्वयमेवाधितिष्ठति ॥

सूर्येन्द्राग्न्यनिलेन्दूनां यमस्य वरुणस्य च अन्येषां च अधिकारान् सः स्वयमेव अधितिष्ठति ।

सूर्येन्द्राग्न्यनिलेन्दूनां-of the Sun, Indra, fire God wind, Moon. यमस्य वरुणस्य अन्येषां च-of yama Varuna, and others also अधिकारान्-powers स्वयमेव-himself अधितिष्ठति-has assumed.

He himself has assumed the powers of sun, Indra, Fire, Wind, Moon, Yama, Varuna and other Gods.



7. स्वर्गान्निराकृताः सर्वे तेन देवगणा भुवि ।
विचरन्ति यथा मर्त्या महिषेण दुरात्मना ॥

तेन दुरात्मना महिषेण स्वर्गात् निराकृताः सर्वे देवगणाः मर्त्याः यथा भुवि विचरन्ति ।

तेन दुरात्मना-by that wicked one महिषेण-by Mahisha स्वर्गात्-from heaven निराकृताः-driven away सर्वे देवगणाः-all the Devas मर्त्याः यथा-just like human beings भुवि-on the earth विचरन्ति-roam about.

Driven away from heaven by the evil minded Mahisha all the Devas are roaming about the earth just like human beings.

8. एतद्वः कथितं सर्वममरारिविचेष्टितम् ।
शरणं वः प्रपन्नाः स्मो वधस्तस्य विचिन्त्यताम् ॥

एतत् अमरारिविचेष्टितम् सर्वं वः कथितम् वः शरणं प्रपन्नाः स्मः तस्य वधः विचिन्त्यताम् ।

एतत्-this अमरारिविचेष्टितम्-doings of the enemies of Devas सर्वं-all वः-to you कथितं-told वः-you शरणं-shelter प्रपन्नाः स्मः-have approached you तस्य-his वधः-slaughter, death विचिन्त्यतां-kindly think.

We have narrated to you about the doings of the enemies of the Devas and we have sought refuge under you. Kindly think about his destruction.

9. इत्थं निशम्य देवानां वचांसि मधुसूदनः ।
चकार कोपं शम्भुश्च भ्रुकुटीकुटिलाननौ ॥

मधुसूदनः शंभुः च देवानां इत्थं वचांसि निशम्य भ्रुकुटी कुटिलाननौ कोपं चकार।

मधुसूदनः-Vishnu शंभुः च-also Siva देवानां-of the Devas इत्थं वचांसि-these words निशम्य-having heard कोपं चकार -became angry भ्रुकुटीकुटिलाननौ-faces became fierce with frowns

Having heard these words of the Devas Vishnu and Siva became angry, their eyebrows contracted and faces drawn.

10. ततोऽतिकोपपूर्णस्य चक्रिणो वदनात्ततः ।
निश्चक्राम महत्तेजो ब्रह्मणः शङ्करस्य च ॥

ततः अतिकोपपूर्णस्य चक्रिणः वदनात् महत् तेजः निश्चक्राम ततः ब्रह्मणः, शङ्करस्य च ।

ततः-then अतिकोपपूर्णस्य-full of anger चक्रिणः-of Vishnu वदनात्-from the face महत् तेजः-a great light निश्चक्राम-came out ततः-then ब्रह्मणः शंङ्करस्य च-from (the faces of) Brahma & Siva.

Vishnu got terribly angry and from his face came a great light. In the same way from the faces of Brahma & Siva.



11. अन्येषां चैव देवानां शक्रादीनां शरीरतः ।
निर्गतं सुमहत्तेजस्तच्चैक्यं समगच्छत ॥

शक्रादीनां अन्येषां देवानां शरीरतः च एव सुमहत् तेजः निर्गतम् । तत् च ऐक्यं समगच्छत ।

शक्रादीनां-from the body of Indra अन्येषां-and other देवनां च-Devas also सुमहत् तेजः-a great light, निर्गतम् च-issued forth तत् च-that also ऐक्यं समगच्छत-united together.

A great and powerful light issued forth from the bodies of Indra & other Devas and all these lights united into one.

12. अतीव तेजसः कूटं ज्वलन्तमिव पर्वतम् ।
ददृशुस्ते सुरास्तत्र ज्वालाव्याप्तदिगन्तरम् ॥

ते सुराः तत्र ज्वलन्तं पर्वतं इव ज्वालाव्याप्तदिगन्तरं अतीव तेजसः कूटं ददर्श ।

ते सुराः-those Devas तत्र-there ज्वलन्तं पर्वतं इव-like a blazing mountain ज्वालाव्याप्तदिगन्तरम्-flames spread over all places अतीव तेजसः कूटं-a mass of great light ददर्श-saw.

The Devas saw there a huge blazing light with flames spread over all space and which looked like a mountain in flames.

13. अतुलं तत्र तत्तेजः सर्वदेवशरीरजम् ।
एकस्थं तदभून्नारी व्याप्तलोकत्रयं त्विषा ॥

तत्र सर्वदेवशरीरजं त्विषा व्याप्तलोकत्रयं एकस्थं
अतुलं तत् तेजः नारी अभूत् ।

तत्र-there (then) सर्वदेवशरीरजम्-born from the bodies of all Gods एकस्थं-combined into one त्विषा-by its lustre व्याप्तलोकत्रयं-spread all over the three worlds तत् अतुलं तेजः-that unique brilliance नारी अभूत्-took the form of a female.

Then that brilliant light which came out of the bodies of Devas united into one mass spreading its lustre all over the three worlds and assumed a female form·

14· यदभूच्छाम्भवं तेजस्तेनाजायत तन्मुखम् ।
याम्येन चाभवन् केशा बाहवो विष्णुतेजसा ।।

यत् शांभवं तेजः अभूत् तेन तन्मुखं अजायत ।
याम्येन च केशाः अभवन् । विष्णुतेजसा बाहवः च ।।

यत् शाम्भवं तेजः-by the light which came from Siva तेन-by that तन्मुखम्-her face अजायत-formed याम्येन-from that of Yama केशाः-hair अभवन् became विष्णुतेजसा-by the light of Vishnu बाहवः च arms.

By the light which was, 'Siva's her face was formed, by Yama's her hair and Vishnu's her hands.



15. सौम्येन स्तनयोर्युग्मं मध्यं चैन्द्रेण चाभवत् ।
वारुणेन च जङ्घोरू नितम्बस्तेजसा भुवः ।।

सौम्येन स्तनयोः युग्मं, मध्यं च ऐन्द्रेण अभवत्, वारुणेन जङ्घोरू च, भुवः तेजसा नितम्बः च ।

सौम्येन (तेजसा)-by the light of the moon स्तनयोः युग्मं-pair of breasts ऐन्द्रेण-by the light of Indra मध्यं-the waist वारुणेन-by varuna's light जङ्घोरू च-her shanks and thighs भुवः तेजसा-from the earth's light नितम्बः च-hips.

By moon's light her two breasts, by Indra's her waist, by Varuna's light her shanks and thighs and from the earth's lustre her hips·

16. ब्रह्मणस्तेजसा पादौ तदङ्गुल्योऽर्कतेजसा ।
वसूनां च कराङ्गुल्यः कौबेरेण च नासिका ।।

ब्रह्मणः तेजसा पादौ, अर्कतेजसा तदङ्गुल्यः च, वसूनां तेजसा कराङ्गुल्यः च नासिका कौबेरेण च ।

ब्रह्मणः तेजसा-by the light of Brahma पादौ-her feet अर्कतेजसा-by the light of the sun तदङ्गुल्यः च-her toes वसूनां- by the light of Vasus कराङ्गुल्यः-fingers of hands नासिका-her nose कौबेरेण-by the light of Kubera

From the light of Brahma her two feet came, from the sun's light her toes came fingers

of hands came from Vasus' light and from Kubera's light her nose.

17. तस्यास्तु दन्ता: सम्भूता: प्राजापत्येन तेजसा ।
नयनत्रितयं जज्ञे तथा पावकतेजसा ॥

प्राजापत्येन तेजसा तु तस्या: दन्ता: संभूता:, तथा पावकतेजसा नयनत्रितयं जज्ञे ।

प्राजापत्येन तेजसा-by the light of prajapathi तस्या:-her दन्ता: -teeth संभूता: -were formed तथा-In the same way पावकतेजसा-from the light of Agni नयनत्रितयं-her three eyes. जज्ञे-came into being.

By Prajapti's light her teeth were formed and in the same way from the light of Agni her three eyes were formed.

18. भ्रुवौ च सन्ध्ययोस्तेज: श्रवणावनिलस्य च ।
अन्येषां चैव देवानां सम्भवस्तेजसां शिवा ॥

सन्ध्ययो: तेज: भ्रुवौ, अनिलस्य तेज: श्रवणौ च । अन्येषां च एव देवानां तेजसां शिवा अभवत् ।

सन्ध्ययो: तेज:-the light of the two sandhyas भ्रुवौ-(became) her eye brows अनिलस्य तेज:-by the light of Anila (wind) श्रवणौ-her two ears अन्येषां च एव देवानां तेजसां-from the light of other



Gods also संभव:-the birth शिवा अभवत्-the auspicious goddess evolved.

The light of the two sandhyas became her two-eye-brows, the light of Vayu become her two ears and from the light of the remaining Devas as well the auspicious Goddess came into being.

19. तत: समस्तदेवानां तेजोराशिसमुद्भवाम् ।
तां विलोक्य मुदं प्रापुरमरा महिषार्दिता: ॥

तत: समस्तदेवानां तेजोराशिसमुद्भवां तां विलोक्य महिषार्दिता: अमारा: मुदं प्रापु: ।

तत:-then समस्तदेवानां-of all the Devas तेजोराशिसमुद्भवां-born from the total light तां-her विलोक्य-having seen महिषार्दिता:-oppressed by Mahisha अमरा:-Devas मुदं प्रापु:-became happy.

Then when the Devas who were oppressed by Mahisha saw her born from the brilliant lights of all the Devas, they became very happy.

20. शूलं शूलाद्विनिष्कृष्य ददौ तस्यै पिनाकधृक् ।
चक्रं च दत्तवान् कृष्ण: समुत्पाट्य स्वचक्रत: ॥

पिनाकधृक् शूलाद्विनिष्कृष्य तस्मै शूलं ददौ । कृष्ण: स्वचक्रत: चक्रं समुत्पाट्य दत्तवान् च ।

पिनाकधृक्-Lord Siva शूलात्-from his trident विनिष्कृष्य-taking forth तस्यै-for her शूलं ददौ-gave a trident कृष्ण-Krishna स्वचक्रत:-from his own discus चक्रं समुत्पाट्य-drawing a discus दत्तवान्-gave.

Siva presented her with a trident taking it from his own Soola and Vishnu drawing a discus from his own, gave her a discus.

21. शङ्खं च वरुण: शक्तिं ददौ तस्यै हुताशन: ।
मारुतो दत्तवांश्चापं बाणपूर्णे तथेषुधी ॥

वरुण: तस्यै शङ्खं च ददौ । हुताशन: तस्यै शक्तिं ददौ । मारुत: चापं तथा बाणपूर्णे इषुधी दत्तवान् ।

वरुण: तस्यै शङ्खं ददौ-Varuna gave her a conch हुताशन:-fire God तस्यै-to her शक्तिं ददौ-gave a spear मारुत:-wind God चापं-a bow तथा-also बाणपूर्णे-full of arrows इषुधी-two quivers दत्तवान्-gave.

22. वज्रमिन्द्र: समुत्पाट्य कुलिशादमराधिप: ।
ददौ तस्यै सहस्राक्षो घण्टामैरावताद्गजात् ॥

अमराधिप: सहस्राक्ष: इन्द्र: कुलिशात् वज्रं समुत्पाट्य तस्यै ददौ । ऐरावतात् गजात् घण्टां ददौ ।

अमराधिप: -Lord of the Devas सहस्राक्ष: -thousand eyed इन्द्र:-Indra कुलिशात्-from thunder-bolt वज्रं समुत्पाट्य-bringing forth a thunderbolt



तस्यै ददौ-gave to her ऐरावतात्-from the elephant of Indra घण्टां ददौ-gave bell.

The thousand eyed Indra, the Lord of the Devas, bringing forth a thunder bolt from his own gave her and also a bell from his own elephant.

23. कालदण्डाद्यमो दण्डं पाशं चाम्बुपतिर्ददौ ।
प्रजापतिश्चाक्षमालां ददौ ब्रह्मा कमण्डलुम् ॥

यम: कालदण्डात् दण्डं, अम्बुपति: पाशं च ददौ । प्रजापति: अक्षमालां ब्रह्मा कमण्डलुं च ददौ ।

यम:-God of death कालदण्डात्-from his staff kaladanda दण्डं-staff अम्बुपति:-Varuna पाशं-a noose ददौ-gave प्रजापति: अक्षमालां-Prajapathi a string of Rudraksha ब्रह्मा कमण्डलुं च-Brahma a water pot ददौ-gave.

The Lord of death gave her a staff, taking one from his own, Varuna gave a noose, Prajapathi gave a string of beads Brahma a water pot.

24. समस्तरोमकूपेषु निजरश्मीन् दिवाकर: ।
कालश्च दत्तवान् खड्गं तस्याश्चर्म च निर्मलम् ॥

दिवाकर: समस्तरोमकूपेषु निजरश्मीन् ददौ । काल: खड्गं, निर्मलं चर्म च तस्या: दत्तवान् ।

दिवाकरः-sun god समस्तरोमकूपेषु-all the pores of the skin निजरश्मीन्-his rays ददौ-gave कालः-God of death खड्गं-a sword निर्मलं चर्म च-and a clean shield दत्तवान्-gave.

Sun God gave his rays to the pores of her skin and the God of death gave her a sword and clean shield.

25· क्षीरोदश्चामलं हारमजरे च तथाम्बरे ।
चूडामणिं तथा दिव्यं कुण्डले कटकानि च ॥

क्षीरोदः च अमलं हारं तथा अजरे अम्बरे च, तथा दिव्यं चूडामणिं, कुण्डले कटकानि च ।

26· अर्धचन्द्रं तथा शुभ्रं केयूरान् सर्वबाहुषु ।
नूपुरौ विमलौ तद्वद् ग्रैवेयकमनुत्तमम् ॥

तथा शुभ्रं अर्धचन्द्रं, सर्वबाहुषु केयूरान्, विमलौ नूपुरौ, तद्वद् अनुत्तमं ग्रैवेयकम् ।

27· अङ्गुलीयकरत्नानि समस्तास्वङ्गुलीषु च ।
विश्वकर्मा ददौ तस्यै परशुं चातिनिर्मलम् ॥

समस्तास्वङ्गुलीषु अङ्गुलीयकरत्नानि च ददौ । विश्वकर्मा च अतिनिर्मलं परशुं तस्यै ददौ ।

28· अस्त्राण्यनेकरूपाणि तथाऽभेद्यं च दंशनम् ।
अनेकरूपाणि अस्त्राणि तथा अभेद्यं दंशनं च ददौ ।



क्षीरोदः-the milk ocean अमलं हारं-pure necklace अजरे अम्बरे-a pair of spotless clean dresses दिव्यं चूडामणिं-a divine crest jewel कुण्डले-a pair of ear-rings कटकानि च-also bracelets तथा शुभ्रं अर्धचन्द्रं-a shining-half-moon सर्वबाहुषु-on all arms केयूरान्-bangles विमलौ नूपुरौ-shining anklets तद्वद्-similarly अनुत्तमं ग्रैवेयकं-unique necklace समस्तास्वङ्गुलीषु, अङ्गुलीयकरत्नानि-for all fingers precious rings विश्वकर्मा-the divine architect अतिनिर्मलं परशुं-spotless axe अनेकरूपाणि-of different shapes अस्त्राणि-arrows तथा अभेद्यं दंशनं-impenetrable armour च ददौ-gave.

The milk ocean gave her a pure necklace, a pair of spoltless clean dresses, a divine crest-jewel, a pair of ear rings and a pair of bracelets, a half moon ornament, bangles for her hands, shining anklets, a unique necklace, and precious rings for all her fingers. Again Viswakarma presented her with a shining axe, different types of arrows and an impenetrable armour.

28. अम्लानपङ्कजां मालां शिरस्युरसि चापराम् ॥
अददज्जलधिस्तस्यै पङ्कजं चातिशोभनम् ॥

जलधिः तस्यै अम्लानपङ्कजां मालां शिरसि अपराम् उरसि, अतिशोभनं पङ्कजम् च अददत् ।

जलधिः-the ocean तस्यै-for her अम्लानपङ्कजां मालां-a garland of unfading lotus शिरसि-for her

head अपरां-another उरसि-for her breast अतिशोभनम्-very beautiful पङ्कजं च-a lotus flower also अददत्-gave.

The ocean gave for her head an unfading garland of lotus flowers another for her breast and a very beautiful lotus flower for her hand.

29. हिमवान् वाहनं सिंहं रत्नानि विविधानि च ॥

हिमवान् सिंहं वाहनं, विविधानि रत्नानि च ददौ ।

हिमवान्-the mountain Himavan सिंहं वाहनम्-lion as carriage विविधानि-various types of रत्नानि-gems.

The mountain Himavan presented her with a lion to ride on and also several gems.

30. ददावशून्यं सुरया पानपात्रं धनाधिपः ।
शेषश्च सर्वनागेशो महामणिविभूषितम् ॥
नागहारं ददौ तस्यै धत्ते यः पृथिवीमिमाम् ।

धनाधिपः सुरया अशून्यं पानपात्रं ददौ ।

धनाधिपः-lord of wealth सुरया अशून्यं-ever full with wine पानपात्रं-drinking cup ददौ-gave.

The Lord of wealth Kubera gave her a bowl ever full with wine.

सर्वनागेशः शेषः यः इमां पृथिवीं धत्ते तस्यै महामणिविभूषितम् नागहारं ददौ च ।



सर्वनागेशः-the lord of all serpents शेषः-Sesha यः-who इमां पृथिवीं-this earth धत्ते-who supports तस्यै-for her महामणिविभूषितं नागहारं-a serpent necklace adorned with the best of jewels ददौ च-gave too.

The Lord of serpents Sesha who supports this earth gave her a serpent necklace studded with the best of jewels.

31. अन्यैरपि सुरैर्देवी भूषणैरायुधैस्तथा ।
32. सम्मानिता ननादोच्चैः साट्टहासं मुहुर्मुहुः ।

अन्यैः सुरैः अपि भूषणैः तथा आयुधैः सम्मानिता देवी साट्टहासं उच्चैः मुहुः ननाद ।

अन्यैः सुरैः अपि-by other Devas also भूषणैः-ornaments आयुधैः-weapons तथा सम्मानिता - thus presented with देवी Goddess साट्टहासं-with roar उच्चैः very loudly मुहुः मुहुः-again and again ननाद-made a big noise.

The Goddess who was presented with ornaments and jewels by other Devas also roared again and again with a terrible voice.

32. तस्या नादेन घोरेण कृत्स्नमापूरितं नभः ॥

तस्याः घोरेण नादेन कृत्स्नं नभः आपूरितम् ।

तस्या:-her घोरेण नादेन-by terrible voice कृत्स्नं नभ: -the whole sky आपूरितम्-was filled with.

The whole sky was filled with her terrible roaring sound.

33. अमायतातिमहता प्रतिशब्दो महानभूत् ।
चुक्षुभु: सकला लोका: समुद्राश्च चकम्पिरे ॥

अतिमहता अमायता महान् प्रतिशब्द: अभूत् । सकला: लोका: चुक्षुभु:, समुद्रा: चकम्पिरे च ।

अमायता-unending अतिमहता-very great महान्-great प्रतिशब्द: -echo अभूत्-occurred सकला: लोका:-all the worlds चुक्षुभु: - shook समुद्रा:-the oceans चकम्पिरे च-trembled-

By her unending and great roar occurred a great echo. All the worlds shook and all the oceans also trembled

34. चचाल वसुधा चेलु: सकलाश्च महीधरा: ।
जयेति देवाश्च मुदा तामूचु: सिंहवाहिनीम् ॥

वसुधा चचाल । सकला: महीधरा: च चेलु: । देवा: मुदा जय इति तां सिंहवाहिनीं ऊचु: च ।

वसुधा-the earth चचाल-shook सकला: महीधरा: च-all the mountains चेलु:-shook देवा:-the Gods



मुदा-with joy जय इति-victory तां सिंहवाहिनीम्-to her who rode on a lion ऊचु: च-said.

The earth shook with tremor and all the mountains rocked and the Devas shouted with joy victory to the Devi riding on a lion.

35. तुष्टुवुर्मुनयश्चैनां भक्तिनम्रात्ममूर्तय: ।

मुनय: च भक्तिनम्रात्ममूर्तय: एनां तुष्टुवु: ।

मुनय: च - the sages भक्तिनम्रात्ममूर्तय: - who bowing low with devotion एनां-this Devi तुष्टुवु:-extolled.

35. दृष्ट्वा समस्तं संक्षुब्धं त्रैलोक्यममरारय: ।
36. सन्नद्धाखिलसैन्यास्ते समुत्तस्थुरुदायुधा: ।

अमरारय: समस्तं त्रैलोक्यं संक्षुब्धं दृष्ट्वा ते सन्नद्धाखिलसैन्या: उदायुधा: समुत्तस्थु: ।

अमरारय:-the enemies of Devas समस्तं त्रैलोक्यं-all the three worlds संक्षुब्धं-agitated दृष्ट्वा-having seen ते-they सन्नद्धाखिलसैन्या:-with all armies mobilised उदायुधा: - with uplifted weapons समुत्तस्थु: -rose up.

Seeing all the three worlds agitated the Asuras mobilised their armies and rose up in arms with raised weapons.

36· आः किमेतदिति क्रोधादाभाष्य महिषासुरः ॥
37. अभ्यधावत तं शब्दमशेषैरसुरैर्वृतः ।

महिषासुरः "आः एतत् किं" इति क्रोधात् आभाष्य अशेषैः असुरैः वृतः तं शब्दं अभ्यधावत ।

महिषासुरः-Mahishasura आः एतत् किं ? – ha, what is this? क्रोधात् आभाष्य-roaring with anger अशेषैः असुरैः-by all Asuras वृतः-surrounded तं शब्दं-that sound अभ्यधावत-rushed towards.

(When he heard this roaring sound) Mahishasura exclaimed in anger 'Ah what is this'? and surrounded by all the Asuras rushed towards that sound.

37· स ददर्श ततो देवीं व्याप्तलोकत्रयां त्विषा ।
पादाक्रान्त्या नतभुवं किरीटोल्लिखिताम्बराम् ।
क्षोभिताशेषपातालां धनुर्ज्यानिःस्वनेन ताम् ।
39. दिशो भुजसहस्रेण समन्ताद्व्याप्य संस्थिताम् ।

सः ततः त्विषा व्याप्तलोकत्रयां पादाक्रान्त्या नतभुवं, किरीटोल्लिखिताम्बरां, धनुर्ज्यानिःस्वनेन क्षोभिताशेषपातालाम् भुजसहस्रेण दिशः समन्तात् व्याप्य संस्थितां देवीं ददर्श ।

सः – he ततः – then त्विषा – by brilliance व्याप्तलोकत्रयां – pervading all the three worlds पादाक्रान्त्या-नतभुवं – the earth bent with her foot steps किरीटोल्लिखिताम्बरां – scraping the sky with her crown क्षोभिताशेषपातालां-shaking the under world धनुर्ज्यानिःस्वनेन with the twang of her bow भुजसहस्रेण-with her thousand arms दिशः समन्तात् व्याप्य-pervading all the world all round संस्थिताम्-standing there देवीं ददर्श-saw, Devi



**Then he saw the Devi thus. By her brilliance she was pervading the three worlds, making the earth yield under the heaviness of her foot steps, at the same time reaching the sky with the tip of her diadem shaking the nether worlds with the twang of her bow string. She stood there with her thousand arms stretched out reaching all the quarters.**

39· ततः प्रववृते युद्धं तया देव्या सुरद्विषाम् ।
शस्त्रास्त्रैर्बहुधा मुक्तैरादीपितदिगन्तरम् ॥

ततः सुरद्विषां तया देव्या सह बहुधा मुक्तैः शस्त्रास्त्रैः आदीपितं दिगन्तरम् युद्धं प्रववृते ।

ततः-then सुरद्विषां-of the Asuras तया देव्या सह-with that Devi बहुधा मुक्तैः – hurled in different ways शस्त्रास्त्रैः-weapons and arms आदीपितदिगन्तरं-Illumining all the quarters युद्धं-battle प्रववृते - took place

**Then began a battle between the Asuras and Devi. Weapons were hurled in different ways which illumined the quarters.**

40· महिषासुरसेनानीश्चिक्षुराख्यो महासुरः ।
41· युयुधे चामरश्चान्यैश्चतुरङ्गबलान्वितः ॥

महिषासुरसेनानीः चिक्षुराख्यः महासुरः अन्यः चतुरङ्ग बलान्वितः चामरः च युयुधे ।

महिषासुरसेनानीः-general of Mahishasura's army चिक्षुराख्यः-a great asura Chikshura by name अन्यः चामरः च-another one named Chamara also चतुरङ्गबलान्वित :-accompanied by forces comprising all four items of army युयुधे-fought

The commander of Mahishasura's army a great asura called Chikshura and another asura Chamara who was accompauied by a full army of four items fought·

41· रथानामयुतैः षड्भिरुदग्राख्यो महासुरः ।
42· अयुध्यतायुतानां च सहस्रेण महाहनुः ॥

उदग्राख्यः महासुरः रथानां षड्भिः अयुतैः अयुध्यत । महाहनुः च रथानां अयुतानां सहस्रेण अयुध्यत ।

उदग्राख्यः महासुरः-a great asura by name Udagra रथानां-of chariots षड्भिः अयुतैः-sixty thousand अयुध्यत-fought महाहनुः च-the asura Mahahanu रथानां अयुतानां सहस्रेण-with one million chariots अयुध्यत-fought

A great asura Udagra fought with sixty thousand chariots while Mahahanu· fought with a million chariots·



43· पञ्चाशद्भिश्च नियुतैरसिलोमा महासुरः ।
अयुतानां शतैः षड्भिर्बाष्कलो युयुधे रणे ॥

महासुरः असिलोमा च पञ्चाशद्भिः नियुतैः रणे युयुधे । बाष्कलः अयुतानां षड्भिः शतैः (युयुधे)

महासुरः असिलोमा-the great Asura Asiloma पञ्चाशद्भिः नियुतैः-fifty lakhs रणे-in battle युयुधे-fought बाष्कलः-Baskala (fought) अयुतानां षड्भिः शतैः च-sixty lakhs

The great Asura Asiloma fought with fifty lakhs of chariots and Bashkala fought with sixty lakhs of chariots·

43· गजवाजिसहस्रौघैरनेकैः परिवारितः ।
44· वृतो रथानां कोट्या च युद्धे तस्मिन्नयुध्यत ।

परिवारितः अनेकैः गजवाजिसहस्रौघैः रथानां कोट्या च वृतः तस्मिन् युद्धे अयुध्यत ।

परिवारितः-asura Parivarita अनेकैः गजवाजि-सहस्रौघैः-by several thousands of elephants and horses रथानां कोट्या च वृतः-by a crore of chariots वृतः-surrounded तस्मिन् युद्धे अयुध्यत-fought in that battle

An asura named Parivarita fought in the battle surrounded by several thousands of elephants and horses and a crore of chariots·

45· बिडालाख्योऽयुतानां च पञ्चाशद्भिरथायुतैः ।
युयुधे संयुगे तत्र रथानां परिवारितः ॥

अथ बिडालाख्यः महादैत्यः रथानां पञ्चाशद्भिः अयुतैः परिवारितः तत्र संयुगे युयुधे ।

अथ–then बिडालाख्यः महादैत्यः–the great demon Bidala रथानां–of chariots अयुतानां पञ्चाशद्भिः अयुतैः सह–by fifty thousand lakhs परिवारितः–surrounded तत्र संयुगे–in that battle युयुधे–fought

A great asura by the name Bidala surrounded by fifty thousand lakhs of chariots fought in the battle.

45. अन्ये च तत्रायुतशो रथनागहयैर्वृताः ।
युयुधुः संयुगे देव्या सह तत्र महासुराः ॥

तत्र अन्ये च महासुराः अयुतशः रथनागहयैर्वृताः देव्या सह तत्र संयुगे युयुधुः ।

तत्र–there अन्ये च महासुराः–many other great Asuras अयुतशः–tens of thousands रथनागहयैः–chariots, elephants and horses वृतः–accompanied by तत्र देव्या सह संयुगे–in that battle with Devi युयुधुः–fought

Many other Asuras along with tens of thousands of chariots, elephants and horses fought with Devi in that battle.



46· कोटिकोटिसहस्रैस्तु रथानां दन्तिनां तथा ।
हयानां च वृतो युद्धे तत्राभून्महिषासुरः ॥

47· तोमरैर्भिन्दिपालैश्च शक्तिभिर्मुसलैस्तथा ।
युयुधुः संयुगे देव्या खड्गैः परशुपट्टिशैः ॥

तत्र युद्धे महिषासुरः रथानां दन्तिनां तथा हयानां च कोटि कोटिसहस्रैः वृतः अभूत् । तोमरैः भिन्दिपालैः च शक्तिभिः मुसलैः अपि खड्गैः परशुपाट्टिशैः च संयुगे देव्या सह युयुधुः ।

तत्र युद्धे–In that battle महिषासुरः–Mahishasura रथानां–chariots दन्तिनां–elephants कोटिकोटि सहस्रैः–रथानां, दन्तिनां, हयानां–thousands of crores and crores of chariots, elephants and horses तोमरैः–iron maces भिण्डिपालैः–javelins शक्तीभिः–spears मुसलैः–clubs खड्गैः–swords परशुपट्टिशैः–axes halberds देव्या सह–with Devi युयुधुः fought.

Mahishasura was accompained by thousands of crores and crores of chariots, elephants and horses and they fought with Devi with iron mace, spears, clubs javelins, swords and axes etc.

48. केचिच्च चिक्षिपुः शक्तीः केचित् पाशांस्तथापरे ।
देवीं खड्गप्रहारैस्तु ते तां हन्तुं प्रचक्रमुः ॥

केचित् शक्तीः चिक्षिपुः । तथा केचित् अपरे पाशान् (चिक्षिपुः) । ते तु खड्गप्रहारैः तां देवीं हन्तुं प्रचक्रमुः ।

केचित्-some शक्तीः चिक्षिपुः - threw spears केचित् अपरे पाशान्-some others threw nooses ते-they तां देवीं-that Devi खड्गप्रहारैः-striking with swords हन्तुं-to kill प्रचक्रमुः -tried.

Some threw spears, some others (threw) nooses. They attempted to kill that Devi by striking her with swords.

49· सापि देवी ततस्तानि शस्त्राण्यस्त्राणि चण्डिका ।
लीलयैव प्रचिच्छेद निजशस्त्रास्त्रवर्षिणी ॥

सा देवी चण्डिका अपि निजशस्त्रास्त्रवर्षिणी ततः तानि शस्त्राणि अस्त्राणि च लीलया एव प्रचिच्छेद ।

सा देवी चण्डिका-that Chandika Devi अपि-also निजशस्त्रास्त्रवर्षिणी-using her own weapons and missiles तानि शस्त्राणि अस्त्राणि च-their arms and missiles लीलया एव - sportively indeed प्रचिच्छेद-cut into pieces.

That Chandika Devi showering her own weapons and missiles cut into pieces the arms and missiles showered by the Asuras.

50· अनायस्तानना देवी स्तूयमाना सुरर्षिभिः ।
मुमोचासुरदेहेषु शस्त्राण्यस्त्राणि चेश्वरी ॥

अनायस्तानना देवी सुरर्षिभिः स्तूयमाना च ईश्वरी असुरदेहेषु शस्त्राणि अस्त्राणि च मुमोच ।



अनायस्तानना-with unstrained face सा देवी-that Devi सुरर्षिभिः स्तूयमाना च-extolled by Devas and sages ईश्वरी-Goddess असुरदेहेषु-on the bodies of Asuras शस्त्राणि अस्त्राणि च-arms and missiles मुमुचे-showered.

Without any sign of any strain on her face, Devas and sages extolling, the Goddess showered arms and missiles on the bodies of Asuras.

51· सोऽपि क्रुद्धो धुतसटो देव्या वाहनकेसरी ।
चचारासुरसैन्येषु वनेष्विव हुताशनः ॥

देव्याः वाहनकेसरी सः अपि क्रुद्धः धुतसटः वनेषु हुताशनः इव असुरसैन्येषु चचार ।

सः-he देव्याः-that Devi's वाहनकेसरी-carriage lion अपि-also क्रुद्धः धुतसटः-angry and shaking mane वनेषु-in the forests हुताशनः इव-like forest fire असुरसैन्येषु-amongst the army of Asuras चचार-strode about.

The lion which carried Devi also got enraged and shaking its mane strode amidst the army of Asuras like a forest fire.

52· निःश्वासान् मुमुचे यांश्च युध्यमाना रणेऽम्बिका ।
त एव सद्यस्सम्भूता गणाः शतसहस्रशः ॥

रणे युध्यमाना अम्बिका यान् निश्वासान् तु मुमुचे ते एव सद्यः शतसहस्रशः गणाः संभूताः ।

रणे-in the battle युध्यमाना अम्बिका-Ambika fighting यान् निःश्वासान्-how many deep breaths मुमुचे-sent out ते एव-they themselves सद्यः-then itself शतसहस्रशः गणाः-hundreds of thousands of fighting men संभूताः-became.

Fighting in the battle Goddess Ambika sent out many heaves and they turned to be hundreds of thousands of bhutaganas (soldiers).

53. युयुधुस्ते परशुभिर्भिन्दिपालासिपट्टिशैः ।

54. नाशयन्तोऽसुरगणान् देवीशक्त्युपबृंहिताः ।

ते परशुभिः भिन्दिपालासिपट्टिशैः देवीशक्त्युपबृंहिताः असुरगणान् नाशयन्तः युयुधुः ।

ते-they परशुभिः-with axes भिन्दिपालासिपट्टिशैः-javelins, swords, spears etc. देवीशक्त्युपबृंहिताः-strengthened by the power of Devi असुरगणान्-the hosts of Asuras नाशयन्तः-destroying युयुधुः-fought.

They derived their strength from the Devi and thus strengthened they fought with axes, javelins, swords, spears etc. killing the hosts of Asuras.



54. अवादयन्त पटहान् गणाः शङ्खांस्तथापरे ।।

55. मृदङ्गांश्च तथैवान्ये तस्मिन्युद्धमहोत्सवे ।

तत्र केचित् पटहान् अवादयन्त तथा अपरे शङ्खान् च । तथा एव अन्ये च मृदंगान् च तस्मिन् युद्धमहोत्सवे अवादयन्त ।

तत्र-In the battle केचित्-some पटहान्-drums अवादयन्त-beat तथा अपरे - some others शङ्खान् - conches अवादयन्त-blew तथा एव-similarly अन्ये च-others also मृदंगान् च-tabalas तस्मिन् युद्धमहोत्सवे - in the festival of battle अवादयन्त-beat.

In that martial festival some beat drums, some blew conches and others played on tabors The battle was a festival of joy for the Bhoothaganas of Devi.

55. ततो देवी त्रिशूलेन गदया शक्तिवृष्टिभिः ।

56. खड्गादिभिश्च शतशो निजघान महासुरान् ।
पातयामास चैवान्यान् घण्टास्वनविमोहितान् ।।

ततः देवी त्रिशूलेन, गदया शक्तिवृष्टिभिः खड्गादिभिः च महासुरान् शतशः निजघान । अन्यान् घण्टास्वनविमोहितान् पातयामास च ।

ततः-then देवी-the Devi त्रिशूलेन-with the trident गदया-club शक्तिवृष्टिभिः च - showers of spears खड्गादिभिः च-by swords etc. महासुरान्-great Asuras शतशः - hundreds निजघान - killed

अन्यान्-others घण्टास्वनविमोहितान् -stupefied by the noise of her bell पातयामास च-brought to the ground.

Then the Devi killed hundreds of great Asuras, some by trident, some with her club, some by showering arrows and some by swords and other weapons. Some she brought to the ground by the sound of her bells which stupefied them.

57. असुरान् भुवि पाशेन बद्ध्वा चान्यानकर्षयत् ।
केचित् द्विधाकृतास्तीक्ष्णैः खड्गपातैस्तथापरे ॥

58. विपोथिता निपातेन गदया भुवि शेरते ।

अन्यान् असुरान् पाशेन बध्वा भुवि अकर्षयत् च तीक्ष्णैः खड्गपातैः केचित् द्विधाकृताः तथा अपरे गदया निपातेन विपोथिताः भुवि शेरते ।

अन्यान् असुरान्-other Asuras पाशेन-with noose बध्वा-binding भुवि-on the ground अकर्षयत् च -dragged तीक्ष्णैः-sharp खड्गपातैः-clashes of the sword केचित्-some द्विधाकृताः-were split into two तथा अपरे-and still others गदया निपातेन-blow from the club विपोथिताः afflicted भुवि-on the ground शेरते-lay down.

She bound others with her noose and dragged through the ground. Some were split into two by the blows with her sword and some



others lay on the ground afflicted by the blows of her club.

58. वेमुश्च केचिद्रुधिरं मुसलेन भृशं हताः ॥

मुसलेन भृशं हताः केचित् रुधिरं वेमुः च ।

मुसलेन-by the iron club भृशं हताः-severely hammered केचित्-some रुधिरं-blood वेमुः च-vomitted also.

Some struck severely with her iron club vomitted blood.

59: 60. केचिन्निपतिता भूमौ भिन्नाः शूलेन वक्षसि ।
निरन्तराः शरौघेण कृताः केचिद्रणाजिरे ॥
शल्यानुकारिणः प्राणान्मुमुचुस्त्रिदशार्दनाः ।

केचित्-some वक्षसि-on the chest शूलेन भिन्नाः-pierced by trident भूमौ निपतिताः-fell on the ground केचित्-some others रणाजिरे-on the battle field निरन्तराः-continuous, with no vacant space शरौघेण - pierced with arrows कृताः - wounded त्रिदशार्दनाः - demons शल्यानुकारिणः resembling porcupines प्राणान् मुमुचुः-gave up their lives.

Pierced on the chest by her trident some fell down, some wounded by arrows all over their bodies and looking like porcupines fell on the battle field and gave up their lives.

60. केषाञ्चिद्बाहवश्छिन्नाश्छिन्नग्रीवास्तथापरे ।

केषांचित् बाहवः छिन्नाः तथा अपरे छिन्नग्रीवाः ।

केषांचित्-of some बाहवः-hands छिन्नाः-cut off तथा अपरे-and others छिन्नग्रीवाः-their necks were cut.

Hands of some Asuras were cut-off and the necks of others were separated from bodies.

61. शिरांसि पेतुरन्येषामन्ये मध्ये विदारिताः ।
विच्छिन्नजङ्घास्त्वपरे पेतुरुर्व्यां महासुराः ॥

अन्येषां शिरांसि पेतुः, अन्ये मध्ये विदारिताः विच्छिन्न जंघाः, अपरे महासुराः उर्व्यां पेतुः ।

अन्येषां – of some शिरांसि-heads पेतुः-rolled अन्ये-others मध्ये-In the middle विदारिताः-torn asunder विछिन्नजंघाः-with shanks cut off अपरे महासुराः तु some great Asuras उर्व्यां on the earth पेतुः rolled.

Heads of some Asuras rolled - down. Some were torn asunder in the middle. Some with shanks cut off rolled on the ground.

62. एकबाह्वक्षिचरणा केचिद्देव्या द्विधाकृताः ।
छिन्नेऽपि चान्ये शिरसि पतिताः पुनरुत्थिताः ॥

केचित् देव्या द्विधाकृताः एकबाह्वाक्षिचरणाः अन्ये शिरसि छिन्ने पतिताः अपि पुनः उत्थिताः ।



केचित्-some देव्या-by Devi द्विधाकृताः-cut into two एकबाह्वक्षिचरणाः-with one arm, one eye and one leg अन्ये – some others शिरसि – heads छिन्ने पतिताः – cut and fell down अपि-still पुनः-again उत्थिताः-rose up.

Some were cut into two by Devi and they were left with one arm, one eye one leg. Still others, though their heads were cut off and fell down rose up again.

63. कबन्धा युयुधुर्देव्या गृहीतपरमायुधाः ।
ननृतुश्चापरे तत्र युद्धे तूर्यलयाश्रिताः ॥

कबन्धाः गृहीतपरमायुधाः देव्या युयुधुः अपरे तत्र युद्धे तूर्यलयाश्रिताः ननृतुः ।

कबन्धाः - trunks without heads गृहीतपरमायुधाः-wielding the best weapons देव्या युयुधुः-fought with Devi अपरे-some others तत्र युद्धे-In the battle तूर्यलयाश्रिताः - to the rhythm of instruments ननृतुः -danced.

Some of these headless trunks with best weapons in their hands fought with Devi while other trunks danced according to the rhythm of war drums & other instruments.

64. कबन्धाश्छिन्नशिरसः खड्गशक्त्यृष्टिपाणयः ।
तिष्ठ तिष्ठेति भाषन्तो देवीमन्ये महासुराः ॥

छिन्नशिरसः कबन्धाः खड्गशक्त्यृष्टिपाणयः अन्ये महासुराः तिष्ठ तिष्ठ इति देवीं भाषन्तः रणे युयुधिरे ।

छिन्नशिरसः कबन्धाः – headless trunks खड्गशक्त्यृष्टिपाणयः–with swords, spears and lances in their hands अन्ये महासुराः – some other great Asuras तिष्ठ तिष्ठ इति – stop, stop देवीं–to Devi भाषन्तः –speaking रणे युयुधिरे–fought in the battle.

The trunks of great Asuras with their swords, spears and lances in their hands fought shouting to the Devi, stop, stop.

65. पातितै रथनागाश्वैरसुरैश्च वसुन्धरा ।
अगम्या साभवत्तत्र यत्राभूत् स महारणः ॥

सः महारणः यत्र अभूत् सा वसुन्धरा तत्र पातितैः रथनागाश्वैः असुरैः च अगम्या अभवत् ।

सः महारणः –that great battle यत्र अभूत्–where took place सा वसुन्धरा तत्र–that part of the earth पातितैः–brought to the ground रथनागाश्वैः–chariots elephants and horses असुरैः च–and Asuras अगम्या अभवत्–became impossible to walk through.

Where the great battle was fought, that part of the earth became impassable because of the heaps of chariots, elephants, horses & Asuras who were felled down by Devi.



66. शोणितौघा महानद्यस्सद्यस्तत्र विसुस्रुवुः ।
मध्ये चासुरसैन्यस्य वारणासुरवाजिनाम् ॥

तत्र असुरसैन्यस्य मध्ये वारणासुरवाजिनां शोणितौघा महानद्यः सद्यः विसुस्रुवुः च ।

तत्र असुरसैन्यस्य मध्ये–there in the middle of the army of Asuras वारणासुरवाजिनां–of elephants, Asuras horses शोणितौघाः – collection of blood महानद्यः–great rivers सद्यः–at once विसुस्रुवुः च –flowed.

The profuse blood that flowed from the elephants, horses and Asuras amidst the army of Asuras began to flow like great rivers.

67. क्षणेन तन्महासैन्यमसुराणां तथाम्बिका ।
निन्ये क्षयं यथा वह्निस्तृणदारुमहाचयम् ॥

क्षणेन अम्बिका यथा वह्निः तृणदारुमहाचयम् तथा असुराणां तत् बलं सर्वं क्षणेन क्षयं निन्ये ।

क्षणेन–soon अम्बिका - the Devi यथा–In which way वह्निः–fire तृणदारुमहाचयम्–a heap of straw and wood तथा–In the same way असुराणां–of the Asuras तत् बलं–that army सर्वं–the whole क्षणेन–In seconds क्षयं निन्ये–destroyed.

Just as fire consumes a heap of straw, wood etc-in no time so also the Devi destroyed the army of Asuras in no time.

68· स च सिंहो महानादमुत्सृजन् धुतकेसरः ।
शरीरेभ्योऽमरारीणामसूनिव विचिन्वति ॥

सः सिंहः च धुतकेसरः अमरारीणां शरीरेभ्यः असून् विचिन्वति इव उत्सृजन् ।

सः-that सिंहः च-lion also महानादं-great roar उत्सृजन् sending forth धुतकेसरः-with tossing mane अमरारीणां-of Asuras शरीरेभ्यः-from the bodies असून्-life breaths विचिन्वति इव- as if searching for.

The Lion which was carrying Devi roaring with a thundering sound searched the bodies of the Asuras with its mane quivering as if it was searching for any life left.

69. देव्या गणैश्च तैस्तत्र कृतं युद्धं तथासुरैः ।
यथैषां तुष्टुवुर्देवाः पुष्पवृष्टिमुचो दिवि ॥

देव्याः गणैः च तत्र तैः महासुरैः युद्धं कृतं यथा पुष्पवृष्टिमुचः दिवि एषां तुष्टुवुः ।

देव्याः गणैः च-the guards of Devi तत्र-there तैः महासुरैः-with Asuras युद्धं कृतं-fought यथा देवाः-the Devas पुष्पवृष्टिमुचः-showering flowers दिवि-In heaven एषां-her तुष्टुवुः-extolled.

In that battle the soldiers of Devi fought with the great Asuras in such a way that the Devas in Heaven showering flowers, extolled her.

---

# अथ तृतीयोऽध्यायः

1. ॐ ऋषिरुवाच ।

ऋषिः उवाच-the sage said.

2· निहन्यमानं तत्सैन्यमवलोक्य महासुरः ।
सेनानीश्चिक्षुरः कोपाद्ययौ योद्धुमथाम्बिकाम् ।

सेनानीः चिक्षुरः महासुरः तत् सैन्यं निहन्यमानं अवलोक्य अथ कोपात् अम्बिकां योद्धुं ययौ ।

सेनानीः -leader of the army चिक्षुरः -by name Chikshura महासुरः -a great Asura तत् सैन्यं-that army निहन्यमानं-being slain अवलोक्य-having seen अथ-then कोपात्-with anger अम्बिकां-with Ambika योद्धुं-to fight with ययौ-went.

Chikshura, the commander of the army and also a great Asura seeing his soldiers being slaughtered, became very angry and started to fight with Ambika.

3· स देवीं शरवर्षेण ववर्ष समरेऽसुरः ।
यथा मेरुगिरेः शृङ्गं तोयवर्षेण तोयदः ॥

यथा तोयदः तोयवर्षेण मेरुगिरेः शृङ्गं तथा सः असुरः समरे शरवर्षेण देवीं ववर्ष ।

यथा – just as तोयद:-cloud तोयवर्षेण – with showers of rain मेरुगिरे: – of the mount Meru शृंङ्ग-peak तथा-the same way स असुर:-that Asura समरे-in the battle शरवर्षेण-by showering arrows देवीं-On Devi ववर्ष-showered.

Just as the clouds showered on the mountain peak of Meru with rains, the same way that Asura showered arrows on the Devi in that battle.

4. तस्य छित्वा ततो देवी लीलयैव शरोत्करान् ।
जघान तुरगान्बाणैर्यन्तारं चैव वाजिनाम् ।।

ततः देवी लीलया एव तस्य शरोत्करान् छित्वा बाणै तुरगान् जघान वाजिनां यन्तारं एव च ।

ततः afterwards देवी-Devi लीलया एव-sportingly indeed तस्य शरोत्करान्-his clusters of arrows छित्वा-breaking बाणै:-with arrows तुरगान्-horses जघान-killed वाजिनां यन्तारं- the horseman एव च-also.

Then Devi cut asunder playfully the numerous arrows of the Asuras and, with her arrows killed the horses of the Asuras army and also the horsemen.

5. चिच्छेद च धनु: सद्यो ध्वजं चातिसमुच्छ्रतम् ।
विव्याध चैव गात्रेषु छिन्नधन्वानमाशुगै: ।।



देवी तस्य धनु: सद्य: चिच्छेद च । अतिसमुद्रमुच्छ्रतं ध्वजं च । छिन्नधन्वानं एवं गात्रेषु आशुगै: विव्याध च ।

देवी-Devi तस्य धनु: -his bow सद्य: -at once चिच्छेद च-broke अतिसमुच्छ्रतं-very high ध्वजं च-banner also छिन्नधन्वानम्-one whose bow has been broken च एव also गात्रेषु-on the body आशुगै:-by arrows विव्याध च - wounded.

She broke his bow and cut his banner which was very high and wounded his body with arrows when his bow had been broken.

6. स छिन्नधन्वा विरथो हताश्वो हतसारथि: ।
अभ्यधावत तां देवीं खड्गचर्मधरोऽसुर: ।।

छिन्नधन्वा विरथ: हताश्व: हतसारथि: खड्गचर्मधर: स: असुर: तां देवीं अभ्यधावत ।

छिन्नधन्वा-his bow broken विरथ: -chariot gone हताश्व: -horses killed हतसारथि: -charioteer killed स:-he खड्गचर्मधर:-wielding sword and shield असुर:-Asura तां देवीं-that Devi अभ्यधावत-rushed at.

During the battle his bow was broken to pieces, his chariot gone into pieces, horses slain and charioteer also killed. Still the Asura wielding sword and shield rushed towards the Devi.

7· सिंहमाहत्य खड्गेन तीक्ष्णधारेण मूर्धनि ।
आजघान भुजे सव्ये देवीमप्यतिवेगवान् ॥

अतिवेगवान् सः तीक्ष्ण धारेण खड्गेन सिंहं मूर्धनि आहत्य देवीं अपि सव्ये भुजे आजघान ।

अतिवेगवान्–with great speed सः –he तीक्ष्ण धारेण-sharp edged खड्गेन-with sword सिंहं–lion मूर्धनि–on the head आहत्य-smote देवीं अपि - Devi also सव्ये भुजे–on left hand आजघान–struck.

With a sharp edged sword he with great speed smote the lion on the head and struck Devi also on her left hand.

8· तस्याः खड्गो भुजं प्राप्य पफाल नृपनन्दन ।
ततो जग्राह शूलं स कोपादरुणलोचनः ॥

नृपनन्दन तस्यः खड्गः भुजं प्राप्य पफाल । ततः सः कोपात् अरुणलोचनः शूलं जग्राह ।

नृपनन्दन–oh king तस्याः भुजं प्राप्य–touching her hand खड्गः–the sword पफाल–broke into pieces ततः सः–then he कोपात्-with anger अरुणलोचनः–his eyes red शूलं–spear जग्राह took.

Oh, prince! the sword when it touched Devi's hand broke into pieces. He became very angry and his eyes became red. He took a spear in his hand.



9· चिक्षेप च ततस्तत्तु भद्रकाल्यां महासुरः ।
जाज्वल्यमानं तेजोभी रविबिम्बमिवाम्बरात् ॥

ततः महासुरः भद्रकाल्यां तेजोभिः जाज्वल्यमानं रविबिंबं अबरात् इव तत् (शूलम्) चिक्षेप च ।

ततः–then महासुरः–the great Asura भद्रकाल्यां–on Bhadrakali तेजोभिः–with brilliance जाज्वल्यमानं–blazing रविबिम्बं अंबरात् इव–sun from the sky तत् (शूलम्) – that spear चिक्षेप च–threw at.

Then the great Asura hurled at Bhadrakali that trident which blazing with lustre looked as if it were the sun coming from the sky.

10· दृष्ट्वा तदापतच्छूलं देवी शूलममुञ्चत ।
तच्छूलं शतधा तेन नीतं स च महासुरः ॥

देवी– Devi आपतत् तत् शूलं - that trident coming दृष्ट्वा - seeing शूलं–spear अमुञ्चत-set out तेन–with that तत् शूलं–the spear शतधा नीतं–was broken into hundreds सः महासुरः च–the Asura also.

When Devi saw that trident coming towards her, she sent out her trident which smashed the other into pieces and also the Asura to pieces.

11· हते तस्मिन् महावीर्ये महिषस्य चमूपतौ ।
आजगाम गजारूढश्चामरस्त्रिदशार्दनः ॥

महिषस्य-Mahishasura's तस्मिन् महावीर्ये-that very brave चमूपतौ-army chief हते-when slain त्रिदशार्दनः-oppressor of the Devas चामरः-Chamara गजारूढः-mounted on an elephant आजगाम-came to fight.

When that valiant commander of the Asuras was killed in the battle, another oppressor of the Devas, Chamara by name, appeared on the battle field, mounting an elephant.

12. सोऽपि शक्तिं मुमोचाथ देव्यास्तामम्बिका द्रुतम् ।
हुङ्काराभिहतां भूमौ पातयामास निष्प्रभाम् ॥

अथ सः अपि देव्याः शक्तिं मुमोच । अम्बिका द्रुतं तां शक्तिं हुङ्काराभिहतां निष्प्रभां भूमौ पातयामास ।

अथ-then सः अपि-he also देव्याः (वधाय)-killing of Devi शक्तिं-a spear मुमोच-released अम्बिका-Ambika द्रुतं-immediately तां शक्तिं-that spear हुंकाराभिहतां-with a whoop निष्प्रभां-powerless भूमौ-on the earth पातयामास-threw it down.

Then the Asura hurled a spear to kill Devi. And Ambika at once released a whoop by the force of which the spear became powerless and fell to the ground.

13. भग्नां शक्तिं निपतितां दृष्ट्वा क्रोधसमन्वितः ।
चिक्षेप चामरः शूलं बाणैस्तदपि साच्छिनत् ॥



चामरः तां शक्तिं भग्नां निपातितां दृष्ट्वा क्रोधसमन्वितः शूलं चिक्षेप । सा तदपि बाणैः अच्छिनत् ।

चामरः-Chamara तां शक्तिं-that spear भग्नां निपातितां-broken and fallen दृष्ट्वा-having seen क्रोधसमन्वितः-with great anger शूलं-trident चिक्षेप-sent सा-Devi तदपि-that also बाणैः-with arrows अच्छिनत्-broke to pieces.

Chamara seeing the spear broken and fallen on the ground became furious and sent a trident at her. She broke that too into pieces with her arrow.

14. ततः सिंहः समुत्पत्य गजकुम्भान्तरस्थितः ।
बाहुयुद्धेन युयुधे तेनोच्चैस्त्रिदशारिणा ॥

ततः सिंहः समुत्पत्य गजकुम्भान्तरस्थितः तेन उच्चैः त्रिदशारिणा बाहुयुद्धेन युयुधे ।

ततः-then सिंहः-the lion समुत्पत्य-jumped upwards गजकुंभान्तरस्थितः - sat on the centre of elephant's forehead तेन-with him त्रिदशारिणा-with the foe of the Devas उच्चैः-very fiercely बाहुयुद्धेन-fighting with hand युयुधे-fought.

Then the lion bounced and with one leap sat on the forehead of the elephant and sitting there began to fight fiercely with the enemy of Devas with its paws.

15. युध्यमानौ ततस्तौ तु तस्मान्नागान्महीं गतौ ।
युयुधातेऽतिसंरब्धौ प्रहारैरतिदारुणैः ॥

युध्यमानौ तौ ततः तु तस्मात् नागात् महीं गतौ अतिसंरब्धौ अतिदारुणैः प्रहारैः युयुधाते ।

युध्यमानौ तौ – the two fighting ततः तु – then तस्मात् नागात्–from the elephant महीं गतौ–the two came to the ground अतिसंरब्धौ–greatly enraged अतिदारुणैः – most terrible प्रहारैः–blows युयुधाते–fought with.

The two fighting thus fell down from the elephant and fought with great fury giving severe blows to each other.

16. ततो वेगात् खमुत्पत्य निपत्य च मृगारिणा ।
करप्रहारेण शिरश्चामरस्य पृथक् कृतम् ॥

ततः वेगात् खं उत्पत्य निपत्य च मृगारिणा करप्रहारेण चामरस्य शिरः पृथक् कृतं ।

ततः –then वेगात्–speedily खं उत्पत्य–springing up to the sky निपत्य च–came down मृगारिणा–by the lion करप्रहारेण–the blow of paw चामरस्य–Chamara's शिरः–head पृथक् कृतं–was severed.

Then the lion quickly sprang up and coming down in speed, severed Chamara's head with a blow by its paw.



17. उदग्रश्च रणे देव्या शिलावृक्षादिभिर्हतः ।
दन्तमुष्टितलैश्चैव करालश्च निपातितः ॥

रणे उदग्रः च देव्या शिलावृक्षादिभिः हतः करालः च दन्तमुष्टितलैः एव निपातितः ।

रणे–in the battle उदग्रः च–Udagra also देव्या–by Devi शिलावृक्षादिभिः–with stones, trees and other things हतः–was killed दन्तमुष्टितलैः एव–merely with teeth and fists करालः च–Karala too निपातितः–was killed (stricken down).

In the battle, Udagra was also killed by Devi by stones, trees and other like things. And Karala was felled down and killed by her with teeth and fists.

18. देवी क्रुद्धा गदापातैश्चूर्णयामास चोद्धतम् ।
बाष्कलं भिन्दिपालेन बाणैस्ताम्रं तथान्धकम् ॥

क्रुद्धा देवी उद्धतम् गदापातैः चूर्णयामास च । तथा भिन्दिपालेन बाष्कलं बाणैः ताम्रं अन्धकं च ।

क्रुद्धा देवी–with anger Devi उद्धतम्–Uddhata गदापातैः–blows from the club चूर्णयामास च–powdered तथा भिन्दिपालेन–in the same way by a dart बाष्कलं–Bhaskala बाणैः with arrows ताम्रं अन्धकं च–Tamra and Andhaka.

Devi was very much enraged and in that wrath powdered Uddhata with blows of her

club. And she killed Bhaskala by a dart and also Tamra and Andhaka with arrows.

19. उग्रास्यमुग्रवीर्यं च तथैव च महाहनुम् ।
त्रिनेत्रा च त्रिशूलेन जघान परमेश्वरी ॥

त्रिनेत्रा परमेश्वरी उग्रास्यं उग्रावीर्यं तथा एव महाहनुं च त्रिशूलेन जघान च ।

त्रिनेत्रा-three eyed परमेश्वरी-the great goddess उग्रास्यं-Ugrasya उग्रवीर्यं-Ugravirya तथा एव-in the same way महाहनुम्-Mahahanu त्रिशूलेन-with the trident जघान च-killed.

The three eyed supreme Goddess killed Ugrasya, Ugraveerya and Mahahanu also in the same way.

20. बिडालस्यासिना कायात् पातयामास वै शिरः ।
दुर्धरं दुर्मुखं चोभौ शरैर्निन्ये यमक्षयम् ॥

असिना बिडालस्य शिरः कायात् पातयामास वै दुर्धरं दुर्मुखं उभौ च शरैः यमक्षयं निन्ये ।

असिना-with the sword बिडालस्य-Bidala's शिरः-head कायात्-from body पातयामास वै-cut off दुर्धरं दुर्मुखं उभौ च-and both Durdhara and Durmukha शरैः-with arrows यमक्षयम्-the abode of Yama निन्ये-led.

Devi with her sword cut off the head of Bidala from his body and it rolled down and



both Durdhara and Durmukha she struck with arrows and they were led to the abode of Yama (were killed)

21. एवं संक्षीयमाणे तु स्वसैन्ये महिषासुरः ।
माहिषेण स्वरूपेण त्रासयामास तान् गणान् ॥

स्वसैन्ये एवं संक्षीयमाणं तु महिषासुरः माहिषेण स्वरूपेण तान् गणान् त्रासयामास ।

स्वसैन्ये-when his army एवं-in this way संक्षीयमाणे तु-was destroyed महिषासुरः-Mahishasura माहिषेण स्वरूपेण-taking the form of a buffalo तान् गणान्-those troops त्रासयामास-frightened.

When Mahishasura saw that his own troops were being destroyed thus, he took his own form of a buffalo and frightened the troops of Devi.

22. कांश्चित्तुण्डप्रहारेण खुरक्षेपैस्तथापरान् ।
लाङ्गूलताडितांश्चान्यान् शृङ्गाभ्यां च विदारितान् ।

कांश्चित्-some तुण्डप्रहारेण-blow by his muzzle तथा-same way अपरान्-others खुरक्षेपैः-by stamping with hooves अन्यान् च-some others लाङ्गूलताडितान्-beating with tail शृङ्गाभ्यां-by horns विदारितान् च-pierced.

The Asura killed some by the blows of his muzzle, some others by stamping on them

with hooves and yet others by the blows with his tail and some others pierced he with his pointed horns.

23. वेगेन कांश्चिदपरान्नादेन भ्रमणेन च ।
निःश्वासपवनेनान्यान्पातयामास भूतले ॥

कांश्चित् वेगेन अपरान् नादेन भ्रमणेन च अन्यान् निःश्वासपवनेन च भूतले पातयामास ।

कांश्चित् अपरान्-(he killed) some others वेगेन-by speed अपरान्-others नादेन-bellowing भ्रमणेन च-whirling round अन्यान्-others निःश्वासपवनेन च-by the force of his breathing भूतले-on the earth पातयामास-caused to fall

Moving hither and thither with great speed he caused the death of some. His loud terrible noise caused the death of a few. His whirling movements caused the death of a few and yet others he felled down by the impact of his violent breathing.

24. निपात्य प्रमथानीकमभ्यधावत सोऽसुरः ।
सिंहं हन्तुं महादेव्याः कोपं चक्रे ततोऽम्बिका ॥

स महासुरः प्रमथानीकं निपात्य महादेव्याः सिंहं हन्तुं अभ्यधावत । ततः अम्बिका कोपं चक्रे ।

सः महासुरः-that great Asura प्रमथानीकं the troops निपात्य-having killed महादेव्याः-of the



great Devi सिंहं-lion हन्तुं-to kill अभ्यधावत-rushed forward ततः-then अम्बिका-the Devi कोपं चक्रे-got angry

Having killed many among the troops of Devi his attention turned to the killing of the lion of Devi and he rushed at it. Then the Devi got angry.

25. सोऽपि कोपान्महावीर्यः खुरक्षुण्णमहीतलः ।
शृङ्गाभ्यां पर्वतानुच्चांश्चिक्षेप च ननाद च ॥

महावीर्यः सः अपि कोपात् खुरक्षुण्णमहीतलः शृङ्गाभ्यां उच्चान् पर्वतान् चिक्षेप च ननाद च ।

महावीर्यः-with great valour सः अपि-that Asura aslo कोपात्-with wrath खुरक्षुण्णमहीतलः-pounded the earth with his hooves शृङ्गाभ्यां-with his horns उच्चान्-big पर्वतान्-mountains चिक्षेप च-threw at Devi ननाद च-and bellowed.

The valient Asura in great anger pounded the surface of the earth with his hooves and with his horns brought down big mountains and threw them at Devi and bellowed fiercely.

26. वेगभ्रमणविक्षुण्णा मही तस्य विशीर्यत ।
लाङ्गूलेनाहतश्चाब्धिः प्लावयामास सर्वतः ॥

तस्य वेगभ्रमणविक्षुण्णा मही विशीर्यत लाङ्गूलेन आहतः अब्धिः सर्वतः प्लावयामास च ।

तस्य-his वेगभ्रमणविक्षुण्णा-pounded by the speed of the movements मही-the earth विशीर्यत-broke into picaces लाङ्गूलेन-by his tail आहत:-lashed अब्धि:-the ocean सर्वत: all over प्लावयामास-caused to submerge.

The Asura's stamps were so quick and heavy that the earth under his feet was broken apart. His tail lashed so heavily that the oceans overflowed submerging the earth all around.

27. धुतश्रृङ्गविभिन्नाश्च खण्डं खण्डं ययुर्घना: ।
श्वासानिलास्ता: शतशो निपेतुर्नभसोऽचला: ॥

घना: धुतश्रृङ्गविभिन्ना: खण्डं खण्डं ययु: तस्य श्वासानिलास्ता: अचला: नभस: शतश: निपेतु: ।

घना:-the clouds धुतश्रृङ्गविभिन्ना:-pierced by his horns खण्डं खण्डं-piece by piece ययु:-became (broken into pieces) तस्य-his श्वासनिलास्ता:-cast up by the blast of his breath अचला:-the mountains नभस:-from the sky शतश:-in hundreds निपेतु:-fell down.

The clouds which were pierced by the horns broke into several pieces. The mountains thrown up by the force of his breath, fell down in hundreds from the sky.



28. इति क्रोधसमाध्मातमापतन्तं महासुरम् ।
दृष्ट्वा सा चण्डिका कोपं तद्वधाय तदाकरोत् ॥

इति क्रोधसमाध्मातं आपतन्तं महासुरम् दृष्ट्वा सा चण्डिका तदा तद्वधाय कोपं अकरोत् ।

इति क्रोधसमाध्मातं-thus swollen with rage आपतन्तम्-rushing towards महासुरम्-that great Asura दृष्ट्वा-having seen सा चण्डिका-that Devi Chandika तदा-then तद्वधाय-to kill him कोपं अकरोत्- got enraged.

When the Devi saw the Asura in great rage rushing towards her, Chandika shouted in great fury and decided to kill him.

29. सा क्षिप्त्वा तस्य वै पाशं तं बबन्ध महासुरम् ।
तत्याज माहिषं रूपं सोऽपि बद्धो महामृधे ॥

सा वै तस्य पाशं क्षिप्त्वा तं महासुरं बबन्ध । महामृधे बद्ध: स: अपि माहिषं रूपं तत्याज ।

सा वै-and she तस्य पाशं-noose for him क्षिप्त्वा-threw महासुरं-that great Asura बबन्ध च-bound महामृधे-in the great battle बद्ध: स: अपि-when he was bound माहिषं रूपं - the form of buffalo तत्याज-gave up.

When the great Asura was bound by the Devi throwing her noose over him and when he knew he was bound in the battle, he suddenly gave up his buffalo form.

30· ततः सिंहोऽभवत्सद्यो यावत्तस्याम्बिका शिरः ।
छिनत्ति तावत् पुरुषः खड्गपाणिरदृश्यत ।।

ततः सः सद्यः सिंहः अभवत् अम्बिका यावत् तस्य शिरः छिनत्ति तावत् खड्गपाणिः पुरुषः अदृश्यत ।

ततः-then सः सद्यः-he suddenly सिंहः-lion अभवत्-became अम्बिका-Ambika यावत्-when तस्य शिरः-his head छिनत्ति-cut off तावत्-then खड्गपाणिः-with a sword is hand पुरुषः-man अदृश्यत-was seen.

Suddenly the Asura took the form of a lion· When the Devi chipped off his head, he appeared as a man with a sword in his hand.

31· तत एवाशु पुरुषं देवी चिच्छेद सायकैः ।
तं खड्गचर्मणा सार्धं ततः सोऽभून्महागजः ।।

ततः देवी आशु एव खड्गचर्मणा सार्धं तं पुरुषं सायकैः चिच्छेद ततः सः महागजः अभूत् ।

ततः देवी-then the Devi आशु एव-soon खड्गचर्मणा सार्धं-along with his sword and shield. तं पुरुषं that man सायकैः-with arrows चिच्छेद-cut into pieces ततः सः-then he महागजः-a great elephant अभूत्-became.

Soon the Devi cut into pieces that man along with his shield and sword with her arrows· Suddenly he became a great elephant·



32· करेण च महासिंहं तं चकर्ष जगर्ज च ।
कर्षतस्तु करं देवी खड्गेन निरकृन्तत ।।

सः करेण तं महासिंहं चकर्ष च जगर्ज च कर्षतः तस्य करं देवी खड्गेन निरकृन्तत ।

सः-he (the elephant) करेण - with hand (trunk) तं महासिंहं-that great lion चकर्ष च-dragged and जगर्ज च-roared कर्षतः तु-while he was dragging तस्य करं-his trunk देवी-Devi खड्गेन-with sword निरकृन्तत-cut off.

The elephant dragged the great lion of Devi with his trunk and roared loudly· While he was dragging he lion· Devi cut off his trunk with her sword·

33· ततो महासुरो भूयो माहिषं वपुरास्थितः ।
तथैव क्षोभयामास त्रैलोक्यं सचराचरम् ।।

ततः महासुरः भूयः माहिषं वपुः आस्थितः सचराचरं त्रैलोक्यं तथा एव क्षोभयामास ।

ततः-then महासुरः- the great Asura भूयः-again माहिषं वपुः-the form of buffalo आस्थितः-took सचराचरं-with movables and immovables त्रैलोक्यं-three worlds तथा एव-as such क्षोभयामास-shook.

Then the great Asura again assumed the form of buffalo and shook the three worlds as

such consisting of all objects, movable and immovable.

34. ततः क्रुद्धा जगन्माता चण्डिका पानमुत्तमम् ।
पपौ पुनः पुनश्चैव जहासारुणलोचना ॥

जगन्माता चण्डिका क्रुद्धा उत्तमं पानं पपौ । अरुणलोचना पुनः पुनः च एव जहास ।

ततः-at that time जगन्माता चण्डिका-Chandika, the goddess of universe क्रुद्धा-got angry उत्तमं पानं-divine drink पपौ - drank अरुणलोचना- with blood red eyes सा-she पुनः पुनः-again and again च एव जहास-laughed loudly.

At this goddess of the universe became enraged. She took a divine drink again and again and her eyes became red and she also laughed loudly.

35. ननर्द चासुरः सोऽपि बलवीर्यमदोद्धतः ।
विषाणाभ्यां च चिक्षेप चण्डिकां प्रति भूधरान् ॥

बलवीर्यमदोद्धतः सः असुरः अपि ननर्द च । विषाणाभ्यां चण्डिकां प्रति भूधरान् चिक्षेप च ।

सः असुरः अपि-that Asura also ननर्द च-roared loudly विषाणाभ्यां-with horns चण्डिकां प्रति-towards Chandika धरान्भूर-mountains चिक्षेप च-threw.



The Asura also intoxicated with strength and valour roared loudly and uprooting mountains with his horns hurled them at Chandika.

36. सा च तान्प्रहितांस्तेन चूर्णयन्ती शरोत्करैः ।
उवाच तं मदोद्धूतमुखरागाकुलाक्षरम् ॥

सा च तेन प्रहितान् तान् शरोत्करैः चूर्णयन्ती मदोद्धूतमुखरागाकुलाक्षरं तं उवाच ।

सा च-she Devi also तेन प्रहितान्-hurled by him तान्-those mountains शरोत्करैः-showers of arrows मदोद्धूतमुखरागाकुलाक्षरं-with face red with intoxication of liquor and in words not clear तं उवाच-told him.

At this Devi sent showers of arrrows which powdered the mountains hurled at her. Her face became red in colour and words got flurried due to intoxication of wine and she spoke to him thus.

37. देव्युवाच ।

38. गर्ज गर्ज क्षणं मूढ मधु यावत्पिबाम्यहम् ।
मया त्वयि हतेऽत्रैव गर्जिष्यन्त्याशु देवताः ॥

हे मूढ अहं यावत् मधु पिबामि तावत् क्षणं गर्ज गर्ज त्वयि मया हते अत्र एव आशु देवताः गर्जिष्यन्ति ।

हे मूढ-oh fool अहं-I यावत्-when मधु पिबामि-drink wine तावत् क्षणं-till then, for some time गर्ज गर्ज-you roar and roar त्वयि मया हते-when you are killed by me अत्र एव-here itself आशु-soon देवता:-the gods गर्जिष्यन्ति-will roar.

You fool! roar and roar till I finish drinking this wine. In this very place the Devas will be roaring when you are killed by me.

39. ऋषिरुवाच।

ऋषि: उवाच-the sage said.

40. एवमुक्त्वा समुत्पत्य सारूढा तं महासुरम् ।
पादेनाक्रम्य कण्ठे च शूलेनैनमताडयत् ॥

सा एवं उक्त्वा समुत्पत्य तं महासुरं आरूढा पादेन कण्ठे आक्रम्य शूलेन एनं अताडयत् च ।

सा-she एवं उक्त्वा-having spoken thus समुत्पत्य-jumping तं महासुरं-that great Asuaa आरूढा-mounted and sat upon पादेन-by her foot कण्ठे-in the neck आक्रम्य-pressing शूलेन-with the trident एनं-him अताडयत् च-struck.

Having spoken thus, the Devi all on a sudden jumped up and sat upon the neck of that Asura, pressed his neck with her foot and also struck him with her trident.



41. तत: सोऽपि पदाक्रान्तस्तया निजमुखात्तत: ।
अर्धनिष्क्रान्त एवासीद्देव्या वीर्येण संवृत: ॥

तत: तया पदा आक्रान्त: स: अपि देव्या: वीर्येण संवृत: तत: निजमुखात् अर्धनिष्क्रान्त: एवं आसित् ।

तता-thus तया-by her पदा आक्रान्त:-caught by her foot स: अपि-he देव्या:-of the Devi वीर्येण-by valour संवृत:-over come तत:-then निजमुखात्-from his own mouth अर्धनिष्क्रान्त: एव-half come out आसीत्-(half the form came out)

Then caught by her foot, the Asura was over come by the valour of Devi and he (in real form) half issued from the mouth (Half of Mahisha issued forth from the mouth of the buffalo.)

42. अर्धनिष्क्रान्त एवासौ युध्यमानो महासुर: ।
तया महासिना देव्या शिरश्छित्त्वा निपातित: ॥

असौ अर्धनिष्क्रान्त: एव युध्यमान: महासुर: तया देव्या महासिना शिर: छित्वा निपातित: ।

असौ-that Asura अर्धनिष्क्रान्त: एव-with half revealed form युध्यमान:-fought महासुर:-the great Asura तया देव्या-by that devi महासिना-by great sword शिर:-head छित्वा-cutting निपातित:-fell down.

With his half-revealed form the Asura fought with the Devi. But Devi with her great sword cut off his head and killed him.

43. ततो हाहाकृतं सर्वं दैत्यसैन्यं ननाश तत् ।
प्रहर्षं च परं जग्मुः सकला देवतागणाः ॥

ततः सर्वं दैत्यसैन्यं हाहाकृतं तत् ननाश । सकलाः देवतागणाः परं प्रहर्षं जग्मुः च ।

ततः-at that सर्वं दैत्यसैन्यं-the entire army of Asura हाहाकृतं-cried with fear तत्-that ननाश-perished सकलाः-all देवतागणाः-gods in heaven परं-great प्रहर्षं जग्मुः च-happiness attained.

When the Asura was destroyed his entire army cried in agnuish "Ha, Ha" and they also perisehd. All the Gods in heaven became extremely happy.

44. तुष्टुवुस्तां सुरा देवीं सह दिव्यैर्महर्षिभिः ।
जगुर्गन्धर्वपतयो ननृतुश्चाप्सरोगणाः ॥

सुराः दिव्यैः महर्षिभिः सह तां देवीं तुष्टुवुः गन्धर्वपतयः जगुः अप्सरोगणाः ननृतुः च ।

सुराः-the gods - Devas दिव्यैः महर्षिभिः सह-in the company of divine sages तां देवीं-that Devi



तुष्टुवुः -praised गन्धर्वपतयः -the Gandharva chiefs जगुः-sang अप्सरोगणाः-the apsara ladies ननृतुः च-danced also.

The devas in Heaven in the company of Divine sages sang praises of that Devi. The Gandharva chiefs song and the Apsara ladies danced too in joy.

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे
देवीमाहात्म्ये महिषासुरवधो नाम तृतीयोऽध्यायः ।

---

# अथ चतुर्थोऽध्याय:

1. ऋषिरुवाच–the sage said.

2. शक्रादय: सुरगणा निहतेऽतिवीर्ये
तस्मिन्दुरात्मनि सुरारिबले च देव्या ।
तां तुष्टुवु: प्रणतिनम्रशिरोधरांसा
वाग्भि: प्रहर्षपुलकोद्गमचारुदेहा: ॥

देव्या अतिवीर्ये तस्मिन् दुरात्मनि सुरारिबले च निहते शक्रादय: सुरगणा: प्रणतिनम्रशिरोधरांसा: प्रहर्षपुलकोद्गम चारुदेहा: तां वाग्भि: तुष्टुवु: ।

देव्या–by the Devi अतिवीर्ये–of great valour तस्मिन् दुरात्मनि–that evil minded Mahisha सुरारिबले च–and the army of Asuras निहते–were killed शक्रादय: सुरगणा:–Indra and hosts of Devas प्रणतिनम्रशिरोधरांसा:–their necks and shoulders bent with humility प्रहर्षपुलकोद्गमचारुदेहा: – and their bodies becoming beautiful with horripulation तां–Devi from joy वाग्भि:–with pious words तुष्टुवु:–praised.

When Mahishasura of great valour and evil nature and the army of Asuras were killed by the Devi all the Devas led by Indra praised the Devi with pious words, their heads and neck bent with reverence and their bodies more radient with horripulation due to excessive joy.



3. देव्या ययाततमिदं जगदात्मशक्त्या
निःशेषदेवगणशक्तिसमूहमूर्त्या ।
तामम्बिकामखिलदेवमहर्षिपूज्यां
भक्त्या नता: स्म विदधातु शुभानि सा न: ॥

यया देव्या आत्मशक्त्या नि:शेषदेवगणशक्तिसमूहमूर्त्या इदं जगत् ततं तां अखिलदेवमहर्षिपूज्यां अम्बिकां भक्त्या नता: स्म: सा न: शुभानि विदधातु ।

यया देव्या–by which Devi आत्मशक्त्या–by her own power नि:शेषदेवगणशक्तिसमूहमूर्त्या - who is the embodiment of the power of all Devas इदं जगत्–this universe ततं - pervaded तां - that अखिलदेवमहर्षिपूज्यां–worshipped by all sages and Devas अम्बिकां–Ambika भक्त्या - with devotion नता: स्म: – we bow down सा–she न: –for us शुभानि –all good विदधातु–bestow.

To that Devi Ambika who pervades the entire universe by her power, who is the personification of the power of the entire host of Devas and who is worshipped by all the Devas and sages, we offer our salutations with great devotion. May she bestow on us everything auspicious.

4. यस्या: प्रभावमतुलं भगवाननन्तो
ब्रह्मा हरश्च न हि वक्तुमलं बलं च ।
सा चण्डिकाखिलजगत्परिपालनाय
नाशाय चाशुभभयस्य मतिं करोतु ॥

यस्याः अतुलं प्रभावं बलं च वक्तुं भगवान् अनन्तः ब्रह्मा हरः च न अलं सा चण्डिका अखिलजगत्परिपालनाय अशुभभयस्य नाशाय च मतिं करोतु ।

यस्याः-whose अतुलं-in comparable प्रभावं-prowess बलं च-and strength वक्तुं-to speak about भगवान्, अनन्तः-Vishnu Anantha ब्रह्मा-Brahma हरः च-and Siva न अलं-are not able सा चण्डिका-that Chandika अखिलजगत्परिपालनाय-for the protection of the whole universe अशुभभयस्य नाशाय च-and for the destruction of the fear from evils मतिं करोतु-make up her mind.

May Chandika whose incomparable valour and greatness cannot be described by even Vishnu, Anantha, Brahma and Siva, may that Devi make up her mind for protecting the entire world and destroy the fear of evil.

5. या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः
पापात्मनां कृतधियां हृदयेषु बुद्धिः ।
श्रद्धा सतां कुलजनप्रभवस्य लज्जा
तां त्वां नताः स्म परिपालय देवि विश्वम् ॥

सुकृतिनां भवनेषु या स्वयं श्रीः पापात्मनां भवनेषु अलक्ष्मीः कृतधियां हृदयेषु बुद्धिः सतां श्रद्धा कुलजनप्रभवस्य लज्जा तां त्वां नताः स्मः देवि विश्वं परिपालय ।

सुकृतिनां-virtuous भवनेषु-in the house of या-whose स्वयं श्रीः-yourself as good fortune पापात्मनां-



evil minded भवनेषु-in the house of अलक्ष्मीः-misfortunes कृतधियां-intelligent हृदयेषु-minds बुद्धि-as intelligence सतां श्रद्धा-in the good as faith कुलजन प्रभवस्य-in the high born लज्जा-as modesty तां त्वां-to you नताः स्म-we bow down देवि-Oh, Devi विश्वं परिपालय-protect the world.

We bow down to that Devi who dwells as good fortune in the house of the virtuous and misfortune of the wicked, who is the intelligence in the hearts of the learned in the virtuous as faith and in the noble born as modesty. Oh Devi, please protect the world.

6. किं वर्णयाम तव रूपमचिन्त्यमेतत्
किञ्चातिवीर्यमसुरक्षयकारि भूरि ।
किं चाहवेषु चरितानि तवाद्भुतानि
सर्वेषु देव्यसुरदेवगणादिकेषु ॥

तव एतत् अचिन्त्यं रूपं किं वर्णयामः भूरि असुरक्षयकारि वीर्यं किं तव सर्वेषु देवगणादिकेषु आहवेषु अद्भुतानि चरितानि किं ।

देवि-Oh Devi तव-your एतत् अचिन्त्यं रूपं-this inconceivable form किं वर्णयामः-how can we describe भूरि-abundant असुरक्षयकारि-destroying the Asuras वीर्यं किं-your valour तव-your सर्वेषु असुर देवगणादिकेषु-among all the hosts of Devas and

Asuras आहवेषु - in battles अद्भुतानि चरितानि–your wonderful performances किं–how

Oh Devi, how can we describe this wonderful form of yours which is inconceivable by us? How can we describe the great valour shown by you in destroying the Asuras and how can we describe the wonderful feats shown by you in the great battles between the Asuras and Devas.

7. हेतुः समस्तजगतां त्रिगुणापि दोषै-
र्न ज्ञायसे हरिहरादिभिरप्यपारा ।
सर्वाश्रयाखिलमिदं जगदंशभूत-
मव्याकृता हि परमा प्रकृतिस्त्वमाद्या ॥

त्वं समस्तजगतां हेतुः आद्या परमा प्रकृतिः हि त्रिगुणा अपि दोषैः न अपारा देवैः हरिहरादिभिः न ज्ञायसे सर्वाश्रया अखिलं इदं जगत् अंशभूतं अव्याकृता ।

त्व –you are समस्तजगतां of the whole universe हेतुः cause आद्याप्रकृतिः हि–first primordial power त्रिगुणा अपि–even with three gunas दोषैः नः–not with defects अपारा–limitless देवैः –by the Devas हरिहरादिभिः –by Vishnu and Siva etc. न ज्ञायसे not knowable सर्वाश्रया you are the support of all अखिलं the whole इदं जगत्-of the universe अंशभूतं–only a part of yourself अव्याकृता-without any change परमा-supreme.



You are the matrix of the whole Universe· (cause of the Universe·) You are possessed of the three gunas (attributes) but you have not their defects· You are inconceivable or without any limits hence not comprehensible even to Vishnu, Siva or other Devas· You are the support of all. This whole world is only an infinitesimal part of you. You are the Supreme primordial Prakriti without any transformation·

8· यस्याः समस्तसुरता समुदीरणेन
तृप्तिं प्रयाति सकलेषु मखेषु देवि ।
स्वाहासि वै पितृगणस्य च तृप्तिहेतु-
रुच्चार्यसे त्वमत एव जनैः स्वधा च ॥

समस्तसुरता यस्याः समुदीरणेन सकलेषु मखेषु तृप्तिं प्रयाति हे देवी ! सा स्वाहा त्वं असि अतः एव पितृगणस्य च तृप्तिहेतोः जनैः त्वं स्वधा इति च उच्चार्यते ।

समस्तसुरता–all the Gods यस्याः समुदीरणेन–by whose utterence सकलेषु मखेषु–in all the sacrifices तृप्ति प्रयाति–become satisfied हे देवि–Oh Devi सा स्वाहा–that 'swaha त्वं असि–you are अतः एव–in the same way पितृगणस्य च–of the manes तृप्तिहेतुः–cause of satisfaction जनैः–by the people त्वं–you स्वधा–by name Swadha' इति च–also उच्चार्यते–uttered.

Oh, Devi you are 'Swaha' by uttering which word all the Gods get satisfaction in sacrifices And you are also the word 'Swadha' which gives

satisfaction to the manes (usually Swaha and swadha are uttered during sacrifices )

9. या मुक्तिहेतुरविचिन्त्यमहाव्रता त्वं
अभ्यस्यसे सुनियतेन्द्रियतत्त्वसारैः ।
मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषै-
र्विद्यासि सा भगवती परमा हि देवि ॥

देवि या मुक्तिहेतुः अचिन्त्यमहाव्रता सुनियतेन्द्रियतत्वसारैः मोक्षार्थिभिः अस्तसमस्तदोषैः मुनिभिः अभ्यस्यसे सा परमा भगवती त्वं असि हि ।

देवि–Oh Devi या मुक्तिहेतुः –which is the cause of liberation अचिन्त्यमहाव्रता–who is realised by inconceivable penances सुनियतेन्द्रियतत्वसारैः –whose senses are well controlled मोक्षार्थिभिः –by those who desire for liberation अस्तसमस्तदोषैः–who have got rid of all blemishes मुनिभिः – by sages अभ्यस्यसे–practiced सा परमा विद्या – that supreme vidya भगवती –Bhagavati त्वं असि हि you are that verily.

Devi, you the cause of liberation and great inconceivable penances (which are blessed for liberation), are the Supreme Vidya. You are that Bhagavati to attain which the sages whose senses are well controlled and who are free from all blemishes do penance. You alone are that Supreme knowledge.



10. शब्दात्मिका सुविमलर्ग्यजुषां निधान-
मुद्गीथरम्यपदपाठवतां च साम्नाम् ।
देवी त्रयी भगवती भवभावनाय
वार्ता च सर्वजगतां परमार्तिहन्त्री ॥

शब्दात्मिका ऋग्यजुषां विपुलं निधानं उद्गीथरम्यपदपाठवतां साम्नाम् च देवी त्रयी भगवती भवभावनाय वार्ता च सर्वजगतां परमार्तिहन्त्री ।

शब्दात्मिका – you are the form of sabda Brahma सुविमलर्ग्यजुषां-of fhe very pure RK and Yajus विपुलं-vast निधानं-repository उद्गीथरम्यपदपाठवतां-recital of whose words is beautiful with the udgitha साम्नां च-of the sama veda देवी त्रयी भगवती-you are the embodiment of the vedas Bhagavati भवभावनाय-for the maintenance of life वार्ता च-in the form of speech सर्वजगतां-of the whole universe परमार्तिहन्त्री-destroyer of all sorrows.

Devi, you are embodied Sabda Brahman itself. You are the repository of the Vedas, RK and Yajus and also the Sama whose words are beautiful with the singing of Udgitha. In short you are the embodiment of the vedas. You are also the sustenance by which life is maintained. You are also the Supreme destroyer of the sorrows of the whole universe in the form of speech.

11· मेघासि देवि विदिताखिलशास्त्रसारा
दुर्गासि दुर्गभवसागरनौरसङ्गा ।
श्रीः कैटभारिहृदयैककृताधिवासा
गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा ॥

देवि त्वं विदिताखिलशास्त्रसारा-मेधा असि दुर्गभवसागरनौः असङ्गा दुर्गा असि कैटभारिहृदयैककृताधिवासा श्री शशिमौलिकृतप्रतिष्ठा गौरी एव ।

देवि विदिताखिलशास्त्रसारा–Devi one who knows the essence of all scriptures मेधा असि-you are the inteillgence दुर्गभवसागरनौः –the boat which takes your devotees across the difficult ocean of worldliness असङ्गा–devoid of attachment दुर्गाअसि–you are Durga कैटभारिहृदयैककृताधिवासा–one who resides in the heart of the slayer of Kaitabha श्रीः- Lakshmi शशिमौलिकृतप्रतिष्ठा- who has the abode on Siva गौरी-Gouri त्वं एव-you verily are.

Devi, you are Medha intelligence. As such you know the essence of all scriptures (you are unattainable by those who have no devotion) You are Durga, unattached, the boat which takes your devotees across the sea of samsara (world) Your are also Lekshmi who has her seat on the chest of Vishnu. You are also Gouri, the consort of Siva and you have your place on the body of Siva.



12· ईषत्सहासममलं परिपूर्णचन्द्र-
बिम्बानुकारि कनकोत्तमकान्तिकान्तम् ।
अत्यद्भुतं प्रहृतमात्तरुषा तथापि
वक्त्रं विलोक्य सहसा महिषासुरेण ॥

ईषत्सहासं अमलं परिपूर्णचन्द्रबिम्बानुकारि कनकोत्तमकान्तिकान्तम् तथा अपि वक्त्रं विलोक्य आत्तरुषा महिषासुरेण सहसा प्रहृतं अति अद्भुतम् ।

ईषत्सहासं - with a gentle smile अमलं–pure परिपूर्णचन्द्रबिबानुकारि–resembling the orbit of the full moon कनकोत्तमकान्तिकान्तम्–radiant like the lustre of pure gold तथापि-still वक्त्रं–face विलोक्य-seeing आत्तरुषा महिषासुरेण–with anger by Mahishasura. सहसा प्रहृतं–struck suddenly अत्यद्भुतम्–this is very strange

Devi, your face is lit with a gentle smile, it is so pure, it resembles the full moon in splendour and beauty and it is radiant with the pure colour of excellent gold. Still, when Mahishasura saw it, he was swept away by anger all on a sudden and struck on your face at once. This is really strange.

13· दृष्ट्वा तु देवि कुपितं भ्रुकुटीकराल-
मुद्यच्छशाङ्कसदृशच्छवि यन्न सद्यः ।
प्राणान् मुमोच महिषस्तदतीव चित्रं
कैर्जीव्यते हि कुपितान्तकदर्शनेन ॥

देवि महिष: उद्यच्छशाङ्क सदृशछवि भ्रुकुटीकरालं तव वदनं दृष्ट्वा अपि सद्य: प्राणान् न मुमोच इति यत् तत् अतीव चित्रं कुपितान्तकदर्शनेन कं: जीव्यते ।

देवि-Oh! Devi महिष:-Mahishasura उद्यच्छशाङ्क-सदृशच्छवि-red in brilliance like the rising moon भ्रुकुटीकरालं-terrible with frowns तव वदनं-your face दृष्ट्वा अपि even seeing सद्य: -at once प्राणान्-his life न मुमोच-did not give up इति यत् तत्-which is अतीव चित्रं-very strange कुपितान्तकदर्शनेन-seeing the destroyer in wrath कै: जीव्यते-who will live.

Oh! Devi, It is really a wonder that Mahishasura did not give up his life on the spot when he saw your angry face with your terrible frowns and the deep red brilliance of the rising moon on your face. For you looked like the god of destruction and who can live after seeing that face! It is really strange.

14. देवि प्रसीद परमा भवती भवाय
सद्यो विनाशयसि कोपवती कुलानि ।
विज्ञातमेतदधुनैव यदस्तमेत-
न्नीतं बलं सुविपुलं महिषासुरस्य ।।

देवि प्रसीद भवती परमा त्वं सद्य: भवाय भवसि कोपवती त्वं सद्य: कुलानि विनाशयसि एतत् अधुना एव विज्ञातं यत महिषासुरस्य सुविपुलं एतत् बलं अस्तं नीतम् ।



देवि-Oh! Devi प्रसीद-please be propitious परमा भवती-thou art the Supreme सद्य:-(when pleased), at once भवाय for welfare कोपवती-if you are angry त्वं-you सद्य:-then कुलानि-families विनाशयसि-destroy एतत्-this अधुना एव-only now विज्ञातं-was known यत् महिषासुरस्य-when Mahishasura's सुविपुलं-great एतत् बलं-this army अस्तं नीतं-was destroyed.

Devi, be pleased. You are the Supreme being. If pleased you bring prosperity And when you are angry families as a whole are destroyed. This was known to us only now when Mahishasura's big army was completely destroyed.

15. ते सम्मता जनपदेषु धनानि तेषां
तेषां यशांसि न च सीदति धर्मवर्ग: ।
धन्यास्त एव निभृतात्मजभृत्यदारा
येषां सदाभ्युदयदा भवती प्रसन्ना ।।

येषां भवती सदा प्रसन्ना अभ्युदयदा ते जनपदेषु सम्मता तेषां धनानि तेषां यशांसि धर्मवर्ग: न सीदति च ते एव धन्या: निभृतात्मजभृत्यदारा: ।

येषां-whose, for whom भवती-you प्रसन्ना are pleased अभ्युदयदा you are bountiful ते-they जनपदेषु-among people सम्मता-esteemed तेषां-they

have धनानि-wealth तेषां-they have यशांसि-fame धर्मवर्गः-acts of righteousness न सीदति च-never perish ते एव-they indeed धन्या-are fortunate निभृतात्मजभृत्यदारा-they are possessed of always devoted children, servants and wives सदा-always.

Oh! Devi, with whom you are always well pleased they are object of your bounteous rewards. These fortunate beings are esteemed by people, they have riches, they have good reputation and their acts of righteousness never perish. They are indeed fortunate, they are blessed with dutiful children, servants and wives.

16. धर्म्याणि देवि सकलानि सदैव कर्मा-
ण्यत्यादृत : प्रतिदिनं सुकृती करोति ।
स्वर्गं प्रयाति च ततो भवतीप्रसादा-
ल्लोकत्रयेऽपि फलदा ननु देवि तेन ॥

देवि सुकृती भवतीप्रसादात् धर्म्याणि सकलानि कर्माणि प्रतिदिनं सदा एव अत्यादृतः करोति भवतीप्रसादात् स्वर्गं प्रयाति च तेन कालत्रये अपि फलदा ननु देवि ।

देवि–Devi सुकृती-blessed भवतीप्रसादात्-by your grace धर्म्याणि-righteous deeds सकलानि-all कर्माणि-actions प्रतिदिनं daily सदा एव-always अत्यादृतः-with great care करोति-do भवतीप्रसादात्-by your



blessing स्वर्गं-to heaven प्रयाति च-go also तेन-hence लोकत्रये अपि-in the three worlds फलदा-giver of wholesome results ननु देवि-you alone are, Oh Devi.

Those who are fortunate by your blessings they do their daily duties in righteousness with great attention and as a result of your blessings they go to heaven. Hence in all the three worlds you are the giver of wholesome results.

17. दुर्गे स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि ।
दारिद्र्यदुःखभयहारिणि का त्वदन्या
सर्वोपकारकरणाय सदार्द्रचित्ता ॥

दुर्गे स्मृता अशेषजन्तोः भीतिं हरसि स्वस्थैः स्मृता अतीव शुभां मतिं ददासि दारिद्र्यदुःखभयहारिणि सर्वोपकारकरणाय सदा आर्द्रचित्ता त्वदन्या का ।

दुर्गे स्मृता-if remembered in distress अशेषजन्तोः-of all beings भीतिं fear हरसि you destroy स्वस्थैः-by those who are good स्मृता-when remembered अतीव great शुभां clear मतिं-intellect ददासि give दारिद्र्यदुःखभयहारिणि-Oh, destroyer of poverty sorrow and fear सर्वोपकारकरणाय-having a mind to do good to all सदा आर्द्रचित्ता always having a sympathetic heart त्वदन्या का who else but you.

When in difficult times facing wordly fears if you are remembered you at once remove the fear of all beings. When those who have no desires, and are of composed mind remember you, you give them a clear intellect. You are the destroyer of poverty, sorrow and fear and which goddess else is there who has an ever sympathetic heart to do good to all alike.

18. एभिर्हतैर्जगदुपैति सुखं तथैते
कुर्वन्तु नाम नरकाय चिराय पापम् ।
संग्राममृत्युमधिगम्य दिवं प्रयान्तु
मत्वेति नूनमहितान्विनिहंसि देवि ॥

हतैः एभिः जगत् सुखं उपैति तथा एते चिराय नराकय पापं कुर्वन्तु नाम संग्राममृत्युं अधिगम्य दिवं प्रयान्तु इति मत्वा देवि अहितान् विनिहंसि नूनम् ।

हतैः एभिः - by them who are killed जगत् - the world सुखं good, happiness उपैति - will get तथा - so एते - these चिराय - for long नरकाय - for hell पापं - sin कुर्वन्तु नाम - let them do संग्राममृत्युं - death in battle अधिगम्य attaining दिवं heaven प्रयान्तु - let go इति मत्वा - thinking so देवि - Oh, Devi अहितान् - enemies विनिहंसि - you kill नूनं - surely.

The world will get happiness when these Asuras are destroyed. So let these Asuras go on doing evil for long by which they will go to hell only. If they meet with death in battle they will go to heaven only. Thinking thus Oh, Devi you kill these enemies surely.



19. दृष्ट्वैव किं न भवती प्रकरोति भस्म
सर्वासुरानरिषु यत्प्रहिणोषि शस्त्रम् ।
लोकान्प्रयान्तु रिपवोऽपि हि शस्त्रपूता
इत्थं मतिर्भवति तेष्वपि तेऽतिसाध्वी ॥

भवती दृष्ट्वा एव सर्वासुरान् भस्म न प्रकरोति किं अरिषु शस्त्रं प्रहिणोषि यत् मे रिपवः अपि शस्त्रपूताः लोकान् प्रयान्तु तेषु अहितेषु इत्थं साध्वी मतिः भवति हि ।

देवि Oh Devas भवती - you दृष्ट्वा एव - by only looking सर्वासुरान् all Asuras भस्म - to ashes न प्रकरोति किं - do not reduce अरिषु - on the enemies शस्त्रं - weapons प्रहिणोषि यत् - that you send मे रिपवः - my enemies अपि - also शस्त्रपूताः - purified by weapons लोकान् - other worlds प्रयान्तु - let go तेषु - in अहितेषु - enemies इत्थं - thus अतिसाध्वी मतिः - good intention भवति हि - there is.

By your mere looks do you not reduce all the Asuras to ashes? Still you send your weapons against them so that these enemies who had bad motives get purified by your weapons and attain the higher worlds. Even towards these bad people your intention is so good.

20· खड्गप्रभानिकरविस्फुरणैस्तथोग्रैः
शूलाग्रकान्तिनिवहेन दृशोऽसुराणाम् ।
यन्नागता विलयमंशुमदिन्दुखण्ड-
योग्याननं तव विलोकयतां तदेतत् ॥

खड्गप्रभानिकरैः विस्फुरणैः तथा उग्रैः शूलाग्रकान्तिनिवहेनः असुराणां दृशः विलयं न आगताः यत् तत् एतत् तव अंशुमदिन्दुखण्डयोग्याननं विलोकयतां ।

खड्गप्रभानिकरैः-terrible flashes of light of the sword विस्फुरणैः-coming out तथा उग्रैः-and terrible शूलाग्रकान्तिनिवहेनः - mass of light coming from your spear point असुराणां-of the Asuras दृशः-eyes विलयं न आगताः-became not blind यत् तत् एतत्-that is तव-your अंशुमदिन्दुखण्डयोग्याननं-your face resembling the moon shedding lustrous rays विलोकयतां-were looking at.

During the battle, the eyes of the Asuras ought to have become blind because of the flashes of light issuing forth from your sword or the lustre of your spear points. But they did not become blind because they saw your face resembling the moon spreading its rays all over. (They were fortunates to see you face to face and as such they never became blind )



21· दुर्वृत्तवृत्तशमनं तव देवि शीलं
रूपं तथैतदविचिन्त्यमतुल्यमन्यैः ।
वीर्यं च हन्तृ हृतदेवपराक्रमाणां
वैरिष्वपि प्रकटितैव दया त्वयेत्थम् ॥

देवि तव शीलं दुर्वृत्तवृत्तशमनं तथा एतत् रूपं अविचिन्त्य अन्यैः अतुल्यं वीर्यं हृतदेवपराक्रमाणां हन्तृ इत्थं त्वया वैरिषु अपि दया प्रकटिताः ।

देवि-Oh Devi तव शीलं-your nature दुर्वृत्तवृत्तशमनं-destroying the wicked एतत् रूपं-this your form अविचिन्त्यं-cannot be thought of तथा-even so, in the same manner अन्यैः-to others अतुल्यं वीर्यं-in comparable valour हृतदेवपराक्रमाणां-those who have destroyed the valour and courage of the Devas हन्तृ-destroyer इत्थं-thus त्वया-by you वैरिषु अपि-even to enemies दया प्रकटिताः-shown kindness.

Oh Devi, you by nature are prone to destroy the evils done by the wicked. Your beauty and splendour are incomparable and inconceivable by others. Your valour is the destroyer of those who have robbed the Devas of their power, your kindness is such that it is thus showered even on enemies.

22· केनोपमा भवतु तेऽस्य पराक्रमस्य
रूपं च शत्रुभयकार्यतिहारि कुत्र ।
चित्ते कृपा समरनिष्ठुरता च दृष्टा
त्वय्येव देवि वरदे भुवनत्रयेऽपि ॥

भुवनत्रये अपि वरदे देवि ते अस्य पराक्रमस्य उपमा केन भवति रूपं च शत्रुभयकारि अतिहारि कुत्र चित्ते कृपा समर-निष्ठुरता च त्वयि एव दृष्टा ।

भुवनत्रये अपि-in the three worlds वरदे देवि-Oh boon giving Devi ते-your अस्य पराक्रमस्य-of this valour उपमा-comparison केन भवति-with whom possible शत्रुभयकारि-instilling fear in enemies अतिहारि-exceedingly charming रूपं-form कुत्र-whose (wherelse it can be seen ?) चित्ते-in your heart कृपा-kindness समरनिष्ठुरता च-relentlessness in the battle also त्वयि एवं-in you alone दृष्टा-has been seen.

Is there anything in this world to be compared with your skill in battle? Is there anything in the world which can be compared to your striking form of exceeding charm causing fear to enemies. Comparison in heart and relentlessness in the battle can be seen at the same time only in you in the three worlds.

23. त्रैलोक्यमेतदखिलं रिपुनाशनेन
त्रातं त्वया समरमूर्धनि तेऽपि हत्वा ।
नीता दिवं रिपुगणा भयमप्यपास्त-
मस्माकमुन्मदसुरारिभवं नमस्ते ।।



त्वया रिपुनाशनेन एतत् त्रैलोक्यं अखिलं त्रातम् ते रिपुगणा अपि समरमूर्धनि हत्वा दिवं नीताः उन्मदसुरारिभवं अस्माकं भयमपि अपास्तं ते नमः ।

त्वया-by you रिपुनाशनेन-by destroying enemies एतत्-this त्रैलोक्यं-universe अखिलं-the whole त्रातम्-saved ते रिपुगणा अपि-the whole lot of your enemies समरमूर्धनि-in the midst of the battle हत्वा-having killed दिवं नीताः-are taken to heaven उन्मदसुरारिभवं-born from the swollen arrogance of the Asuras अस्माकं-our भयमपि-fear also अपास्तं-gone ते नमः-salutation to you.

By destroying the enemies in the battle you have saved the three worlds. Having killed them is the battle they have attained the heavenly region even if they were enemies fighting against the Devas. Our fears from the arrogant Asuras have been also dispelled by you. Salutations to you.

24. शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ।
घण्टास्वनेन नः पाहि चापज्यानिस्स्वनेन च ।।

देवि शूलेन नः पाहि । अंबिके खङ्गेन च नः पाहि । घण्टास्वनेन नः पाहि । चापज्यानिस्स्वनेन च नः पाहि ।

देवि-Oh! mother शूलेन-with your spear नः पाहि-protect us अंबिके-Oh! Ambika खङ्गेन च-with sword also नः-us पाहि-protect घण्टास्वनेन-

with the sound of your bell नः पाहि-please protect us चापज्यानिस्स्वनेन च-by the twang of your bow string नः पाहि-protect us.

Oh ! Mother, please protect us with spear Oh ! Ambika, kindly protect us with your sword also and again please protect us with the sound of your bell and also protect us with the twang of your bow-string.

25. प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ।
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ॥

चण्डिके आत्मशूलस्य भ्रामणेन प्राच्यां रक्ष प्रतीच्यां रक्ष दक्षिणे रक्ष ईश्वरि तथा उत्तरस्यां रक्ष ।

चण्डिके-Oh Chandika आत्मशूलस्य-of your trident भ्रामणेन-whirling of प्राच्यां रक्ष-protect us from the east प्रतीच्यां रक्ष-protect us from the west दक्षिणे रक्ष-protect us from south ईश्वरि-Oh Goddess तथा-in the same way उत्तरस्यां रक्ष-from the north also protect.

Oh ! Chandika, protect us in the east, in the west, in the north and in the south by the whirling of your spear, O Iswari !

26. सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते ।
यानि चात्यन्तघोराणि तै रक्षास्मांस्तथा भुवम् ॥



ते सौम्यानि यानि रूपाणि अत्यन्तघोराणि यानि च त्रैलोक्ये विचरन्ति तैः अस्मान् तथा भुवं रक्ष ।

ते-your सौम्यानि-gentle यानि रूपाणि-those forms अत्यन्तघोराणि-and those most terrible forms यानि च-which त्रैलोक्ये-in the three worlds विचरन्ति-move about तैः-by them अस्मान् तथा भुवं-us and the whole world रक्ष-please protect.

Mother, protect us and the whole world by those beautiful forms of yours and also by the most terrible forms which move about in this universe.

27. खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके ।
करपल्लवसङ्गीनि तैरस्मान्रक्ष सर्वतः ॥

अंबिके ते करपल्लवसंगीनि खड्गशूलगदादीनि यानि शस्त्राणि सन्ति तैः अस्मान् सर्वतः रक्ष तथा भुवं रक्ष ।

अंबिके-Oh Ambika ते-your करपल्लवसंगीनि-having contact with your tender hands. खड्गशूलगदादीनि-sword, spear, mace and other weapons यानि शस्त्राणि-whatever weapons सन्ति-exist तैः-by them अस्मान्-us सर्वतः रक्ष-protect from all sides तथा-same way भुवं रक्ष-protect the world.

Oh Ambika, protect us and the universe from all sides with your sword, trident and mace and other weapons which have contact with your hands which are as tender as new sprouts.

28. ऋषिरुवाच ।।

ऋषिः उवाच-The sage said

29–30. एवं स्तुता सुरैर्दिव्यैः कुसुमैर्नन्दनोद्भवैः ।
अर्चिता जगतां धात्री तथा गन्धानुलेपनैः ।।
भक्त्या समस्तैस्त्रिदशैर्दिव्यैर्धूपैः सुधूपिता ।
प्राह प्रसादसुमुखी समस्तान् प्रणतान् सुरान् ।।

एवं सुरैः स्तुता, नन्दनोद्भवैः कुसुमैः तथा गन्धानुलेपनैः अर्चिता, भक्त्या समस्तैः त्रिदशैः दिव्यैः धूपैः सुधूपिता सा देवी प्रसादसुमुखी समस्तान् प्रणतान् सुरान् प्राह ।

एवं-thus सुरैः-by the devas स्तुता-praised नन्दनोद्भवैः-blossomed in the Nandana garden कुसुमैः-flowers तथा-same way गन्धानुलेपनैः with perfumed unguents अर्चिता-worshipped भक्त्या-with devotion समस्तैः त्रिदशैः-all devas दिव्यैः धूपैः-celestial incenses सुधूपिता-incensed जगतां धात्री-the supporter of the three worlds सा देवी-that devi प्रसादसुमुखी-with a pleased countenance प्रणतान्-those who paid obeisance समस्तान् सुरान्-all the Devas प्राह-spoke.

All the Devas praised the supporter of the worlds with great devotion and worshipped her with celestial flowers blossomed in heaven and with perfumed unguents. They also offered her divine incenses. The Devi who was highly



pleased with their devotion spoke to all the Devas with a sweet and benign face.

31. देव्युवाच ।।

देवी उवाच-the Devi said

32. व्रियतां त्रिदशाः सर्वे यदस्मत्तोऽभिवाञ्छितम् ।।
(ददाम्यहमतिप्रीत्या स्तवैरेभिः सुपूजिता ।)

सर्वे त्रिदशाः यत् अस्मत्तः अभिवाञ्छितम् तत् व्रियतां एभिः स्तवैः सुपूजिता अहं अतिप्रीत्या ददामि ।

सर्वे त्रिदशाः-Oh, all devas यत्-what अस्मत्तः-from me अभिवाञ्छितम्-is desired तत् व्रियतां-choose that एभिः स्तवैः-by these hymns सुपूजिता-worshipped well अहं-I अतिप्रीत्या-with great pleasure ददामि-will give.

Oh Devas, whatever you wish to be fulfilled you can ask from me. Well worshipped with these hymns, I grant all that with great pleasure.

33. देवा ऊचुः ।

देवा ऊचुः -The Devas said

34. भगवत्या कृतं सर्वं न किञ्चिदवशिष्यते ।
यदयं निहतः शत्रुरस्माकं महिषासुरः ।।

भगवत्या-by Devi सर्वं कृतं-all is done किञ्चित् न अवशिष्यते-nothing more, is left to be done. यत्-since अस्माकं-our शत्रुः-enemy अयं-this महिषासुरः-Mahishasura निहतः-has been killed.

**Since our enemy, this Mahishasura has been killed by you, there is nothing left to be done for us by you. You have done everything for us.**

**35. यदि चापि वरो देयस्त्वयाऽस्माकं महेश्वरि ।**
**संस्मृता संस्मृता त्वं नो हिंसेथा: परमापद: ।।**

हे महेश्वरि त्वया अस्माकं यदि अपि वर: देय: त्वं न: परमापद: संस्मृता संस्मृता हिंसेथा: ।

हे महेश्वरि–Oh Goddes त्वया–by you अस्माकं–**for us** यदि अपि वरं देय:–**if at all a boon is to be granted** त्वं-you न: परमापद:–**our terrible calamities.** संस्मृता संस्मृता-**whenever you are remembered by us** हिंसेथा:–**destroy.**

**If at all you want to bless us again by a boon only grant us this that whenever we remember you please protect us from great calamities.**

**36. यश्च मर्त्य: स्तवैरेभिस्त्वां स्तोष्यत्यमलानने ।**
**तस्य वित्तर्द्धिविभवैर्धनदारादिसम्पदाम् ।।**

**37. वृद्धयेऽस्मत्प्रसन्ना त्वं भवेथा: सर्वदाम्बिके ।।**

अमलानने अंबिके य : मर्त्य: एभि: स्तवै: त्वां स्तोष्यति तस्य वित्तर्द्धिविभवै: धनदारादिसम्पदाम् वृद्धये त्वं सर्वदा: सुप्रसन्ना भवेथा: च ।

अमलानने–**of spoteless countenance** अंबिके–**Oh Devi** य: मर्त्य:–**whichever man** एभि: स्तवै:–**with these hymns** त्वां स्तोष्यति–**will praise you** तस्य–**his**



वित्तर्द्धिविभवै: पुत्रदारादिसम्पदां वृद्धये–increase in wealth, wife and other fortunes with riches prosperity. त्वं–you सर्वदा always सुप्रसन्ना well pleased भवेथा: च–may become.

Oh Mother ! of spotlessly pure face ! Who-ever praises you with these hymns, may you be gracious to them to grant them wealth fortune, progeny wife, long life etc – with all good fortune. You are already pleased with us. Now be gracious to bless others also.

38. ऋषिरुवाच ।।

ऋषि: उवाच–The Rishi said

39. इति प्रसादिता देवैर्जगतोऽर्थे तथात्मन: ।
तथेत्युक्त्वा भद्रकाली बभूवान्तर्हिता नृप ।।

हे नृप, इति देवै: जगत: अर्थे तथा आत्मन: अर्थे च प्रसादिता भद्रकाली तथा इति उक्त्वा अन्तर्हिता बभूव ।

हे नृप- Oh king इति देवै:-thus by the Devas जगत: अर्थे-for the sake of the world तथा-as also आत्मन: अर्थे:–for their own sake प्रसादिता–propitiated भद्रकाली–Bhadrakali तथा इति let it be so उक्त्वा–saying अन्तर्हिता बभूव–disappeared.

Oh king, having been praised by the Devas for the sake of the world and for their own sake expressing assent, the Devi, Bhadrakali dis-appeared.

40. इत्येतत्कथितं भूप सम्भूता सा यथा पुरा ।
देवी देवशरीरेभ्यो जगत्त्रयहितैषिणी ।।

हे भूप, जगत्त्रयहितैषिणी सा देवी पुरा देवशरीरेभ्यो यथा सम्भूता इति एतत् कथितं ।

हे भूप–Oh king जगत्त्रयहितैषिणि सा देवी–Devi who desires the welfare of the three worlds पुरा–in old days देवशरीरेभ्यो–from the bodies of the Devas यथा सम्भूता how was born इति–thus एतत् कथितं–I have told you this.

**Thus Oh king, I have narrated to you how the Devi who desires always the welfare of the universe was born from the bodies of the Devas.**

41. पुनश्च गौरीदेहा सा समुद्भूता यथाभवत् ।

42. वधाय दुष्टदैत्यानां तथा शुम्भनिशुम्भयोः
रक्षणाय च लोकानां देवानामुपकारिणी ।
तच्छृणुष्व मयाख्यातं यथावत्कथयामि ते ।

देवानां उपकारिणी सा दुष्टदैत्यानां तथा शुम्भनिशुम्भयोः च वधाय यथा पुनः गौरीदेहा समुद्भूता अभवत् मया आख्यातं तत् शृणुष्व । अहं यथावत् ते कथयामि ।

देवानां–of the Devas उपकारिणी-benefactress सा–that Devi-दुष्टदैत्यानां–of the wicked Asuras तथा-in the same way शुम्भनिशुम्भयोः-of Sumbha and Nisumbha वधाय–for killing यथा–how नः पुन–



again गौरीदेहात्–from the body of Gowri समुद्भूता अभवत्–was born मया आख्यातम्–told by me तत् शृणुष्व–hear that अहं–I will ते–you यथावत्–truely कथयामि–tell

**Desirous of doing good to the Devas how the Devi appeared from the body of Gouri for slaying the Asuras and also Sumbha and Nisumbha the two wicked demons and thus doing good to the Devas. This I shall duly narrate to you. Please listen.**

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये शक्रादिस्तुतिर्नाम चतुर्थोऽध्यायः ।।

---

# अथ पञ्चमोऽध्याय:

1. ॐ ऋषिरुवाच ॥

ऋषि: उवाच ।–The sage said

2. पुरा शुम्भनिशुम्भाभ्यामसुराभ्यां शचीपते: ।
त्रैलोक्यं यज्ञभागाश्च हृता मदबलाश्रयात् ॥

पुरा शुम्भनिशुम्भाभ्याम् असुराभ्यां शचीपते: त्रैलोक्यं यज्ञभागा: च मदबलाश्रयात् हृता: ।

पुरा–in olden times शुम्भनिशुम्भाभ्यां असुराभ्यां–by the two Asuras Sumbha and Nisumbha शचीपते:-of Indra त्रैलोक्यं-the three worlds यज्ञभागा: च–Portion of sacrifices due to him मदबलाश्रयात्–by force of their pride and strength हृता:–were forcibly taken.

In olden days the two Asuras named Sumbha and Nisumbha, by their strength and pride took away from Indra his sovereignity over the three worlds as well as the portion due to him during sacrifices performed on earth.

3. तावेव सूर्यतां तद्वदधिकारं तथैन्दवम् ।
कौबेरमथ याम्यं च चक्राते वरुणस्य च ॥



तौ एव सूर्यतां तथा ऐन्दवं अधिकारं च चक्राते। अथ कौबेरं याम्यं च तद्वत् वरुणस्य च अधिकारं तौ एव चक्राते ।

तौ एव-both of them सूर्यतां-Sun God's तथा–same way ऐन्दवं-the moon's अधिकारं च–Duties चक्राते-they performed अथ-then कौबेरं-that of Kubera याम्यं च-of Yama तद्वत्–and the same way वरुणस्य च-of Varuna अधिकारं-Offices तौ एवं चक्राते–they themselves administered.

**Both of them together took over the office of the Sun, the moon, Kubera, Yama and Varuna.**

4. तावेव पवनर्द्धिम् च चक्रतुर्वह्निकर्म च ।
ततो देवा विनिर्धूता भ्रष्टराज्या: पराजिता: ॥

तौ एव पवनार्द्धि वह्निकर्म च चक्रतु: । तत: देवा: पराजिता: भ्रष्टराज्या: विनिर्धूता: ।

तौ एव–they themselves पवनर्द्धि duties of Vayu वह्निकर्म च duties of Agni चक्रतु:-performed तत:–therefore देवा: the Gods पराजिता:–defeated. भ्रष्टराज्या:–deprived of their country विनिर्द्धूता:–driven away.

**O, king, they themselves took over the duties of Vayu and the fire God. Since they had no authority the Gods were easily defeated even without fight by the two Asuras and driven away.**

5· हृताधिकारास्त्रिदशास्ताभ्यां सर्वे निराकृता: ।
महासुराभ्यां तां देवीं संस्मरन्त्यपराजिताम् ॥

सर्वे त्रिदशा:ताभ्यां महासुराभ्यां हृताधिकारा: निराकृता: अपराजितां तां देवीं संस्मरान्ति स्म ।

सर्वे-all त्रिदशा:-the Devas ताभ्यां महासुराभ्यां-by those great demons हृताधिकारा:- deprived of all powers निराकृता:-and driven away तां-that अपराजिताम्-undefeatable देवीं-Devi संस्मरन्ति स्म-remembered.

When they were thus deprived of their powers and driven away, all the Devas thought of that invincible Devi.

6· तयास्माकं वरो दत्तो यथापत्सु स्मृताखिला: ।
भवतां नाशयिष्यामि तत्क्षणात्परमापद: ॥

तया अस्माकं वर: दत्त: यथावत् संस्मृता अहं भवतां अखिला: परमापद: तत्क्षणात् नाशयिष्यामि ।

तया-by her अस्माकं-for us वर: दत्त:-boon has been given यथावत्-whenever संस्मृता-remembered अहं-I भवतां-your अखिला: परमापद:-all great dangers तत्क्षणात्-at once नाशयिष्यामि-will destroy.

A boon has been given to us by the Devi-'whenever you remember me in great dangers, I will atonce ward off all the calamities and protect you.



7. इति कृत्वा मतिं देवा हिमवन्तं नगेश्वरम् ।
जग्मुस्तत्र ततो देवीं विष्णुमायां प्रतुष्टुवु: ॥

इति मतिं कृत्वा देवा: हिमवन्तं नगेश्वरम् जग्मु: । तत: तत्र देवीं विष्णुमायां प्रतुष्टुवु: ।

इति मतिं कृत्वा-having decided thus देवा:-the Devas हिमवन्तं-Himavan नगेश्वरम्-Lord of mountains जग्मु:-went तत:-then तत्र-there देवीं विष्णुमायां-Devi, the illusive power of Vishnu प्रतुष्टुवु:-praised highly.

The Devas having decided thus went to Himavan, the Lord of mountains. There they extolled Devi—the illusive power of Vishnu.

8· देवा उचु: ।

देवा: उचु:-The Devas said

9. नमो देव्यै महोदेव्यै शिवायै सततं नम: ।
नम: प्रकृत्यै भद्रायै नियता: प्रणता: स्म ताम् ।

देव्यै नम: । महादेव्यै शिवायै सततं नम: । प्रकृत्यै भद्रायै नम: । तां नियतां प्रणता: स्म ।

देव्यै नम:-satulation to Devi महादेव्यै शिवायै-Mahadevi Siva सततं नम:-saltuation always प्रकृत्यै-primordial power भद्रायै-sustainig power नम:-saltutation ताम्-her नियता:-attentive प्रणता: स्म-we bow to her.

Salutations to Devi—Salutation to Goddess of all Gods. Salutation to Sivaa the auspicious. Salutation to primordial power. Salutations to the bestower of every thing good. We in all humility bow to her.

10. रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः ।
ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नमः ॥

रौद्रायै ते नमः । नित्यायै गौर्यै धात्र्यै ते नमः । चन्द्रायै ज्योत्स्नायै सुखायै सततं नमः ।

रौद्रायै-to you who is terrible ते नमः-salutations to her नित्यायै-to the eternal गौर्यै-to Gowri धात्र्यै-who is the supporter नमः-salutations चन्द्रायै-in the form of the moon. ज्योत्स्नायै नमः-who is the moon light. सुखायै-who is happiness itself ते नमः-salutations to you.

Salutations to you who is terrible, salutations to you who is eternal, Salutations to Goury who is the supporter, Salutations to you in the form of moon as well as moon light.

11. कल्याण्यै प्रणता वृद्ध्यै सिद्ध्यै कुर्मो नमो नमः ।
नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः ॥

कल्याण्यै प्रणताः । वृद्ध्यै नमः, सिद्ध्यै नमः, कुर्मः । नैर्ऋत्यै नमः, भूभृतां लक्ष्म्यै नमः, शर्वाण्यै ते नमो नमः ।



कल्याण्यै who is welfare प्रणताः-we bow वृद्ध्यैः-who is prosperity सिद्ध्यै-who is success नमः कुर्मः salutations नैर्ऋत्यै नमः salutations to destruction भूभृतां लक्ष्म्यै नमः-prosperity of the kings शर्वाण्यै ते नमो नमः-salutations to the consort of Siva.

We salute her, who is welfare. Salutations to her who is prosperity and success. Salutations to her, who is destruction. Salutations to her who is prosperity to the kings and salutations to the consort of siva.

12. दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै ।
ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः ॥

दुर्गपारायै दुर्गायै नमः, सारायै नमः, सर्वकारिण्यै नमः । ख्यात्यै नमः, तथा एव कृष्णायै, धूम्रायै सततं नमः ।

दुर्गपारायै-who takes one across in difficulties दुर्गायै नमः salutation to Durga सारायै नमः-salutation to her who is the essence सर्वकारिण्यै नमः-salutations to the author of every thing ख्यात्यै नमः-to knowledge तथा एव-as well as कृष्णायै-who is blue black धूम्रायै-and smoke colour सततं नमः-bow down always.

Our salutation to Durga, who takes us across all difficulties. Salutation to the essence of every thing. Salutationto the cause of everything.

Salutations to her who is knowledge and who is blue black and smoke like in colour.

13. अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः ।
नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ॥

अतिसौम्यातिरौद्रायै तस्यै नताः नमः नमः । जगत्प्रतिष्ठायै नमः । देव्यै नमः, कृत्यै नमः ।

अतिसौम्यातिरौद्रायै तस्यै नताः नमो नमः–our prostration to her who is at once most gentle and most terrible We salute her again and again. जगत्प्रतिष्ठायै नमः–salutations to her who is the support of the universe देव्यैः नमः, कृत्यैः नमः–salutations to her who is action itself.

We prostrate before the Devi who is atonce most gentle and atonce most terrible. Again we prostrate before her who is the support of the universe and again we salute her who is of the form of action.

14–16. या देवी सर्वभूतेषु विष्णुमायेति शब्दिता ।
नमस्तस्यै, नमस्तस्यै, नमस्तस्यै नमो नमः ॥

या देवी सर्वभूतेषु विष्णुमायेति शब्दिता नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ।

सर्वभूतेषु–in all beings या देवी–which Devi विष्णुमाया इति शब्दिता–is called Vishnumaya तस्यै नमः–prostrations to her.



Salutations to that Devi who as Vishnumaya resides in all beings. To her our salutations again and again.

17–19. या देवी सर्वभूतेषु चेतनेत्यभिधीयते ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

सर्वभूतेषु चेतना इति या देवी अभिधीयते तस्यै नमः, तस्यै नमः, तस्यै नमः ।

सर्वभूतेषु–in all beings चेतना इति–called as conciousness या देवी–which Devi अभिधीयते–is called तस्यै नमः–prostration to her.

Our prostration to that Devi who is called consciousness in all beings. (consciousness in all beings is Devi herself)

20–22. या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

सर्वभूतेषु या देवी बुद्धिरूपेण संस्थिता तस्यै नमः ।

सर्वभूतेषु–in all beings या देवी–which Devi बुद्धिरूपेण–in the form of intelligence संस्थिता–resides तस्यै नमः–to her our prostration.

Our prostration to that Devi who resides in all beings in the form of intelligence.

23–25. या देवी सर्वभूतेषु निद्रारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

सर्वभूतेषु या देवी निद्रारूपेण संस्थिता तस्यै नमः तस्यै नमः तस्यै नमः ।

सर्वभूतेषु–in all beings या देवी–which Devi निद्रारूपेण–in the form of sleep संस्थिता–exists तस्यै नमः–to her our prostration.

Our prostrations to that Devi who exists as sleep in all beings. Again and again our salutation.

26–28. या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

सर्वभूतेषु या देवी क्षुधारूपेण संस्थिता तस्यै नमः, तस्यै नमः, तस्यै नमः नमः ।

सर्वभूतेषु–in all beings या देवी–which Devi क्षुधारूपेण–संस्थिता–exists in the form of hunger तस्यै नमः–to her our prostration

Our salutations to the Devi who dwells in all beings in the form of hunger, our prostration and our salutation again and again.

29–31. या देवी सर्वभूतेषु छायारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ।

सर्वभूतेषु-in all beings या देवी–which Devi छायारूपेण संस्थिता–exists in the form of reflection तस्यै नमः–our prostrations to her नमः नमः–again. and again.



To that Devi who abides in all beings in the form of reflection, we offer our prostrations—salutations again and again.

32–34. या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता ।
नमस्तस्यै, नमस्तस्यै, नमस्तस्यै नमो नमः ॥

सर्वभूतेषु या देवी शक्तिरूपेण संस्थिता तस्यै नमः नमः नमः ।

सर्वभूतेषु-in all beings या देवी–which Devi शक्तिरूपेण संस्थिता- exists in the form of strength तस्यै नमः–prostrations to her नमः नमः–again and again.

To that Devi who exists in all beings in the form of power or strength, we offer our prostrations again and again.

35-37. या देवी सर्वभूतेषु तृष्णारूपेण संस्थिता ।
नमस्तस्यै, नमस्तस्यै, नमस्तस्यै नमो नमः ॥

सर्वभूतेषु या देवी तृष्णारूपेण संस्थिता तस्यै नमः, नमो नमः ।

सर्वभूतेषु–in all beings या देवी–which Devi तृष्णारूपेण संस्थिता–exists in the form of thirst तस्यै नमः–our prostrations to her नमः नमः–our salutations again and again.

To that Devi who exists in all beings in the form of thirst we offer our prostration again and again.

38-40· या देवी सर्वभूतेषु क्षान्तिरूपेण संस्थिता ।
नमस्तस्यै, नमस्तस्यै, नमस्तस्यै नमो नमः ॥

सर्वभूतेषु या देवी क्षान्तिरूपेण संस्थिता तस्यै नमः, नमः नमः ।

सर्वभूतेषु-in all beings या देवी-the Devi who क्षान्तिरूपेण संस्थिता-exists in the form of forbearance तस्यै नमः-to her our prostrations.

To that Devi who exists in all Beings as forbearance, we offer our prostrations again and again and our salutations.

41-43. या देवी सर्वभूतेषु जातिरूपेण संस्थिता ।
नमस्तस्यै, नमस्तस्यै, नमस्तस्यै नमो नमः ॥

सर्वभूतेषु या देवी जातिरूपेण संस्थिता तस्यै नमः ।

जातिरूपेण-as genus, origin of each group.

To that Devi who exists in all beings as the origin (genus) of everything, to her our prostrations.

44-46· या देवी सर्वभूतेषु लज्जारूपेण संस्थिता ।
नमस्तस्यै, नमस्तस्यै, नमस्तस्यै नमो नमः ॥

सर्वभूतेषु या देवी लज्जारूपेण संस्थिता तस्यै नमः ।

सर्वभूतेषु-in all beings या देवी-Devi who लज्जारूपेण-in the form of modesty संस्थिता-exists



To that Devi who exists in all beings as modesty our prostrations.

47-49· या देवी सर्वभूतेषु शान्तिरूपेण संस्थिता ।
नमस्तस्यै, नमस्तस्यै, नमस्तस्यै नमो नमः ॥

सर्वभूतेषु या देवी शान्तिरूपेण संस्थिता तस्यै नमः ।

सर्वभूतेषु-in all beings या देवी-the Devi who शान्तिरूपेण-in the form of peace संस्थिता-exists तस्यै नमः-our prostrations.

To that Devi who abides in all beings in the form of peace, our prostrations.

50-52· या देवी सर्वभूतेषु श्रद्धारूपेण संस्थिता ।
नमस्तस्यै, नमस्तस्यै, नमस्तस्यै नमो नमः ॥

सर्वभूतेषु या देवी श्रद्धारूपेण संस्थिता तस्यै नमः ।

सर्वभूतेषु in all beings या देवी-which Devi श्रद्धारूपेण संस्थिता-exists in the form of faith तस्यै-नमः-our prostrations to her

To that Devi who exists in all beings in the form of faith, our prostrations and salutations again and again

53-55· या देवी सर्वभूतेषु कान्तिरूपेण संस्थिता ।
नमस्तस्यै, नमस्तस्यै, नमस्तस्यै नमो नमः ॥

सर्वभूतेषु या देवी कान्तिरूपेण संस्थिता तस्यै नमः ।

सर्वभूतेषु–in all beings या देवी–which Devi कान्तिरूपेण–in the form of loveliness संस्थिता-exists तस्यै नमः–prostration to her.

To that Devi who exists in all beings in the form of beauty our prostrations and salutations.

56–58 या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता ।
नमस्तस्यै, नमस्तस्यै, नमस्तस्यै नमो नमः ॥

सर्वभूतेषु या देवी लक्ष्मीरूपेण संस्थिता तस्यै नमः ।

सर्वभूतेषु-in all beings या देवी-that Devi who लक्ष्मीरूपेण–in the form of good fortune संस्थिता–exists तस्यै नमः-prostrations to her.

To the Devi who exists in all beings in the form of good fortune our prostration.

59–61. या देवी सर्वभूतेषु वृत्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

सर्वभूतेषु – in all beings या देवी – which Devi वृत्तिरूपेण–in the form of activity संस्थिता–exists तस्यै नमः–prostration to her.

To the Devi who exists in all beings as activity, prostration again and again to her.



62–64. या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता ।
नमस्तस्यै, नमस्तस्यै, नमस्तस्यै नमो नमः ॥

सर्वभूतेषु या देवी स्मृतिरूपेण संस्थिता तस्यै नमः ।

सर्वभूतेषु–in all beings या देवी–the Devi who स्मृतिरूपेण–in the form of memory संस्थिता–exists तस्यै नमः–to her our prostration.

To the Devi who exists in all beings in the form of memory, prostration to her again and again.

65–67. या देवी सर्वभूतेषु दयारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

सर्वभूतेषु या देवी दयारूपेण संस्थिता तस्यै नमः ।

सर्वभूतेषु–in all beings या देवी the Devi who दयारूपेण-in the form of kindness संस्थिता-exists तस्यै नमः–prostration to her again and again.

To that Devi who exists in all beings in the form of kindness, to her our prostration.

68–70. या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥

सर्वभूतेषु या देवी तुष्टिरूपेण संस्थिता तस्यै नमः ।

सर्वभूतेषु–in all beings या देवी- the Devi who तुष्टिरूपेण–in the form of contentment संस्थिता–exists तस्यै नमः–prostrations to her.

To the Devi who exists in all beings in the form of contentment to her prostrations again and again.

71–73. या देवी सर्वभूतेषु मातृरूपेण संस्थिता ।
नमस्तस्यै, नमस्तस्यै, नमस्तस्यै नमो नमः ।।

सर्वभूतेषु या देवी मातृरूपेण संस्थिता तस्यै नमः ।

सर्वभूतेषु-in all beings या देवी–the Devi who मातृरूपेण–in the form of mother संस्थिता–exists तस्यै नमः-prostration to her.

To that Devi who exists in all beings in the form of mother, prostration to her again and again.

74–76. या देवी सर्वभूतेषु भ्रान्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ।।

सर्वभतेषु या देवी भ्रान्तिरूपेण संस्थिता तस्यै नमः ।

सर्वभूतेषु-in all beings या देवी- the Devi who भ्रान्तिरूपेण-in the form of delusion संस्थिता-exists तस्यै नमः-prostration to her.

To that Devi who exsits in all beings in the form of delusion our prostration again and again.

77. इन्द्रियाणामधिष्ठात्री भूतानां चाखिलेषु या ।
भूतेषु सततं, तस्यै व्याप्तिदेव्यै नमो नमः ।।



या अखिलेषु भूतेषु सततं भूतानां इन्द्रियाणां च अधिष्ठात्री, तस्यै व्याप्तिदेव्यै नमो नमः ।

या–who अखिलेषु-in all भूतेषु–beings भूतानां-of all beings इन्द्रियाणा च–senses अधिष्ठात्री–who presides अखिलेषु भूतेषु-in all beings व्याप्तिदेव्यै–to that prevading Devi नमो नमः-our prostration.

To that Devi who presides in all beings and is the presiding deity of senses of all beings to that Devi our prostration.

78–80. चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगत् ।
नमस्तस्यै, नमस्तस्यै, नमस्तस्यै नमो नमः ।।

या चितिरूपेण एतत् कृत्स्नं जगत् व्याप्य स्थिता तस्यै नमः ।

या–which Devi चितिरूपेण–in the form of consciousness एतत्-this कृत्स्नं जगत्-entire universe व्याप्य–pervading स्थिता–exists तस्यै–to her नमः–prostration.

To that Devi who pervades this entire world in the form of consciousness, to her prostration again and again.

81. स्तुता सुरैः पूर्वमभीष्टसंश्रया-
त्तथा सुरेन्द्रेण दिनेषु सेविता ।
करोतु सा नः शुभहेतुरीश्वरी
शुभानि भद्राण्यभिहन्तु चापदः ।।

या पूर्वं अभीष्टसंश्रयात् सुरेन्द्रेण दिनेषु सेविता सा शुभहेतुः ईश्वरी नः शुभानि भद्राणि करोतु आपदः अभिहन्तु च ।

या-which Devi पूर्वं-in old times अभीष्ट संश्रयात्-for achieving desired object सुरेन्द्रेण-by Indra दिनेषु सेविता-adored every day सा-that Devi शुभहेतुः ईश्वरी-the Goddess who is the source of all good शुभानि-auspicious भद्राणी-good things करोतु-may give आपदः-dangers अभिहन्तु च-also ward off.

That Devi who in olden days is invoked by the Devas and propitiated by the Lord of the Devas every day to get their desires fulfilled may that Devi who is the source of everything good and prosperous bless us and ward off all the calamities.

82. या साम्प्रतं चोद्धतदैत्यतापितै-
रस्माभिरीशा च सुरैर्नमस्यते ।
या च स्मृता तत्क्षणमेव हन्ति नः
सर्वापदो भक्तिविनम्रमूर्तिभिः ।।

या साम्प्रतं उद्धतदैत्यतापितैः अस्माभिः सुरैः ईशा च नमस्यते या च भक्तिविनम्रमूर्तिभिः स्मृता तत्क्षणमेव नः सर्वं आपदः हन्ति च ।

या-that Devi साम्प्रतं-now उद्धतदैत्यतापितैः-tormented by the arrogant Asuras अस्माभिः-by us



सुरैः च-and the Devas ईशा च-by Brahma या च-and who भक्तिविनम्रमूर्तिभिः-who are bent with devotion स्मृता-remembered तत्क्षणमेव-the same moment नः-our सर्वं आपदः-all calamities हन्ति च-destroys.

That Devi who is propitiated by us Devas who are tormented by arrogant Asuras as soon as she is remembered by us with reverence and devotion destroys all calameties and protect us, to her our prostration.

83. ऋषिरुवाच ।

ऋषिरुवाच-The sage said.

84. एवं स्तवादियुक्तानां देवानां तत्र पार्वती ।
स्नातुमभ्याययौ तोये जाह्नव्या नृपनन्दन ।।

नृपनन्दन एवं स्तवादियुक्तानां देवानां तत्र पार्वती जाह्नव्या तोये स्नातुं अभ्याययौ ।

नृपनन्दन-Oh king एवं स्तवादियुक्तानां-while engaged in praises and such other acts तत्र-there पार्वती-the Goddess Parvathy जाह्नव्याः तोये-in the waters of the Ganges स्नातुं-to bathe अभ्याययौ-came.

Oh king, while the Devas were engaged in praises and such other acts, Parvathy came there to bathe in the Ganges.

85· साब्रवीत्तान् सुरान् सुभ्रूर्भवद्भिः स्तूयतेऽत्र का ।
शरीरकोशतश्चास्याः समुद्भूताऽब्रवीच्छिवा ॥

सा तान् सुरान् अब्रवीत् । अत्र भवद्भिः का सुभ्रूः स्तूयते । अस्या शरीरकोशतः शिवा समुद्भूय अब्रवीत् च ।

सा–she तान्–to those सुरान्–Devas अब्रवीत्–said अत्र–here भवद्भिः–by you का सुभ्रूः–which beautiful one स्तूयते–is praised अस्याः–from her शरीरकोशात् – body शिवा – auspicious goddess समुद्भूय–appearing अब्रवीत् च–spoke

She said to the Devas, whom are you praising here? At the same time an auspicious goddess sprung forth from her body and gave the reply.

86· स्तोत्रं ममैतत्क्रियते शुम्भदैत्यनिराकृतैः ।
देवैः समेतैः समरे निशुम्भेन पराजितैः ॥

समरे शुम्भदैत्यनिराकृतैः निशुम्भेन पराजितैः समेतैः देवैः मम एतत् स्तोत्रम् क्रियते ।

समरे–in the battle शुम्भ दैत्यनिराकृतैः–routed by Sumbha. निशुंभेन–by Nisumbha पराजितैः–defeated समेतैः देवैः–by all Devas मम–my एतत् स्तोत्रम्–this hymn क्रियते–is sung.

This hymn is addressed to me by the Devas who were routed by Sumbha and by all Devas defeated by Nisumbha.



87· शरीरकोशाद्यत्तस्याः पार्वत्या निःसृताम्बिका ।
कौशिकीति समस्तेषु ततो लोकेषु गीयते ॥

यत् तस्याः पार्वत्याः शरीरकोशात् अंबिका निःसृता ततः समस्तेषु लोकेषु कौशिकी इति गीयते ।

तस्याः– that पार्वत्याः– Parvati's शरीरकोशात् –physical sheath निःसृता–came out अम्बिका–Ambika ततः–therefore समस्तेषु लोकेषु–in all the worlds कौशिकी–Kausiki इति गीयते–is praised.

Since this goddess Ambika came forth from the physical sheath (body) of Parvati she is praised as Kausiki through out the worlds.

88· तस्यां विनिर्गतायां तु कृष्णाभूत्सापि पार्वती ।
कालिकेति समाख्याता हिमाचलकृताश्रया ॥

सा पार्वती अपि तस्यां विनिर्गतायां तु कृष्णा अभूत् । कालिका इति समाख्याता हिमाचलकृताश्रया ।

सा पार्वती अपि – that Parvathi also तस्यां विनिर्गतायां तु–when that Kausiki issued forth कृष्णा अभूत्–became black कालिका इति– by name Kalika समाख्याता–well known हिमाचलकृताश्रया – abiding at Himalayas.

After Kausiki came out of the body of Parvati, Parvathi became black and came to dwell at Himalayas.

89. ततोऽम्बिकां परं रूपं बिभ्राणां सुमनोहरम् ।
दर्दश चण्डो मुण्डश्च भृत्यौ शुम्भनिशुम्भयो: ।

ततः सुमनोहरं परं रूपं बिभ्राणां अम्बिकां शुम्भनिशुम्भयो: भृत्यौ चण्डः मुण्डः च ददर्श ।

ततः–afterwards परं–extremely सुमनोहरं–beautiful रूपं–form बिभ्राणां–possessing अम्बिकां–Ambika शुम्भनिशुम्भयो:–of Sumbha and Nisumbha भृत्यौ–servants चण्डः मुण्डः च–Chanda and Munda ददर्श–saw.

Then the two servants of Sumbha and Nisumbha named Chanda and Munda saw that Devi Ambika possessing that supremely beautiful form.

90. ताभ्यां शुम्भाय चाख्याता सातीव सुमनोहरा ।
काप्यास्ते स्त्री महाराज भासयन्ती हिमाचलम् ।।

ताभ्यां शुम्भाय च आख्याता महाराज हिमाचलं भासयन्ती अतीव सुमनोहरा स्त्री का अपि आस्ते ।

ताभ्यां-by them शुंभाय च–Sumbha आख्याता–was told महाराज–Oh king हिमाचलं-the Himalayas भासयन्ती–illumining का अपि–an extremely अतीव सुमनोहरा स्त्री-beautiful lady आस्ते–dwells.

They went and told Sumbha, O' king there is a certain lady extremely beautiful who by her extra-ordinary beauty is shedding lustre on the Himalayas.



91. नैव तादृक् क्वचिद्रूपं दृष्टं केनचिदुत्तमम् ।
ज्ञायतां काप्यसौ देवी गृह्यतां चासुरेश्वर ।।

तादृक् उत्तमं रूपं क्वचित् केनचित् च न दृष्टं एव । असुरेश्वर असौ देवी का ज्ञायतां गृह्यतां अपि ।

तादृक् उत्तमम् रूपं-such supreme beauty क्वचित्-any where केनचित् च–by any one न दृष्टं एव–has not been seen असुरेश्वर-Lord of Asuras असौ देवी–this Devi का ज्ञायतां–try to find out who she is गृह्यतां अपि–and take possession of her.

O! Lord of the Asuras! such celestial beautiful form nobody has seen anywhereelse. Please find out who she is and try to take her as your own.

92. स्त्रीरत्नमतिचार्वङ्गी द्योतयन्ती दिशस्त्विषा ।
सा तु तिष्ठति दैत्येन्द्र तां भवान् द्रष्टुमर्हति ।

दैत्येन्द्र! सा अतिचार्वङ्गी स्त्रीरत्नं त्विषा दिशः द्योतयन्ती तिष्ठति भवान् तां द्रष्टुं अर्हति ।

दैत्येन्द्र–Oh king of Asuras अतिचार्वङ्गी-that most beautiful स्त्रीरत्नं-jewel of women त्विषा-with lustre दिशः-all the quarters द्योतयन्ती–illumining तिष्ठति remains भवान्–Lord तां-her द्रष्टुं–to see अर्हति–be fitting.

Oh! king of Asuras, with her supreme beauty and shedding lustre over all quarters.

she remains there. You ought to go and see her.

93. यानि रत्नानि मणयो गजाश्वादीनि वै प्रभो ।
त्रैलोक्ये तु समस्तानि साम्प्रतं भान्ति ते गृहे ।।

प्रभो, त्रैलोक्ये तु यानि रत्नानि मणयः गजाः, अश्वादीनि च तानि समस्तानि साम्प्रतं ते गृहे भान्ति ।

प्रभो-Oh, king त्रैलोक्ये तु-in all the three worlds यानि – whatever रत्नानि – jewels मणयः – precious stones गजाः-elephants अश्वादीनि च-horses etc. तानि-they समस्तानि-all साम्प्रतं-now ते गृहे-in your house भान्ति-shine.

Oh, king whatever jewels and diamonds there are in the three worlds, they all shine in your house at present.

94. ऐरावतः समानीतो गजरत्नं पुरन्दरात् ।
पारिजाततरुश्चायं तथैवोच्चैःश्रवा हयः ।।

पुरन्दरात् गजरत्नं ऐरावतः समानीतः तथा उच्चैःश्रवाः हयः च समानीतः ।

पुरन्दरात्-from Indra गजरत्नं ऐरावतः-Iravata अयं-the jewel पारिजाततरुः च-this tree parijata तथा-again उच्चैःश्रवाः हयः च-and the horse Uchhaihsravas समानीतः-was brought.



From the abode of Indra, Airavata the jewel among elephants, this celestial tree parijata, and the celestial horse Uchhaisravas have been brought here.

95. विमानं हंससंयुक्तमेतत्तिष्ठति तेऽङ्गणे ।
रत्नभूतमिहानीतं यदासीद्वेधसोऽद्भुतम् ।।

ते अङ्गणे हंससंयुक्तं एतत् विमानं तिष्ठति यत् वेधसः रत्नसंभूतं अद्भूतं आसीत् ।

ते अङ्गणे-in your court-yard हंससंयुक्तं-yoked with swans एतत् विमानं-this chariot तिष्ठति-is present यत्-which वेधसः-Brahma's रत्नसंभूतं अद्भुतं-a wonder with gems आसीत्-was.

This chariot yoked with swans which once belonged to Brahma and is a wonder among gems now stands in your court-yard.

96. निधिरेष महापद्मः समानीतो धनेश्वरात् ।
किञ्जल्किनीं ददौ चाब्धिर्मालामम्लानपङ्कजाम् ।।

एषः निधिः महापद्मः धनेश्वरात् समानीतः अब्धिः अम्लानपङ्कजाम् किञ्जिल्किनीम् मालां च ददौ ।

एष निधिः-this treasure महापद्मः-named Mahapadma धनेश्वरात्-from Kubera समानीतः-brought अब्धिः-the ocean अम्लानपङ्कजाम्-unfading lotuses

किञ्जल्किनीं–with filaments मालां च–garland ददौ–gave.

Here is the treasure called Mahapadma brought from Kubera, the lord of wealth and the ocean has given you a garland of never fading lotuses having filaments.

97. छत्रं ते वारुणं गेहे काञ्चनस्रावि तिष्ठति ।
तथाऽयं स्यन्दनवरो यः पुरासीत्प्रजापतेः ।।

ते गेहे काञ्जनस्रवी वारुणं छत्रं तिष्ठति तथा अयं स्यन्दनवरः च पुरा प्रजापतेः आसीत् ।

ते गेहे – in your house काञ्जनस्रावि – which showers gold वारुणं छत्रं–umbrella belonging to Varuna तिष्ठति–exists तथा–in the same way अयं–this स्यन्दनवरः- excellent chariot also यः–which पुरा–in former times प्रजापतेः आसीत्–belonged to Prajapathi.

In your house there is this umbrella which showers gold and which belonged to Varuna. In the same way there is this excellent chariot which belonged to Prajapati in olden times.

98. मृत्योरुत्क्रान्तिदा नाम शक्तिरीश त्वया हृता ।
पाशः सलिलराजस्य भ्रातुस्तव परिग्रहे ।।

मृत्योः उत्क्रान्तिदा नाम शक्तिः ईश त्वया हृता सलिलराजस्य पाशः तव भ्रातुः परिग्रहे ।



मृत्योः–of Yama उत्क्रान्तिता नाम-verily death dealing शक्तिः–weapon ईश–O! Lord त्वया हृता–has been brought by you सलिलराजस्य–of the Lord of पाशः- noose तव भ्रातुः – your brother's परिग्रहे – oceans possession

Oh Lord! the verily death dealing weapon, spear, possessed by Yama, the Lord of death, has been brought by you. And the noose of Varuna, the Lord of ocean is in the possession of your brother.

99. निशुम्भस्याब्धिजाताश्च समस्ता रत्नजातयः ।
वह्निश्चापि ददौ तुभ्यमग्निशौचे च वाससी ।।

अब्धिजाताः समस्ताः रत्नजातयः निशुम्भस्य च वह्निः च अग्निशौचे वाससि च तुभ्यं ददौ ।

अब्धिजाताः–existing in the sea समस्ता रत्नजातयः- all kinds of gems निशुम्भस्य च–are with Nisumbha वह्निः च-fire God अग्निशौचे–purified by fire वाससी च–two garments तुभ्यं ददौ–gave to you.

All kinds of gems produced by sea is in the possession of Nisumbha and also the fire God has given you two dresses purified by fire.

100. एवं दैत्येन्द्र रत्नानि समस्तान्याहृतानि ते ।
स्त्रीरत्नमेषा कल्याणी त्वया कस्मान्न गृह्यते ।।

दैत्येन्द्र एवं समस्तानि रत्नानि ते आहृतानि । एषा कल्याणी स्त्रीरत्नं त्वया कस्मात् न गृह्यते ।

दैत्येन्द्र-Lord of Asuras एवं-in this way समस्तानि रत्नानि-all kinds of gems ते-for you आहृतानि-brought by you एषा कल्याणी-this beautiful स्त्रीरत्नं-lady jewel त्वया-by you कस्मात्-why न गृह्यते-is not taken.

Oh, Lord of Asuras! all kinds of jewels have been brought under your control. And why don't you take this lady jewel also to you?

101. ऋषि: उवाच ।

ऋषि: उवाज-the sage said.

102. निशम्येति वच: शुम्भ: स तदा चण्डमुण्डयो: ।
प्रेषयामास सुग्रीवं दूतं देव्या महासुरम् ।।

तदा शुम्भ: चण्डमुण्डयो: इति वच: निशुम्य महासुरं सुग्रीवं देव्या: दूतं प्रेषयामास ।

तदा शुम्भ:-then Sumbha चण्डमुण्डयो:-of Chanda and Munda इति वच:-these words निशम्य-hearing महासुरम्-great Asura सुग्रीवं-Sugriva देव्या:-to Devi दूतं-as messenger प्रेषयामास-sent.

Hearing these words of Chanda and Munda Sumbha sent the great Asura Surgriva as a messenger to Devi.



103. इति चेति च वक्तव्या सा गत्वा वचनान्मम ।
यथा चाभ्येति सम्प्रीत्या तथा कार्यं त्वया लघु ।।

त्वया मम वचनात् गत्वा सा इति च इति च वक्तव्या सा यथा संप्रीत्या अभ्येति तथा च त्वया कार्यं लघु ।

त्वया-by you मम वचनात्-on my words गत्वा-having gone सा-she इति च इति च-so and so वक्तव्या-should be told यथा-in what way सम्प्रीत्या-joyfully अभ्येति च-come here तथा-in that way त्वया कार्यं-should be done by you लघु-soon.

Go to her and speak to her my words in such a way which will make her gladly come to me. This is what you have to do quickly.

104. स तत्र गत्वा यत्रास्ते शैलोद्देशेऽतिशोभने ।
सा देवी तां तत: प्राह श्लक्ष्णं मधुरया गिरा ।।

यत्र सा देवी अतिशोभने शैलोद्देशे आस्ते स: तत्र गत्वा तत:तां मधुरया गिरा श्लक्ष्णं प्राह ।

यत्र सा देवी-where that Devi अविशोभने-very beautiful शैलोद्देशे-mountain top आस्ते-she was स:-he तत्र गत्वा-went there तत:-then तां-to her मधुरया-in fine and sweet गिरा-words श्लक्ष्णं-nicely प्राह-spoke.

He went there where the Devi was dwelling on a very beautiful mountain top and spoke to her slowly in sweet words.

105· दूत उवाच ।।

दूतः उवाच - the messenger said.

106· देवि दैत्येश्वरः शुम्भस्त्रैलोक्ये परमेश्वरः ।
दूतोऽहं प्रेषितस्तेन त्वत्सकाशमिहागतः ।।

देवि दैत्येश्वरः शुम्भः त्रैलोक्ये परमेश्वरः अहं तेन प्रेषितः दूतः इह त्वत्सकाशं आगतः ।

देवि-Oh, Devi दैत्येश्वरः-Lord of Asuras शुम्भः-Sumbha त्रैलोक्ये-of the three worlds परमेश्वरः-Lord अहं-I तेन-by him प्रेषितः-sent दूतः-messenger इह-here त्वत्सकाशं-your presence आगतः-come.

Oh, Devi, Sumbha, the Lord of the Asuras is the Lord of the three worlds. I have been sent to your presence as his messenger by him.

107· अव्याहताज्ञः सर्वासु यः सदा देवयोनिषु ।
निर्जिताखिलदैत्यारिः स यदाह शृणुष्व तत् ।।

यः सर्वासु देवयोनिषु सदा अव्याहताज्ञः निर्जिताखिलदैत्यारिः सः यत् आह तत् शृणुष्व ।

यः सर्वासु देवयोनिषु-among all Devas सदा-always अव्याहताज्ञः-whose command is never resisted निर्जिताखिलदैत्यारिः who has conquered all the enemies of Asuras सः-he यत् आह-what he said तत् शृणुष्व-you please hear.



Oh Devi, he, whose orders are never resisted by the Devas and he, who has defeated all the enemies of Asuras has sent this message. Please hear.

108· मम त्रैलोक्यमखिलं मम देवा वशानुगाः ।
यज्ञभागानहं सर्वानुपाश्नामि पृथक् पृथक् ।।

अखिलं त्रैलोक्यं मम । देवाः मम वशानुगाः । सर्वान् यज्ञभागान् पृथक् पृथक् अहं उपाश्नामि ।

अखिलं त्रैलोक्यं मम- all the three worlds are mine देवाः मम वशानुगाः- all Devas obey my words सर्वान् यज्ञभागान्-all the parts in offerings in sacrifices पृथक् पृथक्-separately अहं उपाश्नामि-I enjoy.

I am Lord of all this universe. All Devas obey my orders. I am the enjoyer of all the portions of offerings in sacrifices separately.

109· त्रैलोक्ये वररत्नानि मम वश्यान्यशेषतः ।
तथैव गजरत्नं च हृतं देवेन्द्रवाहनम् ।।

त्रैलोक्ये वररत्नानि अशेषतः मम वश्यानि । तथा एव देवेन्द्रवाहनं गजरत्नं च हृतम् ।

त्रैलोक्ये-in the three worlds अशेषतः वररत्नानि-all the best gems मम वश्यानि-are in my possession तथा-in the same way देवेन्द्रवाहनं-the vehicle of

Indra, the king of Devas गजरत्नं च–the gem of elephants also हृतम्–brought by me.

All the best gems in the three worlds are in my possession. In the same way Airavata, the vehicle of Indra and gem of elephants also have been brought by me.

110· क्षीरोदमथनोद्भूतमश्वरत्नं ममामरैः ।
उच्चैःश्रवससंज्ञं तत्प्रणिपत्य समर्पितम् ॥

अमरैः क्षीरोदमथनोद्भूतं उच्चैःश्रवससंज्ञं तत् अश्वरत्नं प्रणिपत्य मम समर्पितम् ।

अमरैः–by the Devas क्षीरोदमथनोद्भूतं–(which) was born when the milk ocean was churned उच्चैःश्रवससंज्ञं by the name Uccaisravas तत् अश्वरत्नं–the gem of horses प्रणिपत्य–having saluted मम समर्पितं–offered to me.

The Devas, after saluting me, have offered me Uccaisravas, the gem of horses, which was born when the milk ocean was churned.

111· यानि चान्यानि देवेषु गन्धर्वेषूरगेषु च ।
रत्नभूतानि भूतानि तानि मय्येव शोभने ॥

हे, शोभने, देवेषु, गन्धर्वेषु, उरगेषु च यानि अन्यानि रत्नभूतानि तानि भूतानि मय्येव च ।

हे शोभने – O' beautiful lady यानि अन्यानि रत्नभूतानि – what ever gems there exist देवेषु,



गन्धर्वेषु, उरगेषु च–with Devas, Gandharvas and the serpents तानि भूतानि–those objects मयि एव–in my possession.

O' beautiful lady, those gems which are in the possession of Devas, Gandharvas and the serpents, all of them are already in my possession.

112· स्त्रीरत्नभूतां त्वां देवि लोके मन्यामहे वयम् ।
सा त्वमस्मानुपागच्छ यतो रत्नभुजो वयम् ॥

देवि! वयम् त्वां लोके स्त्रीरत्नभूता मन्यामहे । सा त्वं अस्मान् उपागच्छ यतः वयं रत्नभुजः ।

देवि–O' Goddess वयम्–we लोके- in the world स्त्रीरत्नभूतां-being jewel among the womankind मन्ये–consider सा त्वं-you अस्मान्-us उपागच्छ–come near, approach यतः-because (for) वयं–we (are) रत्नभुजः-enjoyers of gems.

Oh, Goddess, we consider you as the jewel among the womankind in the whole world. So you have to come to us as we are the enjoyers of all gems.

113· मां वा ममानुजं वापि निशुम्भमुरुविक्रमम् ।
भज त्वं चञ्चलापाङ्गि रत्नभूतासि वै यतः ॥

हे, चञ्चलापाङ्गि, यतः त्वं रत्नभूता असि (ततः) मां वा मम अनुजं उरुविक्रमं निशुम्भं वा अपि भज ।

हे चञ्चलापाङ्गि–Oh lady with unsteady side glances यतः–because त्वं वै रत्नभूता असि–you are the jewel ततः–so मां वा ममानुजं–me or my younger brother उरुविक्रमं निशुम्भं person with great valour Nisumbha वा अपि–or भज–accept.

Oh! lady with unsteady side glances, since you are the brightest jewel, you accept me or my younger brother, Nisumbha, who possesses great valour and strength.

114. परमैश्वर्यमतुलं प्राप्स्यसे मत्परिग्रहात् ।
एतद्बुद्ध्या समालोच्य मत्परिग्रहतां व्रज ॥

मत्परिग्रहात् अतुलं परमं ऐश्वर्यं प्राप्स्यसे । बुद्ध्या एतत् समालोच्य मत्परिग्रहतां व्रज ।

मत्परिग्रहात्–by accepting me अतुलं–matchless परमं–greatest ऐश्वर्यं–prosperity प्राप्स्यसे–you will attain एतत्–this बुद्ध्या–by intelligence समालोच्य–understand परिग्रहतां व्रज–be my wife.

If you become my wife, you will attain great and matchless prosperity. Think obout this with your intelligence and become my wife.

115. ऋषिरुवाच ।

ऋषिः उवाच–the sage said.



116. इत्युक्ता सा तदा देवी गम्भीरान्तःस्मिता जगौ ।
दुर्गा भगवती भद्रा ययेदं धार्यते जगत् ॥

इति उक्ता सा दुर्गा भगवती भद्रा देवी यया इदं जगत् धार्यते, गम्भीरा अन्तःस्मिता जगौ ।

इति उक्ता–being told thus सा दुर्गा भगवती भद्रा देवी–that Devi who is also Durga, Bhagavati, Bhadra यया इदं जगत् धार्यते–and by whom this universe is supported गम्भीरा–serene अन्तःस्मिता–smiling inwards जगौ–said.

When she was told thus, she, who is also Durga, Goddess and auspicious Devi, who is the supporter of this whole universe became serene and smiling inwardly, said :—

117. देव्युवाच ॥

देवी उवाच–the Devi said.

118. सत्यमुक्तं त्वया नात्र मिथ्या किञ्चित्त्वयोदितम् ।
त्रैलोक्याधिपतिः शुम्भो निशुम्भश्चापि तादृशः ॥

त्वया सत्यं उक्तं । त्वया उदितं अत्र किञ्चित् न मिथ्या । शुम्भः त्रैलोक्याधिपतिः । निशुम्भः च अपि तादृशः ।

त्वया सत्यं उक्तं–what you said is truth त्वया उदितं–what you spoke अत्र–in this matter किञ्चित् न मिथ्या–no untruth at all शुम्भः त्रैलोक्याधिपतिः–

Sumbha is the Lord of the three world निशुम्भ: च अपि तादृश:–Nisumbha is also the same.

What you said is truth. There is no untruth in what you said here. Sumbha is the Lord of three worlds Nisumbha also is the same as Sumbha.

119. किं त्वत्र यत्परिज्ञातं मिथ्या तत्क्रियते कथम् ।
श्रूयतामल्पबुद्धित्वात्प्रतिज्ञा या कृता पुरा ॥

किं तु अत्र यत् प्रतिज्ञातं कथं तत् मिथ्या क्रियते अल्पबुद्धित्वात् पुरा या प्रतिज्ञा कृता तत् श्रूयताम् ।

किं तु–but अत्र–in this matter यत् प्रतिज्ञातं–the vow I have taken कथं–how तत्–that मिथ्या क्रियते–make false? अल्पबुद्धित्वात्–because of little intelligence पुरा–old times या प्रतिज्ञा कृता–what vow I took तत् श्रूयताम्–hear that.

How can I break my vow which I had taken? Please hear what vow I took in olden days because of my foolishness.

120. यो मां जयति संग्रामे यो मे दर्पं व्यपोहति ।
यो मे प्रतिबलो लोके स मे भर्ता भविष्यति ॥

य: मां संग्रामे जयति य: मे दर्पं व्यपोहति, य: लोके मे प्रतिबल: स: मे भर्ता भविष्यति ।



य:–who मां–me संग्रामे–in battle जयति–wins मे–my दर्पं व्यपोहति–destroys pride लोके–in the world प्रतिबल:–equal to me in strength स:–he मे भर्ता–my husband भविष्यति–will become.

He who conquers me in battle, he who destroys my pride, he who is equal to me in strength, he will become my husband.

121. तदागच्छतु शुम्भोऽत्र निशुम्भो वा महासुर: ।
मां जित्वा किं चिरेणात्र पाणिं गृह्णातु मे लघु ॥

तत् महासुर: शुम्भ: वा निशुम्भ: अत्र आगच्छतु । मां जित्वा मे पाणिं गृह्णातु । अत्र किं चिरेण लघु ।

तत्–so महासुर: शुम्भ: वा निशुम्भ:–the great Asura Sumbha or Nisumbha अत्र आगच्छतु–let him come मां जित्वा–defeating me मे पाणिं–my hand लघु–easily गृह्णातु–take किं चिरेण–why delay.

So let the great Asura Sumbha or Nisumbha come here. Defeating me let him easily take my hand in marriage. What delay is there? It is so easy.

122. दूत उवाच ॥

दूत: उवाच–the messenger said.

123. अवलिप्तासि मैवं त्वं देवि ब्रूहि ममाग्रत: ।
त्रैलोक्ये क: पुमांस्तिष्ठेदग्रे शुम्भनिशुम्भयो: ॥

देवि, त्वं अवलिप्ता असि । मम अग्रतः त्वं एवं मा ब्रूहि । अद्य त्रैलोक्ये कः पुमान् शुम्भनिशुम्भयोः अग्रे तिष्ठेत् ।

देवि–Oh Devi त्वं अवलिप्ता असि–you are arrogant मम अग्रतः–in my presence त्वं–you एवं मा ब्रूहि–don't speak like this अद्य–today त्रैलोक्ये–in this universe कः पुमान्–which man शुम्भनिशुम्भयोः अग्रे–infront of Sumbha and Nisumbha तिष्ठेत्–will stand.

Oh Devi, you are very arrogant. Don't speak like this, in front of me. Who is there in the three worlds who will stand face to face with Sumbha and Nisumbha. (who can face them?)

124. अन्येषामपि दैत्यानां सर्वे देवा न वै युधि ।
तिष्ठन्ति सम्मुखे देवि किं पुनः स्त्री त्वमेकिका ॥

अन्येषां दैत्यानां सम्मुखे अपि सर्वे देवाः युधि न तिष्ठन्ति वै । देवी त्वं स्त्री एकिका किं पुनः ।

अन्येषां दैत्यानां अपि–of other Asuras also सम्मुखे–in front of सर्वे देवाः–all the Devas युधि–in the battle न तिष्ठन्ति वै–will not stand देवि–Oh Devi स्त्री–a woman एकिका–singly किं पुनः–what to speak of?

Even all the Devas will not be able to face the other Asuras, in battle. Oh Devi you are only a woman and alone. What can you do?



125. इन्द्राद्याः सकला देवास्तस्थुर्येषां न संयुगे ।
शुम्भादीनां कथं तेषां स्त्री प्रयास्यसि सम्मुखम् ॥

शुम्भादीनां येषां संयुगे इन्द्राद्याः सकलाः देवाः न तस्थुः तेषां सम्मुखं कथं स्त्री त्वं प्रयास्यसि ?

शुंभादीनां येषां संयुगे–in front of Sumbha and other Asuras in the battle इन्द्राद्याः सकलाः देवाः–beginning with Indra all the Devas न तस्थुः–did not stand तेषां सम्मुखे–facing them कथं–how स्त्री–a woman त्वं प्रयास्यसि?–you will face?

In the battle with Sumbha and Nisumbha even Indra and other Devas could not face them. Then how can you a woman face them?

126. सा त्वं गच्छ मयैवोक्ता पार्श्वं शुम्भनिशुम्भयोः ।
केशाकर्षणनिर्धूतगौरवा मा गमिष्यसि ॥

मया एव उक्ता सा त्वं शुम्भनिशुम्भयोः पार्श्वं गच्छ । केशाकर्षणनिर्धूतगौरवा मा गमिष्यसि ।

सा त्वं–you मया एव उक्ता–as verily told by me शुम्भनिशुम्भयोः पार्श्वं – the presence of Sumbha and Nisumbha गच्छ–go केशाकर्षणनिर्धूत गौरवा – your dignity lost by your being dragged by hair मा गमिष्यसि–do not go.

As verily told by me you go to Sumbha and Nisumbha. Do not go disgraced being dragged by hair.

127· देव्युवाच ॥

देवी उवाच–the Goddess said.

128· एवमेतद् बली शुम्भो निशुम्भश्चातिवीर्यवान् ।
किं करोमि प्रतिज्ञा मे यदनालोचिता पुरा ॥

एवं एतत् । शुम्भः बली । निशुम्भः अपि वीर्यवान् च । किं करोमि यत् मे पुरा अनालोचिता प्रतिज्ञा कृता ।

एवं एतत्–so it is शुम्भः–Sumbha बली–strong निशुम्भः–Nisumbha अपि-also वीर्यवान् च-strong किं करोमि–what shall I do ? यत्-that पुरा–long ago मे अनालोचिता–without fore thought my प्रतिज्ञा–vow (taken) कृता–was made.

**As you say both Sumbha and Nisumbha are extremely powerful and strong. What can I do? Since I have taken the vow long ago without forethought.**

129· स त्वं गच्छ मयोक्तं ते यदेतत्सर्वमादृतः ।
तदाचक्ष्वासुरेन्द्राय स च युक्तं करोतु यत् ॥

सः त्वं गच्छ । मया ते उक्तं यत् तत् एतत् सर्वं आदृतः असुरेन्द्राय आचक्ष्व । स च यत् युक्तं तत् करोतु ।

सः त्वं-you गच्छ–go back मया–by me उक्तं–told यत् एतत्–that which तत् सर्वं–all that आदृतः–respectfully असुरेन्द्राय–to the Lord of the Asuras



आचक्ष्व–tell सः च–let him यत् युक्तं–what is proper करोतु–let him do.

**You go back and with respect tell the Lord of the Asuras what I have spoken here. Let him do what is proper.**

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
देव्या दूतसंवादो नाम पञ्चमोऽध्यायः ॥

---

# अथ षष्ठोऽध्यायः

1· ऋषिरुवाच ।।

ऋषि: उवाच-the Rishi said.

2· इत्याकर्ण्य वचो देव्याः स दूतोऽमर्षपूरितः ।
समाचष्ट समागम्य दैत्यराजाय विस्तरात् ।।

इति देव्याः वचः आकर्ण्य सः दूतः अमर्षपूरितः समागम्य दैत्यराजाय विस्तरात् समाचष्ट ।

इति-in this manner देव्याः वचः आकर्ण्य-hearing the words of the goddess स दूतः-that messenger अमर्षपूरितः-became angry समागम्य-and approaching the Lord of Asuras दैत्यराजाय-to the Lord of Asuras विस्तरात् समाचष्ट-told in detail.

That messenger hearing these words of the goddess became very angry and approaching the Lord of Asuras told him in detail what happened.

3· तस्य दूतस्य तद्वाक्यमाकर्ण्यासुरराट् ततः ।
सक्रोधः प्राह दैत्यानामधिपं धूम्रलोचनम् ।।

तस्य दूतस्य तत् वाक्यम् आकर्ण्य ततः असुरराट् सक्रोधः दैत्यानाम् अधिपं धूम्रलोचनं प्राह ।

तस्य दूतस्य-of that messenger तत् वाक्यम्-that word आकर्ण्य-hearing ततः-then असुरराट्-king fo



Asuras सक्रोधः-with anger दैत्यानाम् अधिपं धूम्रलोचनं:-Dhumralochana the chieftain of Asuras प्राह-spoke.

**Hearing these words of the messanger the king of Asuras got angry and told Dhumralochana the chieftain of Asuras.**

4· हे धूम्रलोचनाशु त्वं स्वसैन्यपरिवारितः ।
तामानय बलाद्दुष्टां केशाकर्षणविह्वलाम् ।।

हे धम्रलोचन त्वं स्वसैन्यपरिवारितः गत्वा दुष्टां केशाकर्षणविह्वलाम् तां बलात् आशु आनय ।

हे धूम्रलोचन - Oh Dhumralochana त्वं - you स्वसैन्यपरिवारितः-accompained by your army गत्वा-going दुष्टां-wicked one केशाकर्षणविह्वलाम्-distressed by dragging her hair तां-her बलात्-by force आशु आनय-bring quickly.

**Oh Dhumralochana, accompanied by your army you go and bring that wicked woman immediately by force dragging her by hair causing distress to her.**

5· तत्परित्राणदः कश्चिद्यदि वोत्तिष्ठतेऽपरः ।
स हन्तव्योऽमरो वापि यक्षो गन्धर्व एव वा ।।

यदि तत्परित्राणदः कश्चित् यक्षः गन्धर्वः अमरः वा पर उत्तिष्ठते तर्हि सः हन्तव्यः ।

तत्परित्राणद:-a person who gives protection to her कश्चित् पर:-anybody else यदि-if यक्ष:-a Yaksha गन्धर्व:-a Gandharva अपि अमर: वा-even if a Deva उत्तिष्ठते-stands up to you तर्हि-then स:-he हन्तव्य:-is to be killed.

If anyone comes forward to protect her be he a Yaksha a Gandharva or even if he be a Deva, he is to be killed.

6. ऋषिरुवाच ॥

ऋषि: उवाच-the sage said.

7. तेनाज्ञप्तस्तत: शीघ्रम् स दैत्यो धूम्रलोचन: ।
वृत: षष्टया सहस्राणामसुराणां द्रुतं ययौ ॥

तत: तेन आज्ञप्त: स दैत्य: धूम्रलोचन: शीघ्रं सहस्राणां दानवानां षष्ट्या वृत: द्रुतं ययौ ।

तत:-from there तेन आज्ञप्त:-ordered by him स: दैत्य:-that Asura धूम्रलोचन:-Dhumralochana शीघ्रं-quickly सहस्राणां दानवानां षष्ट्यावृत:-accompanied by sixty thousand Asuras soldiers द्रुतं-soon ययौ-went.

That Asura Dhumralochana ordered by him thus taking with him sixty thousand soldiers of the Asura army left the place quickly.



8. स दृष्ट्वा तां ततो देवीं तुहिनाचलसंस्थिताम् ॥
जगादोच्चै: प्रयाहीति मूलं शुम्भनिशुम्भयो: ॥

स: तुहिनाचलसंस्थितां तां देवीं दृष्ट्वा तत: त्वं शुम्भनिशुम्भयो: मूलं प्रयाहि इति उच्चै: जगाद ।

तुहिनाचलसंस्थिताम् – sitting on the Himalaya mountain तां देवीं-that Devi दृष्ट्वा-seeing तत:-then त्वं-you शुम्भनिशु ायो: मूलम्-to the presence of Sumbha and Nisumbha प्रयाहि-go इति-this स:-he उच्चै:-loudly जगाद-said.

Seeing that Devi sitting on the himalaya mountain he spoke loudly "go to the presence of Sumbha and Nisnmbha."

9. न चेत्प्रीत्याद्य भवती मद्भर्तारमुपैष्यति ।
ततो बलान्नयाम्येष केशाकर्षणविह्वलाम् ॥

अद्य प्रीत्या भवती मद्भर्तारं न उपैष्यति चेत् तत: बलात् केशाकर्षणविह्वलाम् एष: अहं नयामि ।

अद्य-now प्रीत्या-with pleasure भवती-you मम भर्तारं-my Lord न उपैष्यति-do not go to चेत्-if तत:-then बलात्-by force केशाकर्षणविह्वलाम्-distressed by the dragging of your hair त्वां-you एष: अहं-this I नयामि-take you

If you do not go with pleasure to the

presence of my master I will take you there by force dragging your hair.

10. देव्युवाच ॥

देवी उवाच–the Devi said

11. दैत्येश्वरेण प्रहितो बलवान्बलसंवृतः ।
बलान्नयसि मामेवं ततः किं ते करोम्यहम् ॥

दैत्येश्वरेण प्रहितः बलवान् बलसंवृतः त्वम् एवं मां बलात् नयसि ततः अहं ते किं करोमि ।

दैत्येश्वरेण- by the lord of Asuras प्रहितः–sent by बलवान्–strong बलसंवृतः च-also accompanied by the army त्वं–you एवं–in this way मां–me बलात्–by force नयसि-take me ततः-then अहं ते किं करोमि–what can I do to you.

You are sent by the Lord of Asuras. You are strong and accompained by the army. If you take me by force in this way, what can I do to you?

12. ऋषिरुवाच ॥

ऋषिः उवाच–the Rishi said.

13. इत्युक्तः सोऽभ्यधावत्तामसुरो धूम्रलोचनः ।
हुङ्कारेणैव तं भस्म सा चकाराम्बिका ततः ॥

इति उक्तः सः असुरः धूम्रलोचनः तां अभ्यधावत् । ततः सा अम्बिका हुङ्कारेण एव तं भस्म चकार ।



इति उक्तः–told thus सः असुरः धूम्रलोचनः–that Asura Dhumralochana तां–her अभ्यधावत्–ran at ततः–then सा अम्बिका–that Ambika हुङ्कारेण एव–merely with the sound 'hum' चकार–reduced to भस्म-ashes.

Being told so that Asura Dhumralocana ran at her. Then that Ambika reduced him to ashes by a mere utterance of the sound 'hum'.

14. अथ क्रुद्धं महासैन्यमसुराणां तथाम्बिकाम् ।
ववर्ष सायकैस्तीक्ष्णैस्तथा शक्तिपरश्वधैः ॥

अथ असुराणां महासैन्यं क्रुद्धम् । अथ अम्बिकां तीक्ष्णैः सायकैः तथा शक्तिपरश्वधैः ववर्ष ।

अथ–Then असुराणां महासैन्यं–the great army of Asuras क्रुद्धं–became angry अथ–then अम्बिकां–Ambika तीक्ष्णैः सायकैः–with sharp arrows तथा–also शक्तिपरश्वधैः–with javelins and axes ववर्ष–showered on.

Then the great army of Asuras became angry. Afterwards they showered on Ambika with sharp arrows, javelins and axes.

15. ततो धुतसटः कोपात्कृत्वा नादं सुभैरवम् ।
पपातासुरसेनायां सिंहो देव्याः स्ववाहनः ॥

ततः देव्याः स्ववाहनः सिंहः कोपात् धुतसटः सुभैरवं नादं कृत्वा असुरसेनायां पपात ।

ततः–then देव्याः स्ववाहनः सिंहः–Devi's own vehicle, the lion कोपात्–with anger धुतसटः–shaking its mane सुभैरवं नादं कृत्वा–making a thunderous sound असुरसेनायां–on the army of Asuras पपात–fell.

Then Devi's own vehicle, the lion shaking its mane with anger, making a thunderous sound fell upon the army of Asuras.

16. कांश्चित्करप्रहारेण दैत्यानास्येन चापरान् ।
आक्रान्त्या चाधरेणान्यान् स जघान महासुरान् ॥

सः कांश्चित् दैत्यान् करप्रहारेण जघान । अपरान् आस्येन च । अधरेण आक्रान्त्या अन्यान् महासुरान् च जघान ।

सः–he कांश्चित् दैत्यान्–some Asuras करप्रहारेण–with blows of hands जघान–killed अपरान्–others आस्येन–with mouth अधरेण–with hind legs आक्रान्त्या–pounding upon अन्यान् महासुरान्–other great Asuras.

He killed some Asuras with paws of his hands, some others with his mouth and killed some others with his hind legs.

17. केषाञ्चित्पाटयामास नखैः कोष्ठानि केसरी ।
तथा तलप्रहारेण शिरांसि कृतवान्पृथक् ॥



केसरी नखैः केषाञ्चित् कोष्ठानि पाटयामास । तथा तलप्रहारेण शिरांसि पृथक् कृतवान् ।

केसरी–the lion नखैः–by claws केषाञ्चित्–some others कोष्ठानि–bellies पाटयामास–tore out तथा–in the same way तलप्रहारेण–blows of the paws शिरांसि–heads पृथक् कृतवान्–separated.

The lion tore out the bellies of some of them with the claws. In the same way it separated the heads of some by th blows of the paw.

18. विच्छिन्नबाहुशिरसः कृतास्तेन तथापरे ।
पपौ च रुधिरं कोष्ठादन्येषां धुतकेसरः ॥

तथा अपरे तेन विच्छिन्नबाहुशिरसः कृताः । धुतकेसरः सः अन्येषां कोष्ठात् रुधिरं पपौ च ।

तथा–in the same way अपरे–some others तेन–by him विच्छिन्नबाहुशिरसः–severed hands and heads कृताः–were done धुतकेसरः–shaking its manes सः–he अन्येषां–some others कोष्ठात्–from the heart रुधिरं–blood पपौ च–drank.

In the same way he separated the heads and hands of some others from their bodies. Shaking its mane he drank the blood from the heart of others.

19. क्षणेन तद्बलं सर्वं क्षयं नीतं महात्मना ।
तेन केसरिणा देव्या वाहनेनातिकोपिना ॥

अतिकोपिना महात्मना देव्याः वाहनेन तेन केसरिणा तद्बलं सर्वं क्षणेन क्षयं नीतम् ।

अतिकोपिना -having great anger महात्मना-in high spirits देव्याः वाहनेन-by the bearer of Devi तेन केसरिणा-by that lion तद्बलं सर्वं-the whole army क्षणेन-with in a moment क्षयं नीतं-was destroyed.

The whole army was destroyed within a moment by that lion the vehicle of Devi which was in high spirits and very angry.

20· श्रुत्वा तमसुरं देव्या निहतं धूम्रलोचनम् ।
बलं च क्षयितं कृत्स्नं देवीकेसरिणा ततः ॥

21· चुकोप दैत्याधिपतिः शुम्भः प्रस्फुरिताधरः ।
आज्ञापयामास च तौ चण्डमुण्डौ महासुरौ ॥

तं असुरं धूम्रलोचनं देव्या निहतं ततः देवी केसरिणा सर्वं बलं च क्षयितं श्रुत्वा दैत्याधिपतिः चुकोप प्रस्फुरिताधरः शुम्भः तौ महासुरौ चण्डमुण्डौ आज्ञापयामास ।

तं असुरं धूम्रलोचनं-that Asura Dhumralochana देव्या निहत-killed by Devi ततः-and afterwards देवी-केसरिणा-by the lion of the Devi कृत्स्नं सर्वं बलं च-the whole army also क्षयितं-slain श्रुत्वा-having heard दैत्याधिपतिः-the king of Asuras चुकोप-became angry प्रस्फुरिताधरः-lips quivering with anger शुम्भः-Sumbha तौ महासुरौ चण्डमुण्डौ-those



great Asuras Chanda and Munda आज्ञापयामास च-ordered.

When the king of the Asuras heard that the Asura Dhumralochana was killed by Devi and the whole army slain by lion, he became angry. His lips quivering with anger Sumbha ordered the two great Asuras Chanda and Mnnda.

22· हे चण्ड हे मुण्ड बलैर्बहुलैः परिवारितौ ।
तत्र गच्छतं गत्वा च सा समानीयतां लघु ॥

23· केशेष्वाकृष्य बद्ध्वा वा यदि वः संशयो युधि ।
तदाशेषायुधैः सर्वैरसुरैर्विनिहन्यताम् ॥

हे चण्ड हे मुण्ड, बहुभिः बलैः परिवारितौ तत्र गच्छत । गत्वा च सा लघु समानीयताम् । युधि यदि वः संशयः तर्हि तदा केशेषु आकृष्य बद्ध्वा वा तदा अशेषायुधैः सर्वैः असुरैः विनिहन्यताम् ।

हे चण्ड हे मुण्ड-Oh Chanda and Munda बहुभिः बलैः-with great army परिवारितौ-accompanied by तत्र गच्छत-go there गत्वा च-having gone सा-she लघु समानीयताम् च-be brought quickly युधि-in the battle यदि वः संशयः-if you have any doubt केशेषु आकृष्य-dragging her by her hair बद्ध्वा वा-or binding her सर्वैः असुरैः-by all Asuras तथा अशेषायुधैः-and then by the weapons विनिहन्यताम्-let her be struck.

Oh Chanda and Munda, with a mighty army you go there and bring her here quickly. If you have any doubt in fighting with her let the Asuras strike her with all the weapons in fight, pulling her by the hair or binding her.

24. तस्यां हतायां दुष्टायां सिंहे च विनिपातिते ।
शीघ्रमागम्यतां बद्ध्वा गृहीत्वा तामथाम्बिकाम् ॥

तस्यां दुष्टायां हतायां सिंहे च विनिपातिते अथ तां अम्बिकां गृहीत्वा बद्ध्वा शीघ्रं आगम्यताम् ।

तस्यां दुष्टायां हतायां-when that wicked one is wounded सिंहे च-the lion also विनिपातिते-killed अथ-then तां अम्बिकां-that Ambika गृहीत्वा-seizing बद्ध्वा-binding शीघ्रं आगम्यतां-come quickly.

When that wicked lady is wounded and the lion also killed then seize that Ambika, bind her and come quickly.

इति श्रीमार्कण्डेयपुराणे सार्वणिके मन्वन्तरे देवीमाहात्म्ये
धूम्रलोचनवधो नाम षष्ठोऽध्यायः ॥

---

# अथ सप्तमोऽध्यायः ॥

1. ऋषिरुवाच ॥

ऋषिः उवाच-the Rishi said.

2. आज्ञप्तास्ते ततो दैत्याश्चण्डमुण्डपुरोगमाः ।
चतुरङ्गबलोपेता ययुरभ्युद्यतायुधाः ॥

आज्ञप्ताः ते चण्डमुण्डपुरोगमाः दैत्याः चतुरङ्गबलोपेताः अभ्युद्यतायुधाः ययुः ।

आज्ञप्ताः-orderd thus ते दैत्याः-those Asuras ततः-then चण्डमुण्डपुरोगमाः-with Chanda and Munda in front चतुरङ्गबलोपेताः-with four divisions of the army अभ्युद्यतायुधाः-carrying all weapons ययुः-started.

Orderd by their lord the Asuras then started with Chanda and Munda in their front (as their leaders) and fully equipped with four divisions of the army and other weapons.

3. ददृशुस्ते ततो देवीमीषद्धासां व्यवस्थिताम् ।
सिंहस्योपरि शैलेन्द्रशृङ्गे महति काञ्चने ॥

ते ततः महति काञ्चने शैलेन्द्रशृङ्गे सिंहस्य उपरि व्यवस्थितां ईषद्धासां देवीं ददृशुः ।

ते–they ततः – then महति – huge काञ्चने – golden शैलेन्द्रशृङ्गे–peak of the great mountain सिंहस्य उपरि–on the lion व्यवस्थितां–seated ईषद्धासां–smiling gently देवीं ददृशुः–saw the Devi.

They then saw the Devi smiling gently and seated upon the lion, on a huge golden peak of the great mountain.

4· ते दृष्टा तां समादातुमुद्यमञ्चक्रुरुद्यताः ।
आकृष्टचापासिधरास्तथाऽन्ये तत्समीपगाः ॥

उद्यताः ते तां दृष्ट्वा तां समादातुं उद्यमं चक्रुः । तथा अन्ये आकृष्टचापासिधराः तत्समीपगाः अभवन् ।

उद्यताः–excited ते-they तां–her दृष्ट्वा–seeing समादातुं–to capture उद्यमं चक्रुः-attempted तथा–like wise अन्ये-others आकृष्टचापासिधराः–with their bows bent and swords drawn तत्समीपगाः–went near her.

When they saw her, they became excited and they attempted to capture her. Like wise some others with their bows bent and swords drawn went near her.

5· ततः कोपं चकारोच्चैरम्बिका तानरीन्प्रति ।
कोपेन चास्या वदनं मषीवर्णमभूत्तदा ॥

ततः अम्बिका तान् अरीन प्रति उच्चैः कोपं चकार । कोपेन तदा अस्याः वदनं मषीवर्णं अभूत् च ।



ततः–then अम्बिका–Ambika तान् अरीन् प्रति–against those enemies उच्चैः कोपं चकार-became exceedingly angry कोपेन–with anger तदा–then अस्याः वदनं–her face मषीवर्णं अभूत्-became dark as ink.

Then Ambika became terribly angry with the enemies. Her face became dark as ink because of her terrible anger.

6· भ्रुकुटीकुटिलात्तस्या ललाटफलकाद्द्रुतम् ।
काली करालवदना विनिष्क्रान्तासिपाशिनी ॥

तस्याः भ्रुकुटीकुटिलात् ललाटफलकात् द्रुतं करालवदना असिपाशिनी काली विनिष्क्रान्ता ।

तस्याः–her भ्रुकुटीकुटिलात्–fierce with frown ललाटफलकात्–from the fore-head द्रुतं-immediately करालवदना–with a dreadful face असिपाशिनी–with sword and noose in hand काली–Kali विनिष्क्रान्ता–came out.

From her forehead looking terrible with frown came out Kali with frightful face and with sword and noose in hand.

7· विचित्रखट्वाङ्गधरा नरमालाविभूषणा
द्वीपिचर्मपरीधाना शुष्कमांसातिभैरवा ।

8· अतिविस्तारवदना जिह्वाललनभीषणा ।
निमग्नारक्तनयना नादापूरितदिङ्मुखा ॥

(सा काली) विचित्रखट्वाङ्गधरा, नरमालाविभूषणा, द्वीपिचर्मपरीधाना, शुष्कमांसातिभैरवा, अतिविस्तारवदना, जिह्वाललनभीषणा, निमग्नारक्तनयना नादापूरितदिङ्मुखा ।

विचित्रखट्वाङ्गधरा–bearing the wonderful skull topped staff Khatwanga नरमालाविभूषणा–bedecked with a garland of skulls द्वीपिचर्मपरीधाना–clad in a tiger's skin शुष्कमांसातिभैरवा–looking terrible with her flesh emaciated अतिविस्तारवदना–with gaping mouth जिह्वाललनभीषणा–fearful with her tongue lolling out निमग्नारक्तनयना–having deep sunk reddish eyes नादापूरितदिङ्मुखा–filling the regions with her roars.

That Kali wore a wonderful skull headed weapon Khatwanga in her hands. She had a garland of human skulls. She was clad in a tiger skin· She looked terrible with her flesh emaciated. She had a gaping mouth and looked fearful with her wagging tongue· Her eyes were blood red and her terrible roars reached the skies·

9. सा वेगेनाभिपतिता घातयन्ती महासुरान् ।
सैन्ये तत्र सुरारीणामभक्षयत तद्बलम् ॥



तत्र सैन्ये वेगेन अभिपातितान् महासुरान् घातयन्ती सा सुरारीणां तत् बलं अभक्षयत ।

तत्र सैन्ये–there in that army वेगेन–quickly अभिपातिता–falling upon महासुरान्–the great Asuras घातयन्ती – slaughtering सा – she सुरारीणाम्–the enemies of the devas तत् बलं–that army अभक्षयत–devoured.

She quickly fell upon that great army and killed many of the Asuras and devoured them.

10. पार्ष्णिग्राहाङ्कुशग्राहियोधघण्टासमन्वितान् ।
समादायैकहस्तेन मुखे चिक्षेप वारणान् ॥

पार्ष्णिग्राहाङ्कुशग्राहियोधघण्टासमन्वितान् वारणान् एकहस्तेन समादाय सा मुखे चिक्षेप ।

पार्ष्णिग्राहाङ्कुशग्राहियोधघण्टासमन्वितान्-along with by standers, riders with hooks, warrior riders and bells वारणान्-the elephants एकहस्तेन–with one hand समादाय-catching by सा–she मुखे-to the mouth चिक्षेप–flung.

She flung into her mouth elephants together with their by standers riders with hooks, and warrior riders and bells catching them with one hand.

11. तथैव योधं तुरगै रथं सारथिना सह ।
निक्षिप्य वक्त्रे दशनैश्चर्वयत्यतिभैरवम् ॥

तथा एव योधं तुरगैः सारथिना सह रथं वक्त्रे निक्षिप्य दशनैः अतिभैरवं चर्वति स्म ।

तथा एव–in the same way योधं–warrior तुरगैः–with horses सारथिना सह–with the charioteer रथं–chariot वक्त्रे निक्षिप्य–putting in the mouth दशनैः–with teeth अतिभैरवं–most frightfully चर्वयति स्म–crushed

In the same way she flung into her mouth the soldier in the chariot the chariot horses and the chariot and crushed them most frightfully with her teeth

12· एकं जग्राह केशेषु ग्रीवायामथ चापरम् ।
पादेनाक्रम्य चैवान्यमुरसान्यमपोथयत् ॥

एकं केशेषु जग्राह । अथ अपरं ग्रीवायां । अन्यं पादेन एव अन्यं उरसा च आक्रम्य अपोथयत् ।

एकं–one केशेषु–by hair जग्राह–caught अथ–then अपरं–another one ग्रीवायां–in the neck अन्यं–a third one पादेन एव–with the leg अन्यं च–another one उरसा–with the chest अपोथयत्–crushed.

She caught one by hair and another by the neck. She crushed one with the leg and another with the chest·



13· तैर्मुक्तानि च शस्त्राणि महास्त्राणि तथासुरैः ।
मुखेन जग्राह रुषा दशनैर्मथितान्यपि ॥

तैः असुरैः मुक्तानि शस्त्राणि महास्त्राणि च सा मुखेन जग्राह । रुषा दशनैः अपि मथितानि ।

तैः महासुरैः- by the great Asuras मुक्तानि–released शस्त्राणि–ordinary weapons महास्त्राणि च–great weapons also सा–she मुखेन–with her mouth जग्राह–caught रुषा–with anger दशनैः–by teeth अपि–also मथितानि–crushed·

She caught with her mouth the ordinary and great weapons released by the great Asuras and crushed them with her teeth in fury·

14· बलिनां तद्बलं सर्वमसुराणां दुरात्मनाम् ।
ममर्दाभक्षयच्चान्यानन्यांश्चाताडयत्तथा ॥

बलिनां दुरात्मनां असुराणां तत् बलं सर्वं ममर्द । अन्यान् अभक्षयत् च । तथा अन्यान् अताडयत् च ।

बलिनां दुरात्मनां असुराणां–of mighty, evil natured Asuras तत् बलं सर्वं - all that army सा ममर्द–she destroyed तथा–in the same way अन्यान्–others अभक्षयत्–devoured (ate) तथा–in the same way अन्यान्–others अताडयत् च–beat.

She destroyed all the strong forces of the mighty, evil-natured Asuras· In the same way she devoured others. Also she struck others.

15· असिना निहताः केचित्केचित्खट्वाङ्गताडिताः ।
जग्मुर्विनाशमसुरा दन्ताग्राभिहतास्तथा ॥

केचित् असिना निहताः । केचित् असुराः खट्वाङ्गताडिताः विनाशं जग्मुः । तथा केचित् दन्ताग्राभिहताः ।

केचित्–some असिना–by the sword निहताः–were killed केचित् असुराः-some other Asuras खट्वाङ्गताडिताः–beaten with Khatwanga विनाश जग्मुः–were killed with the weapon Khatwanga तथा–likewise केचित्–some others दन्ताग्राभिहताः–were killed by the edges of the teeth

Some Asuras were killed by swords· Some others were beaten to death by the weapon Khatwanga and some others were killed being bitten with the edges of her teeth.

16· क्षणेन तद्बलं सर्वमसुराणां निपातितम् ।
दृष्ट्वा चण्डोऽभिदुद्राव तां कालीमतिभीषणाम् ॥

असुराणां तत् बलं सर्वं क्षणेन निपातितं दृष्ट्वा चण्डः अतिभीषणां तां कालीं अभिदुद्राव ।

असुराणां तत् बलं सर्वं–the whole army of the Asuras क्षणेन निपातितं दृष्ट्वा- seeing downed within a moment चण्डः–Chanda अतिभीषणां तां कालीं–that rrible Kali अभिदुद्राव–rushed against.



Chanda, seeing the whole Asura army downed in a moment rushed towards that terrible Kali·

17· शरवर्षैर्महाभीमैर्भीमाक्षीं तां महासुरः ।
छादयामास चक्रैश्च मुण्डः क्षिप्तैः सहस्रशः ॥

महासुरः चण्डः भीमाक्षीं तां महाभीमैः शरवर्षैः मुण्डः सहस्रशः क्षिप्तैः चक्रैः च छादयामास ।

महासुरः चण्डः–the great Asura Chanda भीमाक्षीं तां–terrible eyed Devi महाभीमैः शरवर्षैः–terrible showers of arrows मुण्डः–Munda, the Asura सहस्रशः–in thousands क्षिप्तैः चक्रैः–with thrown discuses च–also छादयामास–covered.

The great Asura Chanda covered that terrible eyed Kali with terrible showers of arrows and the Asura Munda covered her with discuses thrown in thousands at her.

18· तानि चक्राण्यनेकानि विशमानानि तन्मुखम् ।
बभुर्यथाऽर्कबिम्बानि सुबहूनि घनोदरम् ॥

तन्मुखम् विशमानानि तानि अनेकानि चक्राणि घनोदरं विशमानानि सुबहूनि अर्कबिम्बानि यथा तथा बभुः ।

तन्मुखं–her face विशमानानि–entering into तानि अनेकानि चक्राणि–all those discuses घनोदरं विशमानानि–disappearing into the midst of the clouds सुबहूनि

अर्कबिम्बानि–many solar discs यथा तथा–just like वभुः–shone.

Those discuses entering into the mouth of that Kali appeared like many solar discs disappearing into the midst of the clouds.

19. ततो जहासातिरुषा भीमं भैरवनादिनी ।
काली करालवक्त्रान्तर्दुर्दर्शदशनोज्ज्वला ॥

ततः भैरवनादिनी करालवक्त्रान्तदुर्दर्शदशनोज्ज्वला काली अतिरुषा भीमं जहास ।

ततः–then भैरवनादिनी–terribly roaring करालवक्त्रान्त दुर्दर्शदशनोज्वला–shining with fearful teeth within the dreadful mouth काली–Kali अतिरुषा–with great anger भीमं जहास–laughed loudly.

Then that Kali roaring terribly with her dreadful mouth shining with fearful teeth in great anger laughed loudly.

20. उत्थाय च महासिंहं देवी चण्डमधावत ।
गृहीत्वा चास्य केशेषु शिरस्तेनासिनाच्छिनत् ॥

सा काली महासिंहं उत्थाय चण्डं अधावत च । सा अस्य केशेषु गृहीत्वा च तेन असिना शिरः अच्छिनत् ।

सा काली–that Kali महासिंहं उत्थाय–mounting on her great lion चण्डं अधावत च–ran after Chanda



सा–she अस्य केशेषु गृहीत्वा–catching his hair तेन असिना–by that sword. शिरः अच्छिनत्–cut his head.

**That Kali mounting on her great lion ran after Chanda and catching him by his hair cut his head by her sword.**

21. अथ मुण्डोऽभ्यधावत्तां दृष्ट्वा चण्डं निपातितम् ।
तमप्यपातयद्भूमौ सा खड्गाभिहतं रुषा ॥

चण्डं निपातितं दृष्ट्वा अथ मुण्डः तां अभ्यधावत् । सा तं अपि रुषा खड्गाभिहतं अपातयत् ।

चण्डं–Chanda निपातितं दृष्ट्वा–seeing fallen अथ–then मुण्डः–Munda तां–her अभ्यधावत्–ran towards सा–she तं him अपि–also रुषा–with anger खड्गाभिहतं–striking with sword अपातयत्–felled down.

**Seeing Chanda fallen, Munda ran after her. She felled him down striking with her sword in anger.**

22. हतशेषं ततः सैन्यं दृष्ट्वा चण्डं निपातितम् ।
मुण्डं च सुमहावीर्यं दिशो भेजे भयातुरम् ॥

चण्डं सुमहावीर्यं मुण्डं च निपातितं दृष्ट्वा ततः हतशेषं भयातुरं सैन्यं दिशः भेजे ।

चण्डं–Chanda सुमहावीर्यं मुण्डं–the very valiant Munda च–also निपातितं दृष्ट्वा–seeing, fallen ततः–

then हतशेषं भयातुरं सैन्यं–the remaining frightened army दिश: भेजे–ran here and there.

Seeing Chanda and the great Munda fallen, and killed, the remaining frightened army ran in all directions

23. शिरश्चण्डस्य काली च गृहीत्वा मुण्डमेव च ।
प्राह प्रचण्डाट्टहासमिश्रमभ्येत्य चण्डिकाम् ।।

सा च काली चण्डस्य शिर: मुण्डं च एव गृहीत्वा प्रचण्डाट्टहासमिश्रं चण्डिकाम् अभ्येत्य प्राह ।

सा–she च–also काली–Kali चण्डस्य शिर:–the head of Chanda मुण्डं–Munda च एव गृहीत्वा–catching प्रचण्डाट्टहासमिश्रं–with an impetuous loud laughter चण्डिकां–Chandika अभ्येत्य–approaching प्राह–said.

Holding the heads of Chanda and Munda with an impetuously loud laughter Kali approached Chandika and said.

24. मया तवात्रोपहृतौ चण्डमुण्डौ महापशू ।
युद्धयज्ञे स्वयं शुम्भं निशुम्भं च हनिष्यसि ।।

अत्र तव युद्धयज्ञे महापशू चण्डमुण्डौ मया उपहृतौ शुम्भं निशुम्भं च स्वयं हनिष्यसि ।

अत्र–here तव–your युद्धयज्ञे–in this sacrifice of the battle महा पशु–great animals चण्डमुण्डौ–



Chanda and Munda मया-by me उपहृतौ–brought शुम्भं निशुम्भं च–Sumbha and Nisumbha also स्वयं–yourself हनिष्यसि–you will kill

In this battle sacrifice, I have brought Chanda and Munda as sacrifical offerings. You will kill Sumbha and Nisumbha, yourself.

25. ऋषिरुवाच ।।

ऋषि: उवाच–the Rishi said.

26. तावानीतौ ततो दृष्ट्वा चण्डमुण्डौ महासुरौ ।
उवाच कालीं कल्याणी ललितं चण्डिका वच: ।।

तौ चण्डमुण्डौ महासुरौ आनीतौ दृष्ट्वा तत: कल्याणी चण्डिका कालीं ललितं वच: उवाच ।

तौ चण्डमुण्डौ–those Chanda and Munda महासुरौ–great Asuras आनीतौ–brought दृष्ट्वा-seeing तत:-then कल्याणी चण्डिका-auspicious Chandika कालीं–to Kali ललितं वच:-sweet words उवाच–spoke.

Seeing the great Asuras Chanda and Munda brought thus, the auspicious Chandika spoke sweet words to Kali.

27. यस्माच्चण्डं च मुण्डं च गृहीत्वा त्वमुपागता ।
चामुण्डेति ततो लोके ख्याता देवी भविष्यसि ।।

यस्मात् त्वं चण्डं च मुण्डं च गृहीत्वा मां उपागता ततः एव त्वं लोके चामुण्डा इति विख्याता भविष्यसि ।

यस्मात्-by which त्वं-you चण्डं च मुण्डं च-Chanda and Munda गृहीत्वा-caught मां-me उपागता-come to ततः-by this लोके-in this universe चामुण्डा इति-by the name Chamunda विख्याता भविष्यसि-will become famous

Because you have caught and brought Chanda and Munda to me, you will be famous in the world by the name Chamunda.

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये चण्डमुण्डवधो नाम सप्तमोऽध्यायः ॥

---

# अथ अष्टमोऽध्यायः ॥

1. ऋषिरुवाच ।

ऋषिः उवाच – the Rishi said.

2. चण्डे च निहते दैत्ये मुण्डे च विनिपातिते ।
बहुलेषु च सैन्येषु क्षयितेष्वसुरेश्वरः ॥

3. ततः कोपपराधीनचेताः शुम्भः प्रतापवान् ।
उद्योगं सर्वसैन्यानां दैत्यानामादिदेश ह ॥

दैत्ये चण्डे निहते मुण्डे च विनिपातिते बहुलेषु सैन्येषु च क्षपितेषु ततः कोपपराधीनचेताः प्रतापवान् असुरेश्वरः शुम्भः दैत्यानां सर्वसैन्यानां उद्योगं आदिदेश ह ।

दैत्ये चण्डे-Chandasura निहते-when killed मुण्डे च-Mundasura also विनिपातिते-slain बहुलेषु सैन्येषु च-all the army क्षपितेषु-destroyed ततः-then कोपपराधीनचेताः – with mind overcome by anger प्रतापवान्-mighty असुरेश्वरः शुम्भः-Sumbha, the lord of Asuras दैत्यानां सर्वसैन्यानां-of all Asuras उद्योगं-to get ready आदिदेश ह-commanded.

When Chandasura was killed and when Mundasura was laid to rest and most of the army destroyed, the Lord of Asuras Sumbha the mighty one, overcome with anger commanded the armies of Asuras to get ready.

4· अद्य सर्वबलैर्दैत्याः षडशीतिरुदायुधाः ।
कम्बूनां चतुरशीतिर्निर्यान्तु स्वबलैर्वृताः ॥

अद्य सर्वबलैः वृताः उदायुधाः षडशीतिः दैत्याः स्वबलैः वृताः कम्बूनां चतुरशीतिः च निर्यान्तु ।

अद्य-now itself सर्वबलैः-with all the army वृताः accompained उदायुधाः-armed with weapons षडशीति-eighty six स्वबलैः वृताः-accompanied by the whole army कम्बूनां-Kambu Asuras चतुरशीतिः-eighty four दैत्याः-Asuras निर्यान्तु-let them start

Now let the eighty six Asuras ready with their weapons and with all their forces and the eighty-four Kambu Asuras surrounded by their own forces start immediately·

5· कोटिवीर्याणि पञ्चाशदसुराणां कुलानि वै ।
शतं कुलानि धौम्राणां निर्गच्छन्तु ममाज्ञया ॥

कोटिवीर्याणि असुराणां कुलानि पञ्चाशत् धौम्राणां कुलानि शतं च मम आज्ञया निर्गच्छन्तु वै ।

कोटिवीर्याणि असुराणां कुलानि-Asuras belonging to the family of Kotiyirya पञ्चाशत्-fifty धौम्राणां कुलानि-the families of Dhaumra शतं-hundred मम आज्ञया-at my order निर्गच्छन्तु-start.

Let the fifty Asura families of Kotiviryas and the hundred families of Dhaumras start according to my command·



6· कालका दौर्हृदा मौर्याः कालकेयास्तथासुराः ।
युद्धाय सज्जा निर्यान्तु आज्ञया त्वरिता मम ॥

मम आज्ञया कालकाः दौर्हृदाः मौर्याः तथा कालकेया असुराः युद्धाय सज्जाः त्वरिताः निर्यान्तु ।

मम आज्ञया- by my command कालकाः-Kalakas दौर्हृदाः Daurhradas मौर्याः-Mauryas तथा-like-wise कालकेयाः असुराः- Asuras Kalakeyas युद्धाय-for the battle सज्जाः-ready त्वरिता -soon निर्यान्तु-let start·

Let the Asuras Kalakas Daurhrdas Mouryas and Kalakeyas get ready and start soon for the battle at my order·

7· इत्याज्ञाप्यासुरपतिः शुम्भो भैरवशासनः ।
निर्जगाम महासैन्यसहस्रैर्बहुभिर्वृतः ॥

इति आज्ञाप्य भैरवशासनः असुरपतिः शुम्भः बहुभिः सहस्रैः महासैन्यैः वृतः निर्जगाम ।

इति आज्ञाप्य- ordering thus भैरवशासनः-of terrible commanding power असुरपतिः-Lord of the Asuras शुम्भः-Sumbha बहुभिः सहस्रैः महासैन्यैः वृतः- followed by many thousands of big armies निर्जगाम-started.

After giving these orders Sumbha, of terrible commanding power the Lord of the Asuras, proceeded followed by many thousands of big armies·

8· आयान्तं चण्डिका दृष्ट्वा तत्सैन्यमतिभीषणम् ।
ज्यास्वनैः पूरयामास धरणीगगनान्तरम् ।

चण्डिका अतिभीषणम् तत् सैन्यं आयान्तं दृष्ट्वा धरणीगगनान्तरं ज्यास्वनैः पूरयामास ।

चण्डिका–Chandikadevi अतिभीषणम्–terrible तत् सैन्यं–that army आयान्तं दृष्ट्वा seeing coming forward धरणीगगनान्तरं-space between the earth and the sky ज्यास्वनैः–with the sound of the bow-string पूरयामास–filled

Seeing the terrible army coming towards her, Chandika filled the whole space between earth and sky with suond of her bow-string.

9· तत सिंहो महानादमतीव कृतवान्नृप ।
घण्टास्वनेन तान्नादानम्बिका चोपबृंहयत् ॥

हे नृप, ततः सिंहः महानादं अतीव कृतवान् । अम्बिका तान् नादान् घण्टास्वनेन च उपबृंहयत् ।

हे नृप–O king ततः-then सिंहः–the lion महानादं terrible roar अतीव कृतवान् made highly अम्बिका–Ambika तान् नादान्-those sounds घण्टा-स्वनेन-by the sound of her bell उपबृंहयत्–intensified.

Oh, king, then the lion roured terribly Ambika made those souuds still more terrible by the sound of her bell.



10· धनुर्ज्यासिंहघण्टानां नादापूरितदिङ्मुखा ।
निनादैर्भीषणैः काली जिग्ये विस्तारितानना ॥

विस्तारितानना काली धनुर्ज्यासिंहघण्टानां नादापूरित दिङमुखा भीषणैः निनादैः जिग्ये ।

विस्तारितानना–expanding her mouth काली–Kali धनुर्ज्यासिंहघण्टानां–the sound of the bow-string and the roaring sound of the lion and the sound of the bell नादापूरितदिङमुखा–all the quarters filled with the sound भीषणैः निनादैः-by the terrible sounds जिग्ये-conquered.

Kali overwhelmed the sound of the bow-string, the roaring sound of the lion and the sound of the bell, with the sound coming from her mouth wide open, which filled all the quarters.

11· तं निनादमुपश्रुत्य दैत्यसैन्यैश्चतुर्दिशम् ।
देवी सिंहस्तथा काली सरोषैः परिवारिताः ।

तं निनादं उपश्रुत्य सरोषैः दैत्यसैन्यैः देवी सिंहः तथा काली चतुर्दिशं पारिवारिताः ।

तं निनादं–that sound उपश्रुत्य–having heard सरोषैः-angry दैत्यसैन्यैः–by the Asura army देवी–Devi सिंहः तथा काली–lion and Kali चतुर्दिशं–from the four sides परिवारिताः encircled.

Hearing this sound, Devi, the lion and Kali were encircled from all four sides by the angry Asura army.

12. एतस्मिन्नन्तरे भूप विनाशाय सुरद्विषाम् ।
भवायामरसिंहानामतिवीर्यबलान्विताः ॥
13. ब्रह्मेशगुहविष्णूनां तथेन्द्रस्य च शक्तयः ।
शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चण्डिकां ययुः ॥

हे, भूप एतस्मिन् अन्तरे सुरद्विषां विनाशाय अमरसिंहानां भवाय च ब्रह्मेशगुहविष्णूनां तथा इन्द्रस्य च अतिवीर्यबलान्विताः शक्तयः तेषां शरीरेभ्यः विनिष्क्रम्य तद्रूपैः चण्डिकां ययुः ।

हे भूप–O King एतस्मिन् अन्तरे-by this time सुरद्विषां विनाशाय-for the destruction of Asuras अमरसिंहानां भवाय-for the welfare of Devas ब्रह्मेशगुहविष्णूनां तथा इन्द्रस्य च – of Brahma, Siva, Subrahmanya, Vishnu and Indra अतिवीर्यबलान्विताः - very valiant and strong शक्तयः – Saktis तेषां शरीरेभ्यः विनिष्क्रम्य- came out from their bodies तद्रूपैः-with those forms चण्डिकां-Chandika ययुः–went.

Oh! king, by this time for the destruction of Asuras and well being of the best of devas, powerful and mighty Saktis, from the bodies of Brahma, Siva, Karthikeya, Vishnu and Indra, issued forth and approached Chandika with their respective forms.



14. यस्य देवस्य तद्रूपं यथा भूषणवाहनम् ।
तद्वदेव हि तच्छक्तिरसुरान्योद्धुमाययौ ॥

यस्य देवस्य यत् रूपं यथा वाहनभूषणम् तच्छक्तिः तद्वद् एव हि असुरान् योद्धुं आययौ ।

यस्य देवस्य-of which God यत् रूपं-what form यथा वाहनभूषणं-what vehicle and ornaments तच्छक्तिः- his Sakthi तद्वत् एव हि–in the same form असुरान्-Asuras योद्धुं-to fight with आययौ came forward.

Whatever was the form of each deva and whatever ornaments and vehicle he had in that very form his Sakthi came forward to fight with the Asuras.

15. हंसयुक्तविमानाग्रे साक्षसूत्रकमण्डलुः ।
आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभिधीयते ॥

हंसयुक्तविमानाग्रे साक्षसूत्रकमण्डलुः ब्रह्मणः शक्तिः आयाता । सा ब्रह्माणी अभिधीयते ।

हंसयुक्तविमानाग्रे-in an aerial chariot drawn by swans साक्षसूत्रकमण्डलुः–carrying a rosary and kamandalu ब्रह्मणः शक्तिः–Brahma's Sakthi आयाता–came out सा–she ब्रह्माणी–Brahmani अभिधीयते-is called.

Sakthi of Brahma, the creator came out in an aerial chariot drawn by swans carrying a rosary and a kamandalu in her hand. She is called Brahmani.

16. माहेश्वरी वृषारूढा त्रिशूलवरधारिणी ।
महाहिवलया प्राप्ता चन्द्ररेखाविभूषणा ॥

माहेश्वरी, वृषारूढा, त्रिशूलवरधारिणी, महाहिवलया चन्द्ररेखाविभूषणा प्राप्ता ।

माहेश्वरी–Sakthi of Maheswara वृषारूढा–mounted on a bull त्रिशूलधारिणी–wearing a trident महाहिवलया–wearing a serpent bangle चन्द्ररेखाविभूषणा–adorned with a digit of the moon प्राप्ता–came.

Sakthi of Maheswara arrived mounted on a horse, holding a trident in hand wearing snake as bracelet and adorned with a digit of the moon.

17. कौमारी शक्तिहस्ता च मयूरवरवाहना ।
योद्धुमभ्याययौ दैत्यानम्बिका गुहरूपिणी ॥

अम्बिका गुहरूपिणी कौमारी मयूरवाहना शक्तिहस्ता च दैत्यान् योद्धुं अभ्याययौ ।

अम्बिका गुहरूपिणी – Ambika in the form of Karthikya कौमारी–named Kaumari मयूरवाहना–



riding on a peacock शक्तिहस्ता च–with the javelin in hand दैत्यान् योद्धुं–to fight with the Asuras अभ्याययौ–appeared.

Ambika in the from of Karthikeya known as Kaumari came, riding on a peacock and having a javelin in hand as weapon to fight with the Asuras.

18. तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थिता ।
शङ्खचक्रगदाशाङ्र्गखड्गहस्ताऽभ्युपाययौ ॥

तथा एव वैष्णवी शक्तिः शङ्खचक्रगदा शर्ङ्गखड्गहस्ता गरुडोपरि संस्थिता अभ्युपाययौ ।

तथा एव–like-wise वैष्णवीशक्तिः – Sakthi of Vishnu शङ्खचक्रगदा शार्ङ्गखड्गहस्ता–holding conch, disc club, bow and sword in hand गरुडोपरि–on the vehicle Garuda संस्थिता-sitting अभ्युपाययौ–came.

Likewise the Sakthi of Vishnu appeared holding in hands conch, disc club, bow and the sword sitting on the vehicle Garuda.

19. यज्ञवाराहमतुलं रूपं या बिभ्रतो हरेः ।
शक्तिः साप्याययौ तत्र वाराहीं बिभ्रती तनुम् ॥

अतुलं यज्ञवाराहं रूपं बिभ्रतः हरेः या शक्तिः सा अपि वाराहीं तनुं बिभ्रती तत्र आययौ ।

अतुलं–unique यज्ञवाराहं रूपं–form of a sacrificial boar बिभ्रत:–assuming हरे:–Vishnu's या शक्ति:–which Sakthi सा अपि–that too वाराहीं तनुं–form of a boar बिभ्रती taking तत्र आययौ-came there.

The Sakthi of Hari, who took the unparalleld form of a sacrificial boar appeared there in the form of a boar.

20. नारसिंही नृसिंहस्य बिभ्रती सदृशं वपु: ।।
प्राप्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहति: ।।

नारसिंही नृसिंहस्य सदृशं वपु: बिभ्रती सटाक्षेपक्षिप्तनक्षत्र संहति: तत्र प्राप्ता ।

नारसिंही-Sakthi of Vishnu in his incarnation as Narasimha नृसिंहस्य-of the man-lion सदृशं-similar वपु:–body बिभ्रती–taking सटाक्षेपक्षिप्तनक्षत्रसंहति:–bringing down the constellation of stars by the toss of his mane तत्र प्राप्ता–came there.

Sakthi of Vishnu as the incarnation of Narasimha appeared there taking the form of a lion which brought down the constellation of stars by the toss of his mane.

21. वज्रहस्ता तथैवैन्द्री गजराजोपरि स्थिता ।
प्राप्ता सहस्रनयना यथा शक्रस्तथैव सा ।।



यथा शक्र: तथा एव सा सहस्रनयना, वज्रहस्ता गजोपरिस्थिता एव ऐन्द्री प्राप्ता ।

यथा-as शक्र:-Indra तथा-so सा-she सहस्रनयना-with thousand eyes वज्रहस्ता-with a thunderbolt in hand गजोपरिसंस्थिता-seated on an elephant तथा च-so also ऐन्द्री-Sakthi of Indra प्राप्ता-came.

Just as Indra the Sakthi of Indra also appeared with a thousand eyes, holding a thunderbolt in hand and seated upon an elephant.

22. तत: परिवृतस्ताभिरीशानो देवशक्तिभि: ।
हन्यन्तामसुरा: शीघ्रम् मम प्रीत्याह चण्डिकाम् ।।

तत: ताभि: देवशक्तिभि: परिवृत: ईशान: मम प्रीत्या असुरा: शीघ्रं हन्यन्तां इति चण्डिकां आह ।

तत:-then ताभि: देवशक्तिभि: परिवृत:–surrounded by those Sakthis of Gods ईशान:–Siva मम प्रीत्या-with my favour असुरा:-Asuras शीघ्रं–soon हन्यन्तां-may be killed इति चण्डिकां आह–told Chandika this.

Then surrounded by those Sakthis of Gods Siva told Devi thus. With my favour kill these Asuras soon

23. ततो देवीशरीरात्त विनिष्क्रान्तातिभीषणा ।
चण्डिका शक्तिरत्युग्रा शिवाशतनिनादिनी ।।

ततः देवीशरीरात् तु अत्युग्रा अतिभीषणा, शिवाशत निनादिनी चण्डिका शक्तिः विनिष्क्रान्ता ।

ततः–then देवीशरीरात् तु–from the body of Devi अत्युग्रा–most terrific अतिभीषणा–exceedingly fierce शिवाशतनिनादिनी – yelling like a hundred jackals चण्डिकाशक्तिः–the Sakthi of Chandika (jackals) विनिष्क्रान्ता–came out.

Then from the body of Devi, the Sakthi of Chandika came out looking very terrible, exceedingly fierce and making the sound of a hundred jackals.

24· सा चाह धूम्रजटिलमीशानमपराजिता ।
दूतस्त्वं गच्छ भगवन्पार्श्वं शुम्भनिशुम्भयोः ॥

सा अपराजिता धूम्रजटिलं ईशानं आह च "भगवन्: दूतः" त्वं शुम्भनिशुम्भयोः पार्श्वं गच्छ ।

सा–she अपराजिता–unconquerable धूम्रजटिलं–with dark matted locks ईशानं Siva आह च–and told भगवन् – Lord दूतः – messenger त्वं – you शुम्भनिशुम्भयोः पार्श्वं गच्छ – you go near Sumbha and Nisumbha

The invincible Devi told Siva with dark matted locks, thus – 'O' Lord, you go as messenger to Sumbha and Nisumbha



25· ब्रूहि शुम्भं निशुम्भं च दानवावतिगर्वितौ ।
ये चान्ये दानवास्तत्र युद्धाय समुपस्थिताः ॥

अतिगर्वितौ दानवौ शुम्भं निशुम्भं च ब्रूहि । युद्धाय तत्र समुपस्थिताः अन्ये ये च दानवाः तान् अपि ब्रूहि ।

दानवौ–Asuras अतिगर्वितौ–very proud शुम्भं निशुम्भं च–Sumbha and Nisumbha ब्रूहि–tell युद्धाय–for battle तत्र–there समुपस्थिताः–assembled अन्ये ये च दानवाः–all the other Asuras also तान् अपि ब्रूहि–tell them also.

Tell the haughty Asuras, Sumbha and Nisumbha and tell the other Asuras also who are assembled there for battle.

26· त्रैलोक्यमिन्द्रो लभतां देवाः सन्तु हविर्भुजः ।
यूयं प्रयात पातालं यदि जीवितुमिच्छथ ॥

"इन्द्रः त्रैलोक्यं लभतां । देवाः हविर्भुजः सन्तु । यदि जीवितुं इच्छथ यूयं पातालं प्रयात ।"

इन्द्रः–Indra त्रैलोक्यं–the three worlds लभतां–get देवाः–Devas हविर्भुजः सन्तु–enjoy the sacrificial offerings यदि–if जीवितुं इच्छथ–wish to live यूयं–you पातालं प्रयात–go to the nether world.

Let Indra get the three worlds. Let the Devas become the enjoyers of sacrificial offerings. If you wish to live you go to the nether worlds.

27· बलावलेपादथ चेद्भवन्तो युद्धकाङ्क्षिणः ।
तदागच्छत तृप्यन्तु मच्छिवाः पिशितेन वः ॥

अथ भवन्तः बलावलेपात् युद्धकाङ्क्षिणः चेत् तदा आगच्छत । मच्छिवाः वः पिशितेन तृप्यन्तु ।

अथ चेत्–if भवन्तः-you बलावलेपात्-due to pride of strength युद्धकाङ्क्षिणः–anxious for battle तदा–then आगच्छत–come मम शिवाः-my jackals वः पिशितेन–with your flesh तृप्यन्तु–be satisfied.

Now, if you are proud of your strength and anxious for battle come forward. Let my jackals be satisfied with your flesh.

28· यतो नियुक्तो दौत्येन तया देव्या शिवः स्वयम् ।
शिवदूतीति लोकेऽस्मिंस्ततः सा ख्यातिमागता ॥

यतः शिवः तया देव्या स्वयम् दौत्येन नियुक्तः ततः सा अस्मिन् लोके शिवदूती इति ख्यातिं आगता ।

तया देव्या – by that Devi शिवः स्वयं – Siva himself दौत्येन यतः नियुक्तः–engaged as a messenger ततः-so सा–she अस्मिन् लोके–in this world शिवदूती इति–by the name of Sivadooti ख्यातिं आगता–became famous

Because Lord Siva himself was engaged by the Devi as her messenger, she came to be known as Sivadoothi in this world.



29· तेऽपि श्रुत्वा वचो देव्याः शर्वाख्यातं महासुराः ।
अमर्षापूरिता जग्मुर्यतः कात्यायनी स्थिता ॥

ते महासुराः अपि शर्वाख्यातं देव्याः वचः श्रुत्वा ततः अमर्षपूरिताः यतः कात्यायनी स्थिता जग्मुः ।

ते महासुराः those great Asuras शर्वाख्यातं–told by Siva देव्याः वचः-words of Devi श्रुत्वा–hearing अमर्षपूरिताः-filled with anger यतः-where कात्यायनी–Devi Katyayani ततः जग्मुः–went there.

Those great Asuras hearing the words of Devi spoken by Siva, became extremely angry and went to the place where the Devi Kathyayani stood.

30· ततः प्रथममेवाग्रे शरशक्त्यृष्टिवृष्टिभिः ।
ववर्षुरुद्धतामर्षास्तां देवीममरारयः ॥

ततः उद्धतामर्षाः अमरारयः अग्रे प्रथमं एव शरशक्त्यृष्टिवृष्टिभिः देवीं ववर्षुः ।

ततः-then उद्धतामर्षा–the enraged अमरारयः–Asuras अग्रे प्रथमं एव–in the beginning itself शरशक्त्यृष्टिवृष्टिभिः–arrows, javelins and spears देवीं ववर्षुः–showered on the Devi.

Then the enraged Asuras, in the beginning of the battle itself, showerd arrows, javelins and spears on the Devi.

31· सा च तान् प्रहितान् बाणाञ्छूलशक्तिपरश्वधान् ।
चिच्छेद लीलयाऽऽध्मातधनुर्मुक्तैर्महेषुभिः ॥

सा प्रहितान् तान् बाणान् शूलशक्तिपरश्वधान् च आध्मात धनुर्मुक्तैः महेषुभिः लीलया ।

प्रहितान्-sent by them तान् बाणान् – those arrows शूलशक्तिपरश्वधान्-spears, darts and axes आध्मातधनुर्मुक्तैः–released from drawn bow महेषुभिः–great arrows सा च–she also लीलया–sportingly चिच्छेद- cut.

That Devi too cut sportingly those arrows spears, darts and axes sent by them by her own great arrows released from her stretched bow.

32· तस्याग्रतस्तथा काली शूलपातविदारितान् ।
खट्वाङ्गपोथितांश्चारीन्कुर्वती व्यचरत्तदा ॥

तथा तस्य अग्रतः काली अरीन् शूलपातविदारितान् खट्वाङ्गपोथितान् च कुर्वती, व्यचरत् ।

तथा–in the same way तस्य अग्रतः-in front of him काली–Kali अरीन्–enemies शूलपातविदरितान्–cut to pieces by her trident खट्वाङ्गपोथितान्–crushed by the strokes of the Khatwanga weapon कुर्वन्ती–making व्यचरत्–walked.



She walked in front of him (Sumbha) hither and thither cutting into pieces the Asuras by her trident and crushing them by the blows of her Khatwanga weapon.

33· कमण्डलुजलाक्षेपहतवीर्यान् हतौजसः ।
ब्रह्माणी चाकरोच्छत्रून्येन येन स्म धावति ॥

ब्रह्माणी च येन येन मार्गेण धावति स्म तत्र तत्र शत्रून् कमण्डलुजलाक्षेपहतवीर्यान् हतौजसः अकरोत् ।

ब्रह्माणी – Brahmani येन येन मार्गेण–by which ever way धावती स्म-ran तत्र तत्र–in all these places शत्रून्-enemies कमण्डलुजलाक्षेपहतवीर्यान्–valourless by sprinkling the water from her Kamandalu हतौजसः–powerless अकरोत्–made.

Brahmani, wherever she ran, she made the enemies there and everywhere valourless and powerless by sprinkling on them the water from her kamandalu,

34. माहेश्वरी त्रिशूलेन तथा चक्रेण वैष्णवी ।
दैत्याञ्जघान कौमारी तथा शक्त्याऽतिकोपना ॥

माहेश्वरी त्रिशूलेन वैष्णवी चक्रेण, तथा अतिकोपना कौमारी शक्त्याः दैत्यान् जघान ।

माहेश्वरी–Maheswari त्रिशूलेन–by the trident वैष्णवी–Vaishnavi चक्रेण–with discus तथा–same

**way** अतिकोपना–bitterly angry कौमारी–Kaumari शक्त्या–by the javelin दैत्यान्–Asuras जघान–killed.

Maheswari with her trident, Vaisnavi with her discus and bitterly angry Kaumari with her javelin killed the Asuras.

35. ऐन्द्रीकुलिशपातेन शतशो दैत्यदानवाः ।
पेतुर्विदारिताः पृथ्व्यां रुधिरौघप्रवर्षिणः ॥

एन्द्रीकुलिशपातेन विदारिताः दैत्यदानवाः रूधिरौघप्रवर्षिणः सन्तः शतशः भूमौ पेतुः ।

ऐन्द्रीकुलिशपातेन by the blows of Indrani's thunder bolt शतशः दैन्यदानवाः–hundreds of Asuras and Danavas विदारिताः–torn to pieces रुधिरौघ-प्रवर्षिणः–streams of blood flowing out of them भूमौ–on the earth पेतुः–fell down.

By the blows of her weapon the thunder bolt, Indrani tore to pieces hundreds of Asuras and Danavas and they fell upon the earth with streams of blood flowing out of them.

36. तुण्डप्रहारविध्वस्ता दंष्ट्राग्रक्षतवक्षसः ।
वाराहमूर्त्या न्यपतंश्चक्रेण च विदारिताः ॥

वाराहमूर्त्या तुण्डप्रहारविध्वस्ताः द्रंष्ट्राग्रक्षतवक्षसः चक्रेण विदारिताः च न्यपतन् ।



वाराहमूर्त्या-by the Goddess Varahi तुण्डप्रहार-विध्वस्ताः-shattered by blows of her snout दंष्ट्राग्रक्ष-तवक्षसः-wounded in their chest by the point of her sharp teeth चक्रेण विदारिताः च–and torn by her discus न्यपतन्–(Asuras) fell down

Shattered by the blows of Varahis' (boar Goddess) snout; wounded in their chest by the edges of her sharp-teeth and torn by her discus, the Asuras fell down dead.

37. नखैर्विदारितांश्चान्यान् भक्षयन्ती महासुरान् ।
नारसिंही चचाराजौ नादापूर्णदिगम्बरा ॥

नारसिंही च नखैः विदारितान् अन्यान् महासुरान् भक्षयन्ती नादापूर्णदिगंबरा सती आजौ चचार ।

नारसिंही–lion Goddess नखैः–with her claws विदारितान्–torn अन्यान् महासुरान्–other great Asuras भक्षयन्ती–devouring नादापूर्णदिगम्बरा–all the quarters and the sky filled with roars आजौ–in the battlefield चचार–roamed.

The Lion Goddess tore the great Asuras with her claws and devouring them roamed in the battlefield filling the four quarters and the sky with her roars.

38. चण्डाट्टहासैरसुराः शिवदूत्यभिदूषिताः ।
पेतुः पृथिव्यां पतितांस्तांश्चखादाथ सा तदा ॥

चण्डाट्टहासैः शिवदूत्याभिदूषिताः असुराः पृथिव्यां पेतुः। अथ पतितान् तान् सा तदा चखाद ।

चण्डाट्टहासैः–by the terrible roars शिवदूत्यभिदूषिताः–dispirited by Sivadoothi असुराः–the demons पृथिव्या–on the earth पेतुः–fell down अथ–afterwards पतितान् तान्–those fallen सा–she तदा–then चखाद–ate.

Dispirited by the terrible roarings of Sivadoothi the demons fell down on the ground. Atonce she ate them thus fallen.

39. इति मातृगणं क्रुद्धं मर्दयन्तं महासुरान् ।
दृष्ट्वाऽभ्युपायैर्विविधैर्नेशुर्देवारिसैनिकाः ॥

इति विविधैः अभ्युपायैः महासुरान् मर्दयन्तं क्रुद्धं मातृगणं दृष्ट्वा देवारिसैनिकाः नेशुः ॥

इति – thus क्रुद्धं मातृगणं – enraged Goddesses महासुरान्–the great Asuras मर्दयन्तं–crushed दृष्ट्वा–seeing देवारिसैनिकाः–the Asura army विविधैः अभ्युपायैः- by various means नेशुः- ruined;

The Asura army, seeing the enraged Goddesses, crushing down the great Asuras in various ways ran away in ruin.

40. पलायनपरान्दृष्ट्वा दैत्यान्मातृगणार्दितान् ।
योद्धुमभ्याययौ क्रुद्धो रक्तबीजो महासुरः ॥



मातृगणार्दितान् दैत्यान् पलायनपरान् दृष्ट्वा क्रुद्धः महासुरः रक्तबीजः योद्धुं अभ्याययौ ।

मातृगणार्दितान् – harassed by the host of Goddesses दैत्यान्-Asuras पलायनपरान्-taking to their heels दृष्ट्वा-seeing क्रुद्धः- enraged महासुरः रक्तबीजः–the great Asura Rakthabija योद्धुं- to fight अभ्याययौ- came forward.

Seeing the Asura army taking to their heels being harassed by the host of Goddesses the great Asura Rakthabija got enraged and came forward to fight.

41. रक्तबिन्दुर्यदा भूमौ पतत्यस्य शरीरतः ।
समुत्पतति मेदिन्यां तत्प्रमाणस्तदासुरः ॥

अस्य शरीरतः रक्तबिन्दुः यदा भूमौ पतति तदा मेदिन्यां तत्प्रमाणः असुरः समुत्पतति ।

अस्य शरीरतः -from his body रक्तबिन्दुः-drop of blood यदा भूमौ पतति-when falls on the ground तदा–then मेदिन्यां from the earth तत्प्रमाणः- of his stature असुरः–Asura समुत्पतति rises up.

When a drop of blood from this Asura's body falls on the ground an Asura of his stature rises up from the earth.

42. ययुधे स गदापाणिरिन्द्रशक्त्या महासुरः ।
ततश्चैन्द्री स्ववज्रेण रक्तबीजमताडयत् ॥

स महासुरः गदापाणिः इन्द्रशक्त्या युयुधे । ततः च ऐन्द्री रक्तबीजं स्ववज्रेण अताडयत् ।

स महासुरः–that great Asura गदापाणिः–with club in his hand इन्द्रशक्त्या–with Indra's Sakthi युयुधे-fought ततः च–afterwards ऐन्द्री–Indra's Sakthi रक्तबीजं-Rakthabija स्ववज्रेण-by her thunder bolt अताडयत्-struck.

That great Asura fought with Indra's Sakthi with the club in his hand. Afterwards Indra's Sakthi (Aindree) struck Rakthabija by her thunder bolt.

43. कुलिशेनाहतस्याशु बहु सुस्राव शोणितम् ।
समुत्तस्थुस्ततो योधास्तद्रूपास्तत्पराक्रमाः ॥

कुलिशेन आहतस्य आशु बहुशोणितं सुस्राव । ततः तद्रूपाः तत्पराक्रमाः योधाः समुत्तस्थुः ।

कुलिशेन–by the thunderbolt आहतस्य–struck with आशु–soon बहुशोणितं सुस्राव-much blood flowed ततः–from there तद्रूपाः–like him तत्पराक्रमाः like his valour योद्धाः-the warriors समुत्तस्थुः–rose up.

When he was struck by thunderbolt much blood flowed from his body. From there rose up warriors who resembled him (Rakthabija) in form and valour.

44. यावन्तः पतितास्तस्य शरीराद्रक्तबिन्दवः ।
तावन्तः पुरुषा जातास्तद्वीर्यबलविक्रमाः ।



तस्य शरीरात् यावन्तः रक्तबिन्दवः पतिता तावन्तः तद्वीर्यबलविक्रमाः पुरुषाः जाताः ।

तस्य शरीरात्-from his body यावन्तः रक्तबिन्दवः पतिताः–how many drops of blood flowed तावन्तः पुरुषाः जाताः–so many men were born तद्वीर्यवलविक्रमाः - resembling him in courage, strength and valour.

As many drops of blood flowed from his body, so many persons were born with same strength, courage and valour.

45. ते चापि युयुधुस्तत्र पुरुषा रक्तसम्भवाः ।
समं मातृभिरत्युग्रशस्त्रपातातिभीषणम् ॥

रक्तसंभवाः ते पुरुषाः च अपि तत्र मातृभिः समं अत्युग्र-शस्त्रपातातिभीषणं युयुधुः ।

ते रक्तसंभवाः पुरुषाः–those Asuras born from the blood च अपि–also तत्र–there मातृभिः समं–with the Godesses अत्युग्रशस्त्रपातातिभीषणं–in a most dreadful manner hurling the very formidable weapon युयुधुः-fought.

Those Asuras born from the blood fought with godesses in a most dreadful manner hurling the very formidable weapons.

46. पुनश्च वज्रपातेन क्षतमस्य शिरो यदा ।
ववाह रक्तं पुरुषास्ततो जाताः सहस्रशः ॥

वज्रपातेन पुनः च अस्य शिरः यदा क्षतं तदा रक्तं ववाह। ततः सहस्रशः पुरुषाः जाताः।

वज्रपातेन-by the thunderblot पुनः-again अस्य शिरः-his head यदा क्षतं-was wounded तदा रक्तं ववाह-blood flowed ततः-then सहस्रशः पुरुषाः जाताः-thousands of men were born.

When his head was wounded again by the thunderbolt, much blood flowed and from that blood rose thousands of men.

47. वैष्णवी समरे चैनं चक्रेणाभिजघान ह ।
गदया ताडयामास ऐन्द्री तमसुरेश्वरम् ।।

वैष्णवी च समरे एनं चक्रेण अभिजघान ह। ऐन्द्री च तं असुरेश्वरम् गदया ताडयामास।

वैष्णवी-Sakthi of Vishnu (Vaishnavi) समरे-in the battle चक्रेण-by the discus एनं-him अभिजघान-struck ऐन्द्री-Aindree तं असुरेश्वरं-the Lord of Asuras गदया-by the club ताडयामास-struck.

In the battle Goddess Vaishnavi struck the Asura with her discus, Goddess Aindree struck him with her club.

48. वैष्णवीचक्रभिन्नस्य रुधिरस्रावसम्भवैः ।
सहस्रशो जगद्व्याप्तं तत्प्रमाणैर्महासुरैः ।।

वैष्णवीचक्रभिन्नस्य रुधिरस्रावसंभवैः तत्प्रमाणैः सहस्रशः महासुरैः जगत् व्याप्तं।



वैष्णवीचक्रभिन्नस्य-wounded by the discus of Vaishnavi रुधिरस्रावसंभवैः-rising from the blood that flowed तत्प्रमाणैः-resembling him in stature सहस्रशः महासुरैः-by the thousands of great Asuras जगत् व्याप्तं-the world was filled.

The world was filled with the thousands of Asuras resembling Rakthabija in stature who were born from the blood that flowed from the wounds caused by the discus of Vaishnavi.

49. शक्त्या जघान कौमारी वाराही च तथाऽसिना ।
माहेश्वरी त्रिशूलेन रक्तबीजं महासुरम् ।।

रक्तबीजं महासुरं कौमारी शक्त्या तथा वाराही असिना, माहेश्वरी त्रिशूलेन च जघान।

रक्तबीजं महासुरं-Rakthabija, the great Asura, कौमारी शक्त्या-Kaumari with her jawelin तथा-like wise वाराही असिना-Varahi with her sword, माहेश्वरी त्रिशूलेन च-Maheswari with her trident जघान-struck.

Kaumari-with her jawelin, Varahi with her sword, and Maheswari with her trident, struck the great Asura, Raktabija.

50. स चापि गदया दैत्यः सर्वा एवाहनत् पृथक्
मातॄः कोपसमाविष्टो रक्तबीजो महासुरः ।।

स: दैत्य: महासुर: रक्तबीज: च अपि कोपसमाविष्ट: सर्वा: मातृ: एव गदया पृथक् अहनत् ।

स: दैत्य: महासुर: रक्तबीज: – the demon the great Asuras Rakthabija |कोपसमाविष्ट:–filled with anger सर्वा: मातृ: एव–all the Godesses गदया–with the club पृथक् अहनत्–struck separately.

Rakthabija, the demon, the great Asura, filled with anger struck each and everyone of the Godesses by his club

51· तस्याहतस्य बहुधा शक्तिशूलादिभिर्भुवि ।
पपात यो वै रक्तौघस्तेनासञ्छतशोऽसुरा: ।।

शक्तिशूलादिभि: बहुधा आहतस्य तस्य भुवि य: वै रक्तौघ: पपात तेन शतश: असुरा. आसन् ।

शक्तिशूलादिभि:–by the spears tridents and other weapons बहुधा आहतस्य-wounded in many ways तस्य–his भुवि–on the earth य: वै–that रक्तौघ: पपात-stream of blood fell तेन–by that शतश: असुरा: आसन्-many Asuras were born.

Wounded in many ways by the spears, tridents and other weapons of Godesses, a stream of blood from his body fell on the earth and from that many asuras were born.

52· तैश्चासुरासृक्सम्भूतैरसुरै: सकलं जगत् ।
व्याप्तमासीत्ततो देवा भयमाजग्मुरुत्तमम् ।।



असुरासृक्संभूतै: तै: असुरै: सकलं जगत् च व्याप्तं आसीत् । तत: देवा: उत्तमं भयं आजग्मु: ।

असुरासृक्संभूतै:–born from the blood of the Asura तै: असुरै:- by those Asuras सकलं जगत् च– all the world व्याप्तं आसीत्–was filled तत:–then देवा:–the Gods उत्तमं भयं आजग्मु:-got extremely frightened.

The whole world was filled with those Asuras who were born from the blood of that Asura and the devas got extremely frightened.

53· तान् विषण्णान् सुरान् दृष्ट्वा चण्डिका प्राह सत्वरा ।
उवाच कालीं चामुण्डे विस्तीर्णं वदनं कुरु ।।

तन् सुरान् विषण्णान् दृष्ट्वा चण्डिका सत्वरा कालीं उवाच– "चामुण्डे वदनं विस्त्तीर्णं कुरु ।"

तान् सुरान्–those devas विषण्णान् दृष्ट्वा–seeing sad चण्डिका–Chandika सत्वरा–in haste कालीं उवाच– said to Kali चामुण्डे–O' Chamunda वदनं–mouth विस्त्तीर्णं कुरु-open wide.

Seeing those devas sad Chandika said to Kali hastily —O' Chamunda, open your mouth wide.

54· मच्छस्त्रपातसम्भूतान् रक्तबिन्दून् महासुरान् ।
रक्तबिन्दो: प्रतीच्छ त्वं वक्त्रेणानेन वेगिता ।।

महासुरान् रक्तबिन्दून् मच्छस्त्रपातसंभूतान् रक्तबिन्दून् वेगिता अनेन वक्त्रेण त्वं प्रतीच्छ ।

महासुरान् रक्तबिन्दून्-the great demons in the form of blood drops मच्छस्त्रपातसंभूतान्-born from blows of my weapons वेगिता-quickly अनेन वक्त्रेण-by this mouth त्वं प्रतीच्छ-you take.

You drink quickly the drops of blood falling from the body of the great Asura Rakthabija by the blows of my weapons.

55. भक्षयन्ती चर रणे तदुत्पन्नान्महासुरान् ।
एवमेष क्षयं दैत्यः क्षीणरक्तो गमिष्यति ॥

रणे तदुत्पन्नान् महासुरान् भक्षयन्ती त्वं चर। एवं एष दैत्यः क्षीणरक्तः क्षयं गमिष्यति ।

रणे-in the battle तदुत्पन्नान् महासुरन्-the great Asuras born from him भक्षयन्ती-swallowing त्वं-you चर-walk about एवं एष दैत्यः-thus this Asura क्षीणरक्तः-bloodless क्षयं गमिष्यति-will die

You walk about in the battle field, swallowing the asuras born from him. Thus this demon will become bloodless and perish.

56. भक्षमाणास्त्वया चोग्रा न चोत्पत्स्यन्ति चापरे ।
इत्युक्त्वा तां ततो देवी शूलेनाभिजघान तम् ॥

त्वया च भक्ष्यमाणाः उग्राः अपरे च न च उत्पत्स्यन्ति । इति तां उक्त्वा ततः देवी शूलेन तं अभिजघान ।



त्वया च-by you उग्राः-fierce भक्ष्यमाणाः च-swallowed by अपरे च-others न उत्पत्स्यन्ति-will not be born देवी-Devi तां-her इति उक्त्वा-telling thus शूलेन-by the trident तं अभिजवान-pierced him.

As you go on swallowing these fierce demons they and others too will not be born. Devi telling her thus pierced him with her trident.

57. मुखेन काली जगृहे रक्तबीजस्य शोणितम् ।
ततोऽसावाजघानाथ गदया तत्र चण्डिकाम् ॥

काली रक्तबीजस्य शोणितम् मुखेन जगृहे । ततः असौ तत्र गदया चण्डिकां अथ आजघान ।

काली-Kali रक्तबीजस्य शोणितं-the blood of Rakthabija मुखेन जगृहे-took by the mouth ततः-after that तत्र-there असौ-he गदया-with club चण्डिकां-Chandika अथ-then आजघान-struck with all force.

Kali swallowed the blood of Rakthabija by her mouth. Then he struck Chandika with his club.

58. न चास्या वेदनां चक्रे गदापातोऽल्पिकामपि ।
तस्याहतस्य देहात्तु बहु सुस्राव शोणितम् ॥

गदापातः अस्याः अल्पिकां अपि च वेदनां न चक्रे । आहतस्य तस्य देहात् तु शोणितम् बहु सुस्राव ।

अस्याः-for her गदापातः-the club stroke अल्पिकां अपि च-even a little वेदनां न चक्रे-did not cause any pain आहतस्य-wounded तस्य देहात् तु-from his body शोणितं-blood बहु सुस्राव-flowed much

Blows from the club did not give her even a little pain· But much blood flowed from his wounded body·

59· यतस्ततस्तद्वक्त्रेण चामुण्डा सम्प्रतीच्छति ।
मुखे समुद्गता येऽस्या रक्तपातान्महासुराः ॥
60· तांश्चखादाय चामुण्डा पपौ तस्व च शोणितम् ॥

यतस्ततः चामुण्डा तद्वक्त्रेण संप्रतीच्छति स्मा ये अस्याः मुखे रक्तपातात् महासुराः समुद्गताः । अथ चामुण्डा तान् चखाद । तस्य शोणितं पापौ च ।

यतस्ततः-wherever चामुण्डा-Chamunda तद्वक्त्रेण with her mouth सम्प्रतीच्छति स्म-swallowed ये-those अस्याः मुखे-in her mouth रक्तपातात्-by the flow of blood महासुराः-the great Asuras समुद्गताः-sprang up. अथ-then चामुण्डा-Chamunda तान्-them चाखाद-devoured तस्य शोणितं-his blood पपौ च-drank·

Chamunda swallowed the blood from where ever the blood flowed· Those great Asuras who arose from her mouth through the blood drops,



Chamunda swallowed them also and drank his blood also.

61· देवी शूलेन बज्रेण बाणैरसिभिर्ऋष्टिभिः ।
जघान रक्तबीजं तं चामुण्डापीतशोणितम् ॥

देवी शूलेन वज्रेणः बाणैः असिभिः ऋष्टिभिः च चामुण्डापीतशोणितं तं रक्तबीजं जघान ।

शूलेन-with trident वज्रेण-with the thunderbolt बाणैः-with arrows असिभिः-with swords ऋष्टिभिः च -and with spears चामुण्डापीतशोणितं-his blood drunk by Chamunda तं रक्तबीजं-that Rakthabija जघान-smote.

Devi smote that Asura Rakthabija whose blood had been sucked by Chamunda, by her trident, thunderbolt, arrows, swords and spears

62· स पपात महीपृष्ठे शस्त्रसङ्घसमाहतः ।
नीरक्तश्च महीपाल रक्तबीजो महासुरः ॥

हे महीपाल, नीरक्तः सः रक्तबीजः महासुरः शस्त्रसंघसमाहतः च महीपृष्ठे पपात ।

हे महीपाल- Oh, king नीरक्तः-without (devoid of) blood स महासुरः रक्तबीजः-the great Asuras Rakthabija शस्त्रेसंघसमाहतः च-struck by all the weapons महीपृष्ठे पपात-fell down on the earth

Oh, king, the great Asura, Rakthabija, his blood being drawn and struck by the blows from the various weapons of Devi fell down on the earth.

63. ततस्ते हर्षमतुलमवापुस्त्रिदशा नृप ।
तेषां मातृगणो जातो ननर्तासृङ्मदोद्धतः ॥

हे नृपः ततः ते त्रिदशाः अतुलं हर्षं अवापुः मातृगणः तेषां असृङ्मदोद्धतः जातः ननर्त ।

हे नृप-Oh king ततः-then ते त्रिदशाः-those devas अतुलं हर्षं-unequalled joy अवापुः-got मातृगणः-the host of goddesses तेषां-their असृङ्मदोद्धतः-mad with drinking the blood ननर्त-danced.

Oh king, then those devas became extremely happy. The Goddesses intoxicated by drinking their blood also danced.

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
रक्तबीजवधो नाम अष्टमोऽध्यायः ॥

---

# अथ नवमोऽध्यायः ॥

1. राजोवाच ॥
राजा उवाच-the king said.

2. विचित्रमिदमाख्यातं भगवन् भवता मम ।
देव्याश्चरितमाहात्म्यं रक्तबीजवधाश्रितम् ॥

भगवन्, भवता मम आख्यातं देव्याः रक्तबीजवधाश्रितं इदं चरितमाहात्म्यं विचित्रं ।

भगवन् -Oh sage भवता-by you मम-to me आख्यातं-told देव्याः-of the goddess रक्तबीजवधाश्रितं-the story about the destruction of Rakthabija इदं चरितमाहात्म्यं-greatness of his story विचित्रं-wonderful.

Oh sage this greatness of the story about the killing of Rakthabija related to me by you is wonderful.

3. भूयश्चेच्छाम्यहं श्रोतुं रक्तबीजे निपातिते ।
चकार शुम्भो यत्कर्म निशुम्भश्चातिकोपनः ॥

रक्तबीजे निपातिते शुम्भः अतिकोपनः निशुम्भः च यत् कर्म चकार तत् श्रोतुं अहं भूयः इच्छामि ।

रक्तबीजे निपातिते-when Rakthabija was killed शुम्भः अतिकोपनः निशुम्भः-Sumbha and Nisumbha

full of anger च-also यत् कर्म-what karma चकार-did तत् श्रोतुं-to hear that अहं-I भूयः-again इच्छामि-wish.

I want to hear more about what Sumbha and the wrathful Nisumbha did when Rakthabija was killed.

4· ऋषिरुवाच ॥

ऋषिः उवाच-the sage said.

5· चकार कोपमतुलं रक्तबीजे निपातिते ।
शुम्भासुरो निशुम्भश्च हतेष्वन्येषु चाहवे ॥

आहवे रक्तबीजे निपातिते अन्येषु हतेषु च शुम्भासुरः निशुम्भः च अतुलं कोपं चकार ।

आहवे-in the battle रक्तबीजे निपातिते-when Rakthabija was killed अन्येषु हतेषु च-when the others also were killed शुम्भासुरः निशुम्भः च-the Asuras Sumbha and Nisumbha अतुलं कोपं चकार-got extremely angry.

When Rakthabija and others were killed in the battle, the Asuras Sumbha and Nisumbha got extremely angry.

6· हन्यमानं महासैन्यं विलोक्यामर्षमुद्वहन् ।
अभ्यधावन्निशुम्भोऽथ मुख्ययासुरसेनया ॥



अथ निशुम्भः महासैन्यं हन्यमानं विलोक्य अमर्षं उद्वहन् मुख्यया असुरसेनया अभ्यधावत् ।

अथ-then निशुम्भः-Nisumbha महासैन्यं हन्यमानं विलोक्य-seeing the great army being destroyed अमर्षं उद्वहन्-getting angry मुख्यया असुरसेनया-with chief army of Asuras अभ्यधावत्-ran forward.

Then, seeing the great army being destroyed, Nisumbha became angry and with chief army he rushed forward.

7· तस्याग्रतस्तथा पृष्ठे पार्श्वयोश्च महासुराः ।
सन्दष्टौष्ठपुटाः क्रुद्धा हन्तुं देवीमुपाययुः ॥

तस्य अग्रतः तथा पृष्ठे पार्श्वयोश्च च महासुराः क्रुद्धा सन्दष्टौष्ठपुटाः देवीं हन्तुं उपाययुः ।

तस्य अग्रतः-in his front तथा-the same way पृष्ठे-in his back पार्श्वयोः च-and on both sides महासुराः-great Asuras क्रुद्धाः-with anger सन्दष्टौष्ठपुटाः biting their lips देवीं हन्तुं-to kill Devi उपाययुः-went near.

In his front, in the back and on both sides, great Asuras biting their lips with anger approached Devi to kill her.

8· आजगाम महावीर्यः शुम्भोऽपि स्वबलैर्वृतः ।
निहन्तुं चण्डिकां कोपात्कृत्वा युद्धं तु मातृभिः ॥

महावीर्यः शुम्भः अपि स्वबलै वृतः मातृभिः युद्धं कृत्वा तु कोपात् चण्डिकां निहन्तुं आजगाम ।

महावीर्यः शुम्भः अपि–the great Asura Sumbha also स्वबलैः वृतः-accompanied with his army मातृभिः–with the Goddesses युद्धं कृत्वा–having fought कोपात्-with anger चण्डिकां निहन्तुं-to kill Chandika आजगाम–came.

**Accompanied with his big army, the great Asura Sumbha having fought the goddesses came in anger to kill Chandika.**

**9. ततो युद्धमतीवासीद्देव्या शुम्भनिशुंभयोः ।**
**शरवर्षमतीवोग्रं मेघयोरिव वर्षतोः ॥**

ततः देव्याः वर्षतोः मेघयोः इव शरवर्षं वर्षतोः शुम्भनिशुम्भयोः च अतीव उग्रं युद्धं आसीत् ।

ततः- then देव्याः शुम्भनिशुम्भयोः–between Devi and Sumbha, Nisumbha अतीव युद्धं आसीत्–terrible battle took place वर्षतोः मेघयोः इव–like raining clouds अतीव उग्रं-very fierce शरवर्षं आसीत्-showering of arrows took place.

**Then a terrible battle took place between Devi and Sumbha, Nisumbha where very fierce showering of arrows took place as from the raining clouds.**

**10. चिच्छेदास्तांञ्छरांस्ताभ्यां चण्डिका स्वशरोत्करैः ।**
**ताडयामास चाङ्गेषु शस्त्रौघैरसुरेश्वरौ ॥**



चण्डिका ताभ्यां अस्तान्, शरान् स्वशरोत्करैः चिच्छेद । चण्डिका शस्त्रौघैः असुरेश्वरौ अंगेषु ताडयामास च ।

चण्डिका–Chandika ताभ्यां अस्तान् शरान्–the arrows sent by them स्वशरोत्करैः-by her own arrows चिच्छेद–cut शस्त्रौघैः–by arrows and other weapons असुरेश्वरौ–the two Asuras अंगेषु–on their body parts ताडयामास-struck.

**With her own arrows Chandika cut the arrows sent by the Asuras, and with numerous arrows and other weapons she struck the Asuras on their limbs.**

**11. निशुम्भो निशितं खड्गं चर्म चादाय सुप्रभम् ।**
**अताडयन्मूर्ध्नि सिंहं देव्या वाहनमुत्तमम् ॥**

निशुम्भः सुप्रभं चर्म निशितं खड्गं च आदाय देव्याः उत्तमं वाहनं सिंहं मूर्ध्नि अताडयत् ।

निशुम्भः–Nisumbha सुप्रभं चर्म–shining shield निशितं खड्गं च–and sharp sword उत्तमं वाहनं सिंहं–the chief vehicle-lion आदाय–taking देव्याः-of Devi मूर्ध्नि on the head अताडयत्–struck.

**Nisumbha, taking his shining shield and sharp sword struck Devi's principal vehicle lion on its head.**

**12. ताडिते वाहने देवी क्षुरप्रेणासिमुत्तमम् ।**
**निशुम्भस्याशु चिच्छेद चर्म चाप्यष्टचन्द्रकम् ॥**

वाहने ताडिते देवी आशु निशुम्भस्य उत्तमं असिं अष्ट-चन्द्रकं चर्म अपि च क्षुरप्रेण चिच्छेद ।

वाहने ताडिते–when the vehicle was struck देवी–the goddess आशु–soon निशुम्भस्य उत्तमं असिं–great sword of Nisumbha अष्टचन्द्रकं चर्म अपि–and the shield studded with eight moons क्षुरप्रेण चिच्छेद–cut down with a sharp edged weapon.

When the vehicle was struck down, Devi immediately cut down with a sharp weapon Nisumbha's great sword and the shield figuring eight moons.

13. छिन्ने चर्मणि खड्गे च शक्तिं चिक्षेप सोऽसुरः ।
तामप्यस्य द्विधा चक्रे चक्रेणाभिमुखागताम् ।।

खड्गे चर्मणि च छिन्ने सः असुरः शक्तिं चिक्षेप । अभिमुखागतां अस्य तां शक्तिं अपि सा देवी चक्रेण द्विधा चक्रे ।

खड्गे चर्मणि च–when the sword and shield छिन्ने–were broken सः असुरः–that Asura शक्तिं–javelin चिक्षेप–threw अभिमुखागतां–coming towards अस्य तां शक्तिं अपि–his javelin also सा देवी–that Goddess चक्रेण–with her discus द्विधा चक्रे–split into two.

When the sword and shield were broken, that Nisumbha threw his javelin at her. Seeing the javelin coming towards her, Devi split into two the javelin with her discus.



14. कोपाध्मातो निशुम्भोऽथ शूलं जग्राह दानवः ।
आयान्तं मुष्टिपातेन देवी तच्चाप्यचूर्णयत् ।।

अथ कोपाध्मातः दानवः निशुम्भः शूलं जग्राह । आयान्तं तत् अपि देवी मुष्टिपातेन अचूर्णयत् च ।

अथ–then कोपाध्मातः–full of anger दानवः निशुम्भः–Asura Nisumbha शूलं जग्राह–threw the trident आयान्तं तत् अपि–as it was coming देवी–Devi मुष्टिपातेन–with a blow of fist अचूर्णयत् च–also powdered.

Then Asura Nisumbha, full of anger threw a trident at her. Then Devi with a blow of her fist powdered it on its way itself.

15. आविद्ध्याथ गदां सोऽपि चिक्षेप चण्डिकांप्रति ।
सापि देव्या त्रिशूलेन भिन्ना भस्मत्वमागता ।।

सः अपि अथ गदां आविद्ध्य चण्डिकां प्रति चिक्षेप । सा गदा अपि देव्याः त्रिशूलेन भिन्ना भस्मत्व आगता ।

सः अपि–he also अथ–then गदां आविद्ध्य–whirling the club चण्डिकां प्रति–towards Chandika चिक्षेप–threw सा गदा अपि–that club also देव्याः त्रिशूलेन–by the trident of Devi भिन्ना भस्मत्वं आगता–was split and powdered.

Then he whirling the club, threw it towards Chandika. That club also was split and powdered by the trident of Devi.

16· ततः परशुहस्तं तमायान्तं दैत्यपुङ्गवम् ।
आहत्य देवी बाणौघैरपातयत भूतले ॥

ततः परशुहस्तं आयान्तं तं दैत्यपुङ्गवम् देवी बाणौघैः आहत्य भूतले अपातयत ।

ततः-then परशुहस्तं आयान्तं-coming with the battle_axe तं दैत्यपुङ्गवं-that great Asura देवी-Devi बाणौघैः आहत्य-striking with her numerous arrows भूतले-on the earth अपातयत-felled down.

Devi, seeing the great Asura, coming with the battle-axe in hand, felled him on the ground wounding with a multitude of arrows.

17· तस्मिन्निपतिते भूमौ निशुम्भे भीमविक्रमे ।
भ्रातर्यतीव संक्रुद्धः प्रययौ हन्तुमम्बिकाम् ॥

भीमविक्रमे तस्मिन् भ्रातरि निशुम्भे भूमौ निपतिते अतीव संक्रुद्धः अम्बिकां हन्तुं प्रययौ ॥

भीमविक्रमे – of great valour तस्मिन् भ्रातरि निशुम्भे when that brother Nisumbha भूमौ निपतिते–fell on the earth सुम्भः-Sumbha अतीव संक्रुद्धः-with great anger अम्बिकां हन्तुं-to kill Ambika प्रययौ-advanced.

When his brother that great Nisumbha fell down dead, (his brother) became very angry and rushed to kill Ambika.



18· स रथस्थस्तथात्युच्चैर्गृहीतपरमायुधैः ।
भुजैरष्टाभिरतुलैर्व्याप्याशेषं बभौ नभः ॥

रथस्थः सः शुम्भः गृहीतपरमायुधैः तथा अत्युच्चैः अतुलैः अष्टाभिः भुजैः अशेषं नभः व्याप्य बभौ ।

रथस्थः सः शुम्भः - sitting in chariot, that Sumbha गृहीतपरमायुधैः-holding excellent weapons तथा-and अत्युच्चैः अतुलैः-long and incomparable अष्टाभिः भुजैः-with eight hands अशेषं नभः-the whole sky व्याप्य बभौ-pervaded and shone.

That Sumbha standing in a chariot and grasping excellent weapons pervaded the whole sky with his long and unique eight hands.

19· तमायान्तं समालोक्य देवी शङ्खमवादयत् ।
ज्याशब्दं चापि धनुषश्चकारातीव दुःसहम् ॥

देवी तं आयान्तं समालोक्य शंखं अवादयत् । अतीव दुःसहं ज्याशब्दं च अपि चकार ।

देवी–Devi आयान्तं तं–seeing him coming शंखं अवादयत्–blew the conch अतीव दुःसहं-highly unbearable ज्याशब्दं अपि च-twang of the bow string चकार-made.

Seeing him coming towards her Devi blew the conch and made extremely unbearable sound with the twang of her bow string.

20· पूरयामास ककुभो निजघण्टास्वनेन च ।
समस्तदैत्यसैन्यानां तेजोवधविधायिना ॥

सा देवी समस्तदैत्यसैन्यानां तेजोवधविधायिना निजघण्टास्वनेन ककुभः पूरयामास च ।

सा देवी-that Devi समस्तदैत्यसैन्यानां-of all the Asura armies तेजोवधविधायिना-causing destruction of valour निजघण्टास्वनेन- by the sound of her bell ककुभः-all the quarters पूरयामास च-filled with.

That Devi filled the quarters by the sound of her bell which destroyed the strength of that whole Asura army.

21· ततः सिंहो महानादैस्त्याजितेभमहामदैः ।
पूरयामास गगनं गां तथोपदिशो दश ॥

ततः सिंहः त्यजितेभमहामदैः महानादैः गगनं गां तथा दश उपदिशः पूरयामास ।

ततः सिंहः-then the lion महानादैः-with roars त्याजितेभमहामदैः-which destroyed the strength of elephants गगनं, गां, दश उपदिशः च-sky, earth and the ten quarters also पूरयामास-filled तथा एव-likewise.

Then the lion with his terrific roars which destroyed the great frenzy of elephants, filled the sky, the earth and the ten quarters.



22· ततः काली समुत्पत्य गगनं क्ष्मामताडयत् ।
कराभ्यां तन्निनादेन प्राक्स्वनास्ते तिरोहिताः ॥

ततः काली गगनं समुत्पत्य कराभ्यां क्ष्मां अताडयत् । तन्निनादेन ते प्राक्स्वनाःतिरोहिताः ।

ततः-then काली-Kali गगनं समुत्पत्य-jumping skyward कराभ्यां-with-her hands क्ष्मां अताडयत्-struck the earth तन्निनादेन-with that sound ते प्राक्स्वनाः-all the previous sounds तिरोहिताः-were drowned.

Then Kali jumping high to the sky struck the earth with her hands. In that sound all the previous sounds were drowned.

23· अट्टाट्टहासमशिवं शिवदूती चकार ह ।
तैः शब्दैरसुरास्त्रेसुः शुम्भः कोपं परं ययौ ॥

अथ शिवदूती अशिवं अट्टाट्टहासं चकार ह । तैः शब्दैः असुराः त्रेसुः । शुम्भः परं कोपं ययौ ।

अथ-afterwards शिवदूती-Goddess Sivadoothi अशिवं अट्टाट्टहासं-inauspicious wild roar चकार ह-made तैः शब्दैः-with those sounds असुराः-Asuras त्रेसुः- were frightened शुम्भः-Sumbha परं कोपं ययौ-became very angry.

The Goddess Sivadoothi made an inauspicious loud roar. By those sounds the Asuras were frightened. Sumbha became very angry.

24· दुरात्मंस्तिष्ठ तिष्ठेति व्याजहाराम्बिका यदा ।
तदा जयेत्यभिहितं देवैराकाशसंस्थितैः ॥

दुरात्मन् तिष्ठ तिष्ठ इति अम्बिका यदा व्याजहार तदा आकाशसंस्थितैः देवैः जय इति अभिहितं ।

दुरात्मन्–Oh, evil natured one तिष्ठ तिष्ठ इति–stop, stop अम्बिका–Ambika यदा व्याजहार–when spoke तदा–then आकाशसंस्थितैः देवैः–the Devas who stood in the sky जय–be victorious इति अभिहितं–cheered thus.

When Ambika spoke to the Asura· "Oh, evil minded one stop stop" then the Devas standing in the sky cheered her with loud sounds of "Be victorious, be victorious·"

25· शुम्भेनागत्य या शक्तिर्मुक्ता ज्वालातिभीषणा ।
आयान्ती वह्निकूटाभा सा निरस्ता महोल्कया ॥

शुम्भेन आगत्य वह्निकूटाभा ज्वालातिभीषणा या शक्तिः मुक्ता आयान्ती सा महोल्कया निरस्ता ।

शुम्भेन – by Sumbha आगत्य – approaching वह्निकूटाभा–shining like a mass of fire ज्वालातिभीषणा–terrible with flames या शक्तिः–which spear मुक्ता–released आयान्ती–coming towards सा–that महोल्कया–by a mass of fire निरस्ता–was driven away.



Sumbha coming there, sent a spear shining like a mass of fire with its flames very terrible· Devi seeing that coming towards her drove it away with a mass of fire.

26· सिंहनादेन शुम्भस्य व्याप्तं लोकत्रयान्तरम् ।
निर्घातनिःस्वनो घोरो जितवानवनीपते ॥

हे अवनीपते शुम्भस्य सिंहनादेन लोकत्रयान्तरं व्याप्तं । घोरनिर्घातनिःस्वनः जितवान् ।

हे अवनीपते – Oh Lord शुम्भस्य सिंहनादेन–loud roar of Sumbha लोकत्रयान्तरं–interior of three worlds व्याप्तं–filled घोरः निर्घातनिःस्वनः–terrible thundering sound जितवान्–defeated.

O King, the loud roar of Sumbha pervaded the space in the three worlds. Devi's thundering sound drowned the Asura's terrible sound·

27· शुम्भमुक्ताञ्छरान्देवी शुम्भस्तत्प्रहिताञ्छरान् ।
चिच्छेद स्वशरैरुग्रैः शतशोऽथ सहस्रशः ॥

देवी शुम्भमुक्तान् शरान् शुम्भः तत्प्रहितान् शरान् च शतशः अथ सहस्रशः उग्रैः स्वशरैः चिच्छेद ।

देवी–Devi शुम्भमुक्तान्–released by Sumbha शरान्–arrows तत्प्रहितान्–sent by her (Devi) शरान्–arrows शुम्भः–Sumbha शतशः अथ सहस्रशः–in hundreds and thousands उग्रैः–sharp स्वशरैः–with own arrows चिच्छेद–cut.

Both Devi and Asura split the arrows sent by them against each other by hundreds and thousands of their own sharp arrows.

28. ततः सा चण्डिका क्रुद्धा शूलेनाभिजघान तम् ।
स तदाभिहतो भूमौ मूर्छितो निपपात ह ॥

ततः क्रुद्धा सा चण्डिका तं शूलेन अभिजघान । अभिहतः सः तदा मूर्च्छितः भूमौ निपपात ह ।

ततः–then क्रुद्धा – angry सा चण्डिका–that Chandika तं–him शूलेन–with the trident अभिजघान–struck अभिहतः–wounded सः–he तदा–then मूर्च्छितः–unconscious भूमौ निपपात ह–fell on the ground.

Then wrathful Chandika pierced him with the trident. The wounded Asura fell down senseless on the ground.

29. ततो निशुम्भः सम्प्राप्य चेतनामात्तकार्मुकः ।
आजघान शरैर्देवीं कालीं केसरिणं तथा ॥

ततः निशुम्भः चेतनां संप्राप्य आत्तकार्मुकः देवीं कालीं तथा केसरिणं शरैः आजघान ।

ततः–then निशुम्भः Nisumbha चेतनां संप्राप्य–regaining consciousness आत्तकार्मुकः–holding his bow देवीं कालीं तथा केसरिणं-Devi Kali and the lion शरैः आजघान-struck with arrows.



Regaining consciousness Nisumbha took his bow and struck Devi Kali and the lion with arrows.

30. पुनश्च कृत्वा बाहूनामयुतं दनुजेश्वरः ।
चक्रायुधेन दितिजश्छादयामास चण्डिकाम् ॥

दनुजेश्वरः दितिजः पुनः च बाहूनां अयुतं कृत्वा चण्डिकां चक्रायुधेन छादयामास ।

दनुजेश्वरः–the Lord of Asuras दितिजः-the son of Diti (Sumbha) पुनः च-again बाहूनां अयुतं कृत्वा–creating a ten thousand hands चण्डिकां-Chandika चक्रायुधेन–with his weapon discus छादयामास – covered.

Creating a ten thousand hands the Lord of Asuras and son of Diti, Sumbha, again covered Chandika with the weapon, discus (simultaneously released from his ten thousand hands.)

31. ततो भगवती क्रुद्धा दुर्गा दुर्गार्तिनाशिनी ।
चिच्छेद तानि चक्राणि स्वशरैः सायकांश्च तान् ॥

ततः दुर्गार्तिनाशिनी भगवती दुर्गा क्रुद्धा तानि चक्राणि तान् सायकान् च स्वशरैः चिच्छेद ।

ततः–then दुर्गार्तिनाशिनी–the destroyer of difficulties and afflictions भगवती– the Goddess क्रुद्धा–दुर्गा – Durga getting angry तानि चक्राणि–those

discuses तान् सायकान् च-those arrows also स्वशरैः-by her own arrows चिच्छेद-split.

Then the angry Durga, the destroyer of difficulties and afflictions cut those discuses and arrows with her own arrows.

32. ततो निशुम्भो वेगेन गदामादाय चण्डिकाम् ।
अभ्यधावत वै हन्तुं दैत्यसेनासमावृतः ॥

ततः निशुम्भः वेगेन गदां आदाय दैत्यसेनासमावृतः चण्डिकां हन्तुं अभ्यधावत वै ।

ततः-then निशुम्भः-Nisumbha वेगेन-quickly गदां आदाय-taking the club दैत्यसेनासमावृतः-surrounded by the Asura army चण्डिकां हन्तुं-to kill Chandika अभ्यधावत वै-ran towards indeed.

Nisumbha taking his club in haste and surrounded by the Asura army rushed forward to kill Chandika, indeed.

33. तस्यापतत एवाशु गदां चिच्छेद चण्डिका ।
खड्गेन शितधारेण स च शूलं समाददे ॥

चण्डिका आपततः एव तस्य गदां शितधारेण खड्गेन आशु चिच्छेदः । सः च शूलं समाददे ।

चण्डिका-Chandika आपततः एव-even as he was approaching तस्य गदां-his club शितधारेण खड्गेन-with sharp edged sword आशु-soon चिच्छेद-cut asunder सः च-he शूलं समाददे-took his trident.



Even as Nisumbha was rushing towards her with the club in his hand Chandika cut asunder the alub with her sharp edged sword. Then he took his trident.

34. शूलहस्तं समायान्तं निशुम्भममरार्दनम् ।
हृदि विव्याध शूलेन वेगाविद्धेन चण्डिका ॥

शूलहस्तं समायान्तं अमरार्दनं तं निशुम्भं चण्डिका वेगाविद्धेन शूलेन हृदि विव्याध ।

शूलहस्तं-with trident in hand आयान्तं coming towards अमरार्दनं - the destroyer of Devas तं निशुम्भं-that Nisumbha चण्डिकां-Chandika वेगाविद्धेन शूलेन-by the swiftly hurled trident हृदि विव्याध-pierced his heart.

Chandika with her trident pierced in the heart of Nisumbha the destroyer of Devas who was advancing towards her with trident in hand.

35. भिन्नस्य तस्य शूलेन हृदयान्निःसृतोऽपरः ।
महाबलो महावीर्यस्तिष्ठेति पुरुषो वदन् ॥

शूलेन भिन्नस्य तस्य हृदयात् महाबलः महावीर्यः अपरः पुरुषः तिष्ठ इति वदन् निःसृतः ।

शूलेन-by the trident भिन्नस्य-pierced तस्य हृदयात्-from his heart महाबल:-very strong महावीर्य:-mightly अपर: पुरुष:-another man तिष्ठ इति वदन्-saying 'stop' नि:सृत:-came out.

When he was pierced in his heart by the trident out came another person strong and mighty, saying 'stop'.

36. तस्य निष्क्रामतो देवी प्रहस्य स्वनवत्ततः ।
शिरश्चिच्छेद खड्गेन ततोऽसावपतद्भुवि ॥

ततः देवी स्वनवत् प्रहस्य निष्क्रामतः तस्य शिरः खड्गेन चिच्छेद । ततः असौ भुवि अपतत् ।

ततः-then देवी-Devi स्वनवत् प्रहस्य-laughing loudly निष्क्रामतः-coming out तस्य शिरः-his head खड्गेन चिच्छेद-cut with her sword ततः-then असौ-he भुवि अपतत्-fell down on the ground.

Then Devi langhing loudly cut with her sword the head of the other person coming out. Then he fell down on the ground.

37. ततः सिंहश्चखादोग्रदंष्ट्राक्षुण्णशिरोधरान् ।
असुरांस्तांस्तथा काली शिवदूती तथापरान् ॥

तत सिंहः उग्रदंष्ट्राक्षुण्णशिरोधरान् असुरान् चखाद । तथा काली शिवदूती च अपरान् चखाद च ।



ततः – then सिंहः – lion उग्रदंष्ट्राक्षुण्णशिरोधरान् – whose necks were crushed with his sharp teeth असुरान्-Asuras चखाद-swallowed तथा काली-so also Kali शिवदूती-Sivadoothi अपरान्-others चखाद-devoured.

Then the lion swallowed the Asuras whose necks were crushed by its sharp teeth So also Kali and Sivadoothi swallowed others.

38. कौमारीशक्तिनिर्भिन्नाः केचिन्नेशुर्महासुराः ।
ब्रह्माणीमन्त्रपूतेन तोयेनान्ये निराकृताः ॥

केचित् महासुराः कौमारीशक्तिनिर्भिन्नाः नेशुः । अन्ये ब्रह्माणीमन्त्रपूतेन तोयेन निराकृताः ।

केचित् महासुराः-some great Asuras कौमारीशक्तिनिर्भिन्नाः-being pierced through by spear of Kaumari नेशुः-were destroyed अन्ये-some others ब्रह्माणी-Brahmani मन्त्रपूतेन तोयेन-with the water purified by Manthras (sacred words) निराकृताः-were repulsed

Some great Asuras were killed, being pierced through by the spear of Kaumari. Some others were repelled by Brahmani by sprinkling waters purified by Manthras.

39. माहेश्वरीत्रिशूलेन भिन्नाः पेतुस्तथापरे ।
वाराहीतुण्डघातेन केचिच्चूर्णीकृता भुवि ।

तथा अपरे माहेश्वरीत्रिशूलेन भिन्नाः पेतुः । केचित् वाराहीतुण्डधातेन भुवि चूर्णीकृताः ॥

तथा–In the same way माहेश्वरीत्रिशूलेन–with the trident of Maheswari भिन्नाः पेतु–fell down केचित्–some others वाराही तुण्डधातेन–by the blows from the snout of varahi भुवि–on the earth चूर्णीकृताः–powered.

Likewise Maheswari with the trident pierced some of them and they fell down dead. Some were powdered by the blows from the snout of varahi.

40. खण्डं खण्डं च चक्रेण वैष्णव्या दानवाः कृताः ।
वज्रेण चैन्द्रीहस्ताग्रविमुक्तेन तथापरे ॥

वैष्णव्या च दानवाः चक्रेण खण्डं खण्डं कृताः तथा ऐन्द्री हस्ताग्रविमुक्तेन वज्रेण अपरे च खण्डं खण्डं कृताः ।

वैष्णव्या–By Vaishnavi दानवाः–the Asuras चक्रेण–by the discus खण्डं खण्डं कृताः–were done to pieces तथा–In the same way ऐन्द्री हस्ताग्रविमुक्तेन–released from the hands of Aindri वज्रेण–by the thunder bolt अपरे च others also

By Vaisnavi, the Asuras were cut into pieces by the discus. In the same way the others were killed by thunderbolt released from the hands of Aindri.



41. केचिद्विनेशुरसुराः केचिन्नष्टा महाहवात् ।
भक्षिताश्चापरे कालीशिवदूतीमृगाधिपैः ॥

केचित् असुराः विनेशुः । केचित् महाहवात् नष्टाः । अपरे कालीशिवदूतीमृगाधिपैः भक्षिताः च ।

केचित् असुराः–some Asuras विनेशुः–perished केचित्–some others महाहवात्–from the battle नष्टाः–fled अपरे–others कालीशिवदूतीमृगाधिपैः–by Kali, Sivadooti and the lion भक्षिताः च–were devoured.

Some Asuras perished in the battle, some others fled from the battle and the rest were devoured by Kali, Sivadooti and the lion.

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये निशुम्भवधो नाम नवमोऽध्यायः ॥

---

# अथ दशमोऽध्यायः ॥

1· ऋषिरुवाच ॥

ऋषिरुवाच-the sage said.

2· निशुम्भं निहतं दृष्ट्वा भ्रातरं प्राणसम्मितम् ।
हन्यमानं बलं चैव शुम्भः क्रुद्धोऽब्रवीद्वचः ॥

शुम्भः प्राणसम्मितं भ्रातरं निशुम्भं निहतं, बलं एव हन्यमानं च दृष्ट्वा क्रुद्धः वचः अब्रवीत् ।

शुम्भः-Sumbha प्राणसम्मितं-dear as his own life भ्रातरं निशुम्भं-Brother Nisumbha निहतं-killed बलं-the army एव च-also हन्यमानं-slaughtered दृष्ट्वा-seeing क्रुद्धः-became angry वचः अब्रवीत्-spoke these words.

Sumbha, seeing his brother Nisumbha dear to him as life killed, and the whole army too slaughtered, became very angry and spoke thus·

3· बलावलेपदुष्टे त्वं मा दुर्गे गर्वमावह ।
अन्यासां बलमाश्रित्य युद्धचसे यातिमानिनी ॥

बलावलेपदुष्टे, दुर्गे, गर्वं मा आवह । अतिमानिनी या अन्यासां बलं आश्रित्य युद्धचसे ।

बलावलेपदुष्टे दुर्गे-Oh Durga bloated with the pride of strength त्वं-you गर्वं मा आवह-don't be haughty अन्यासां बलं-upon other's strength आश्रित्य-depending युद्धचसे-you are fighting या अतिमानिनी-you are haughty.



'Oh Durga, bloated with the pride of your strength, don't be proud· You are fighting depending upon the strength of others still you are haughty·

4· देव्युवाच ॥
देवी उवाच-Devi spoke

5· एकैवाहं जगत्यत्र द्वितीया का ममापरा ।
पश्यैता दुष्ट मय्येव विशन्त्यो मद्विभूतयः ॥

अत्र जगति अहं एका एव मम अपरा द्वितीया का ? हे दुष्ट मद्विभूतयः एताः मयि एव विशन्ततः पश्य ।

अत्र जगति-In this world अहं एका एव-I am single indeed मम अपरा द्वितीया का-who is there a second to me ? हे दुष्ट-Oh wicked one मद्विभूतयः एताः-all these my powers (मद्विभूतयः) my manifestations मयि विशन्त्यः-entering me पश्य-see.

In this whole world I am the only one. There is no second to me· Oh wicked one, all these are my manifistations· See them entering me·

6· ततः समस्तास्ता देव्यो ब्रह्माणीप्रमुखा लयम् ।
तस्या देव्यास्तनौ जग्मुरेकैवासीत्तदाम्बिका ॥

ततः ब्रह्माणीप्रमुखाः समस्ताः ताः तस्याः देव्याः तनौ लयं जग्मुः। तदा अम्बिका एका एव आसीत् ।

ततः–then ब्रह्माणीप्रमुखा–Brahmani and the like समस्ताः ताः देव्या–all those Goddesses तस्याः देव्याः–of that Devi तनौ–in the body लयं जग्मुः–merged ततः अम्बिका–then Ambika–एका एवं आसीत्–remained alone.

**Afterwards all the Goddesses beginning with Brahmani merged in the body of that Devi and Ambika stood alone.**

7. **देव्युवाच ॥**

देवी उवाच–Devi said

8. **अहं विभूत्या बहुभिरिह रूपैर्यदास्थिता ।**
**तत्संहृतं मयैकैव तिष्ठाम्याजौ स्थिरो भव ॥**

अहं इह विभूत्या बहुभिः रूपैः यत् आस्थिता तत् मया संहृतं । अहं एका एव आजौ तिष्ठामि । त्वं स्थिरः भव ।

अहं–I इह-here विभूत्या-by my powers बहुभिः रूपैः–by several forms यत् आस्थिता–was present तत्–that मया–by me संहृतं–with drawn अहं एका एव–I all alone आजौ-in the battle तिष्ठामि–stand त्वं–you स्थिरः भव–get ready.

**I stood here surrounded by many manifestations projected by me. Now I have with drawn**



**those powers into myself. Now I am standing alone in the battle. You also get ready.**

9. **ऋषिरुवाच ॥**

ऋषिः उवाच the sage said.

10. **ततः प्रववृते युद्धं देव्याः शुम्भस्य चोभयोः ।**
**पश्यतां सर्वदेवानामसुराणां च दारुणम् ॥**

ततः सर्वदेवानां असुराणां च पश्यतां देव्याः शुम्भस्य च उभयोः दारुणं युद्धं प्रववृते । ।

ततः–then सर्वदेवानां असुराणां च यश्यतां–when all the Devas and Asuras were looking देव्याः शुम्भस्य च उभयोः–of both Devi and Asura दारुणं युद्धं–fierce battle प्रववृते–began.

**When all the Devas and Asuras were looking on, the battle between the Devi and Asura began.**

11. **शरवर्षैः शितैः शस्त्रैस्तथास्त्रैश्चैव दारुणैः ।**
**तयोर्युद्धमभूद्भूयः सर्वलोकभयङ्करम् ॥**

तयोः शरवर्षैः शितैः शस्त्रै तथा दारुणैः अस्त्रैः च सर्वलोकभयङ्करं युद्धं भूयः अभूत् ।

तयोः–their शरवर्षै–by showers of arrows शितैः शस्त्रैः–by sharp weapons तथा–and दारुणैः

अस्त्रैः च–by terrible missiles also सर्वलोकभयङ्करं युद्धं–the battle that frightened the whole world भूयः अभूत्–agin took place.

The terrible battle in which they showered terrible arrows and sharp weapons, again took place which frightened the whole world.

12. दिव्यान्यस्त्राणि शतशो मुमुचे यान्यथाम्बिका ।
बभञ्ज तानि दैत्येन्द्रस्तत्प्रतीघातकर्तृभिः ॥

अथ अम्बिका यानि दिव्यानि अस्त्राणि शतशः मुमुचे तानि दैत्येन्द्रः तत्प्रतीघातकर्तृभिः बभञ्ज ।

अथ – then अम्बिका – Ambika यानि दिव्यानि अस्त्राणि–which divine missiles शतशः–in hundreds मुमुचे–released तानि–they दैत्येन्द्रः–the lord of Asuras तत्प्रतीघातकर्तृभिः–with repulsive weapons बभञ्ज–broke.

When Ambika released hundreds of divine missiles the Lord of Asuras broke them all with repellent weapons.

13. मुक्तानि तेन चास्त्राणि दिव्यानि परमेश्वरी ।
बभञ्ज लीलयैवोग्रहुङ्कारोच्चारणादिभिः ॥

तेन मुक्तानि दिव्यानि अस्त्राणि च परमेश्वरी उग्रहुङ्कारोच्चारणादिभिः लीलया एव बभञ्ज ।



तेन मुक्तानि–released by him दिव्यानि अस्त्राणि–divine arrows also परमेश्वरी–the supreme Goddess उग्रहुङ्कारोच्चारणादिभिः–with fierce shouts of 'hum' etc. लीलया एव–playfully indeed बभञ्ज–broke

The Goddess with loud shouts of 'hum' broke as if in sport the divine missiles sent by him.

14. ततः शरशतैर्देवीमाच्छादयत सोऽसुरः ।
सापि तत्कुपिता देवी धनुश्चिच्छेद चेषुभिः ॥

ततः सः असुरः देवीं शरशतैः आच्छादयत । तत्कुपिता सा देवी अपि इषुभिः धनुः चिच्छेद च ।

ततः–then सः असुरः–the Asura देवीं–Devi शरशतैः–with hundreds of arrows आच्छादयत–covered तत्कुपिता–becoming angry at that सा देवी च–that Devi also इषुभिः–by arrows धनुः चिच्छेद–broke the bow.

Then that Asura covered Devi with hundreds of arrows. The Devi too getting angry broke his bow with arrows.

15. छिन्ने धनुषि दैत्येन्द्रस्तथा शक्तिमथाददे ॥
चिच्छेद देवी चक्रेण तामप्यस्य करे स्थिताम् ।

धनुषि तथा छिन्ने दैत्येन्द्रः शक्तिं समाददे । अस्य करे स्थितां तां अपि देवी चक्रेण चिच्छेद ।

धनुषि छिन्ने-when the bow was broken दैत्येन्द्रः-the lord of Asuras तथा-likewise शक्ति समाददे-took his spear अस्य करे स्थितां-remaining in his hand तां अपि - that also देवी - Devi चक्रेण - with discus चिच्छेद-broke.

When the bow was thus broken, the Lord of Asuras took the spear. Devi with her discus broke the spear in his hand.

16. ततः खड्गमुपादाय शतचन्द्रं च भानुमत् ।
अभ्यधावत्तदा देवीं दैत्यानामधिपेश्वरः ॥

ततः दैत्यानां अधिपेश्वरः खड्गं शतचन्द्रं भानुमत् चर्म च उपादाय तां देवीं अभ्यधावत् ।

ततः-then दैत्यानां अधिपेश्वरः-then chief of Asuras खड्गं-sword शतचन्द्रं भानुमत् चर्म च-studded with hundreds of moons and bright as sun उपाधाय-taking तां देवीं-that Devi अभ्यधावत्-ran towards.

Then the chief of Asuras taking the sword and bright shield studded with hundred moons rushed at Devi.

17. तस्यापतत एवाशु खड्गं चिच्छेद चण्डिका ।
धनुर्मुक्तैः शितैर्बाणैश्चर्म चार्ककरामलम् ॥

चण्डिका धनुर्मुक्तैः शितैः बाणैः आपततः एव तस्य खड्गं अर्ककरामलं चर्म च आशु चिच्छेद ।



आपततः-rushing forward एव-then itself तस्य खड्गं-his sword अर्ककरामलं-bright as the sun's rays चर्म च-shield also धनुर्मुक्तैः-released from the bow शितैः बाणैः-by the sharp arrows चण्डिका-Chandika आशु विच्छेद-soon broke.

Even as the Asura was rushing towards her, Chandika broke into pieces his sword and shining shield with the sharp arrows released from the bow.

18. हताश्वः स तदा दैत्यश्छिन्नधन्वा विसारथिः ।
जग्राह मुद्गरं घोरमम्बिकानिधनोद्यतः ॥

हताश्वः-the horse killed छिन्नधन्वा-the bow broken विसारथिः-without charioteer सः दैत्यः-that Asura तदा-then अम्बिकानिधनोद्यतः-attempting to kill Ambika घोरं मुद्गरं-terrible mace जग्राह-grasped.

The Asura, his horse killed, bow broken and without charioteer grasped a terrible mace attempting to kill Ambika.

19. चिच्छेदापततस्तस्य मुद्गरं निशितैः शरैः ।
तथापि सोऽभ्यधावत्तां मुष्टिमुद्यम्य वेगवान् ॥

आपततः तस्य मुद्गरं देवी निशितैः शरैः चिच्छेद । तथा अपि वेगवान् सः मुष्टिं उद्यम्य तां अभ्यधावत् ।

आपततः - rushing towards her तस्य मुद्गरं- his mace देवी - Devi निशितै शरैः - by sharp arrows विच्छेद-broke तथा अपि-even then वेगवान्-swift सः- he मुष्टि उद्यम्य-raising his fist तां अभ्यधावत्-ran at her.

The Devi broke his mace coming towards her by her sharp arrows Even then raising his fist, he swiftly ran at her.

20. स मुष्टिं पातयामास हृदये दैत्यपुङ्गवः ।
देव्यास्तं चापि सा देवी तलेनोरस्यताडयत् ।।

सः दैत्यपुङ्गवः देव्याः हृदये मुष्टिं पातयामास । सा देवी अपि तलेन तं उरसि अताडयत् ।

सः दैत्यपुङ्गवः-that chief of Asuras देव्याः हृदये- on the chest of Devi मुष्टिं पातयामास-drove his fist सा देवी अपि-Devi also तलेन-by her palm तं-him उरसि-on the chest अताडयत्-struck.

That chief of Asuras drove his fist against Devi's chest. The Devi also struck his chest by her palm.

21. तलप्रहाराभिहतो निपपात महीतले ।
स दैत्यराजः सहसा पुनरेव तथोत्थितः ।।

तलप्रहाराभिहतः सः दैत्यराजः महीतले निपपात । सहसा पुनः एव तथा उत्थितः ।



तलप्रहाराभिहतः-wounded by the blow of her palm सः दैत्यराजः-that king of Asuras महीतले- on the earth निपपात-fell down सहसा-immediately पुन.-again तथा एव-so also उत्थितः- rose up.

Wounded by the blow of her palm the king of the Asuras fell down on the earth; so also again got up immediately.

22. उत्पत्य च प्रगृह्योच्चैर्देवीं गगनमास्थितः ।
तत्रापि सा निराधारा युयुधे तेन चण्डिका ।।

देवीं प्रगृह्य उच्चैः उत्पत्य च गगनं आस्थितः । तत्र अपि सा चण्डिका निराधारा तेन युयुधे ।

देवीं- Devi प्रगृह्य-catching उच्चैः उत्पत्य-jumping high गगनं आस्थितः-rose to the skies तत्र अपि- there also सा चण्डिका-that Chandika निराधारा- without any support तेन-with him युयुधे-fought

Catching hold of her, he sprang up high into the sky. There also without any support Devi fought with him.

23. नियुद्धं खे तदा दैत्यश्चण्डिका च परस्परम् ।
चक्रतुः प्रथमं सिद्धमुनिविस्मयकारकम् ।।

तदा खे चण्डिका दैत्यः च परस्परं प्रथमं सिद्धमुनि विस्मयकारकं नियुद्धं चक्रतुः ।

तदा–then खे–in the sky चण्डिका दैत्य: च–Chandika and Asura परस्परं–with each other प्रथमं–never seen before सिद्धमुनिविस्मयकारकं–causing wonder to sages and siddhas नियुद्धं चक्रतु:–did battle.

Then Chandika and the Asura fought with each other in close contact in the sky a terrible and incomparable battle causing wonder to siddhas and sages.

24. ततो नियुद्धं सुचिरं कृत्वा तेनाम्बिका सह ।
उत्पाट्य भ्रामयामास चिक्षेप धरणीतले ।।

तत: अम्बिका तेन सह सुचिरं नियुद्धं कृत्वा उत्पाट्य भ्रामयामास धरणीतले चिक्षेप ।

तत:–then अम्बिका–Ambika तेन सह–with him सुचिरं–for a long time नियुद्धं कृत्वा–fighting with उत्पाट्य–lifting him भ्रामयामास-whirled धरणीतले-on the earth चिक्षेप च–and threw.

Then Ambika fighting a close battle with him for a long time lifted him up and after whirling threw him down on the earth.

25. स क्षिप्तो धरणीं प्राप्य मुष्टिमुद्यम्य वेगतः ।
अभ्यधावत दुष्टात्मा चण्डिकानिधनेच्छया ।।



क्षिप्त: स: दुष्टात्मा धरणीं प्राप्य चण्डिकानिधनेच्छया वेगत: मुष्टि उद्यम्य अभ्यधावत ।

क्षिप्त:–when thrown स: दुष्टात्मा–he, the wicked one वेगत:–quickly धरणीं प्राप्य-reaching the earth चण्डिकानिधनेच्छया–with the desire to kill Chandika मुष्टि उद्यम्य-raising the fist अभ्यधावत–rushed forward.

The wicked Asura thus thrown to the earth got up immediately and with the desire to kill Chandika rushed forward raising his fist.

26. तमायान्तं ततो देवी सर्वदैत्यजनेश्वरम् ।
जगत्यां पातयामास भित्वा शूलेन वक्षसि ।।

तत: देवी आयान्तं सर्वदैत्यजनेश्वरं तं शूलेन वक्षसि भित्वा जगत्यां पातयामास ।

तत:–then देवी–Devi आयान्तं–approaching तं सर्वदैत्यजनेश्वरं – Lord of the Asuras शूलेन–with the trident वक्षसि भित्वा–striking on the chest जगत्यां–on the earth पातयामास-felled.

Afterwards Devi struck the Lord of Asuras who was rushing towards her, on the chest with her trident and felled him on the earth.

27. स गतासु: पपातोर्व्यां देवीशूलाग्रविक्षत: ।
चालयन् सकलां पृथ्वीं साब्धिद्वीपां सपर्वताम् ।।

देवीशूलाग्रविक्षतः सः गतासुः साब्धिद्वीपां सपर्वतां सकलां पृथ्वीं चालयन् उर्व्यां पपात ।

देवीशूलाग्रविक्षतः-wounded by the trident of Devi सः-he गतासुः-dead साब्धिद्वीपां-together with the sea and सपर्वतां-with the mountains (the islands सकलां पृथ्वीं-whole earth. चालयन्-shaking उर्व्यां पपात-fell down on earth.

**Wounded by the trident of Devi and dead, he fell down shaking the whole earth comprising the seas, islands and mountains.**

28. ततः प्रसन्नमखिलं हते तस्मिन् दुरात्मनि ।
जगत्स्वास्थ्यमतीवाप निर्मलं चाभवन्नभः ॥

तस्मिन् दुरात्मनि हते ततः प्रसन्नं अखिलं जगत् अतीव स्वास्थ्यं आप, नमः निर्मलं च अभवत् ।

तस्मिन् दुरात्मनि हते-when that wicked one was killed ततः-then अखिलं जगत् प्रसन्न-became happy अतीव स्वास्थ्यं आप-regained perfect peace नमः-sky निर्मलं च अभवत्-became clear.

**When that wicked Asura was killed great peace and happiness prevailed in the universe and the sky became clear.**

29. उत्पातमेघाः सोल्का ये प्रागासंस्ते शमं ययुः ।
सरितो मार्गवाहिन्यस्तथासंस्तत्र पातिते ॥



सोल्काः ये उत्पातमेघाः प्राक् आसन् ते शमं ययुः । तत्र पतिते तथा सरितः मार्गवाहिन्यः आसन् ।

सोल्का।-flaming ये उत्पातमेघाः-which clouds boding evil omens प्राक् आसन्-were there before ते शमं ययुः-they became quiet तत्र पतिते-when he fell तथा-in the same way सरितः-the rivers मार्गवाहिन्यः-keeping to their courses अभवन्-became.

**The flaming clouds boding evil portents which were there before became quiet when he fell the rivers flowed with in their bounds.**

30. ततो देवगणाः सर्वे हर्षनिर्भरमानसाः ।
बभूवुर्निहते तस्मिन् गन्धर्वा ललितं जगुः ॥

तस्मिन् निहते तत सर्वे देवगणाः हर्षनिर्भरमानसाः बभूवुः । गन्धर्वाः ललितं जगुः ।

तस्मिन् निहते-when he was killed ततः-then सर्वे देवगणाः-all the hosts of Devas हर्षनिर्भरमानसाः-extremely happy बभूवुः-became गन्धर्वाः-Gandharvas ललितं जगुः-sang sweetly.

**When the Asura was slain, all the hosts of Devas became extremely happy. The gandharvas sang sweetly.**

31. अवादयंस्तथैवान्ये ननृतुश्चाप्सरोगणाः ।
ववुः पुण्यास्तथा वाताः सुप्रभोऽभूद्दिवाकरः ॥

तथा अन्ये अवादयन् । अप्सरोगणाः ननृतुः च । तथा वाताः पुण्याः ववुः दिवाकरः सुप्रभः अभूत् ।

तथा–in the same way अन्ये अवादयन् – some others sounded the trumpet अप्सरोगणाः–the celestial women ननृतुः च–also danced वाताः-winds पुण्याः–favourable ववुः–blew दिवाकरः–the sun सुप्रभः अभूत्–shone with brilliance.

**In the same way some others sounded the trumpet. The celestial women danced. The favourable winds blew. The sun shone brightly.**

32. **जज्वलुश्चाग्नयः शान्ताः शान्तदिग्जनितस्वनाः ॥**

अग्नयः च शान्ताः जज्वलुः । दिग्जनितस्वनाः शान्ताः ।

अग्नयः च–the sacred fires शान्ताः जज्वलुः–blazed peacefully शान्त दिग्जनितस्वनाः – the sounds from different quarters शान्ताः–became calm.

**The sacred fires blazed peacefully. The strange sounds that were heard died down.**

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये शुम्भवधो नाम दशमोऽध्यायः ॥

---

# अथ एकादशोऽध्यायः ॥

1. **ऋषिरुवाच ॥**

ऋषिः उवाच–the sage said.

2. **देव्या हते तत्र महासुरेन्द्रे**
**सेन्द्राः सुरा वह्निपुरोगमास्ताम् ।**
**कात्यायनीं तुष्टुवुरिष्टलाभा-**
**द्विकासिवक्त्राब्जविकासिताशाः ॥**

तत्र महासुरेन्द्रे देव्या हते सेन्द्राः सुराः वह्निपुरोगमाः इष्टलाभात् विकासिवक्त्राब्जविकासिताशाः तां कात्यायनीं तुष्टुवुः ।

तत्र–there महासुरेन्द्रे देव्या हते–when the Lord of Asuras was killed by Devi सेन्द्राः-with Indra सुराः–the Devas वह्निपुरोगमाः–led by the fire God इष्टलाभात्-with their desires fulfilled विकासिवक्त्राब्ज-विकासिताशाः–the quarters being illumined by their cheerful faces तां कात्यायनीं-Devi Kathiyani तुष्टुवुः–praised

**When the Lord of Asuras was killed by Devi, the Devas with Indra led by the fire God brightened the quarters with their cheerful faces because they had attained their desires.**

3· देवि प्रपन्नार्तिहरे प्रसीद
प्रसीद मातर्जगतोऽखिलस्य ।
प्रसीद विश्वेश्वरि पाहि विश्वं
त्वमीश्वरी देवि चराचरस्य ।।

प्रपन्नार्तिहरे देवि प्रसीद। अखिलस्य जगतः मातः प्रसीद। विश्वेश्वरि प्रसीद । देवि, त्वं चराचरस्य ईश्वरी, विश्वं पाहि ।

प्रपन्नार्तिहरे–destroyer of the sorrows of your devotees देवि–Devi प्रसीद–be pleased to bless us अखिलस्य जगतः मातः–mother of the whole world प्रसीद–be pleased त्वं–you चराचरस्य ईश्वरी–you are the governor of all movables and immovables विश्वं पाहि–protect the world.

Oh Devi – destroyer of the sorrows of your devotees, please bless us· Oh the mother of the whole universe, bless us· Mother of the whole world be gracious to us· You are the governor of the movables and immovables· Please protect the world·

4· आधारभूता जगतस्त्वमेका
महीस्वरूपेण यतः स्थितासि ।
अपां स्वरूपस्थितया त्वयैत-
दाप्यायते कृत्स्नमलङ्घ्यवीर्ये ।।

त्वं महीस्वरूपेण यतः स्थिता जगतः त्वं एका आधारभूता असि । अलंङ्घ्यवीर्ये अपां स्वरूपस्थितया त्वया एतत् कृत्स्नं अप्यायते ।



त्वं–you महीस्वरूपेण–in the form of the earth यतः स्थिता–as you remain अस्य जगतः–of this world त्वं एका–you are the sole आधारभूता–substratum अलङ्घ्यवीर्ये–Oh! you of inviolable prowess अपां स्वरूपस्थितया–existing in the form of water त्वया–by you एतत् कृत्स्नं–all this आप्यायते–is gratified.

You are the sole substratum of this world, because you take the form of this earth itself. Oh! Devi, your valour is unequalled· Existing in the form of water you gratify the whole world·

5· त्वं वैष्णवीशक्तिरनन्तवीर्या
विश्वस्य बीजं परमासि माया ।
सम्मोहितं देवि समस्तमेत–
त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ।।

त्वं वैष्णवीशक्तिः अनन्तवीर्या विश्वस्य बीजं परमा माया असि । एतत् समस्तं सम्मोहितं त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ।

त्वं वैष्णवीशक्तिः–you are the power of Vishnu अनन्तवीर्या–your valour is endless विश्वस्य बीजं–the source of universe परमा माया असि–you are the great Maya (illusion) itself एतत् समस्तं–all this world सम्मोहितं–deluded by your Maya त्वं वै प्रसन्ना–if you are pleased भुवि मुक्तिहेतुः–the cause of liberation in the world.

You are the Sakthi of Vishnu of endless valour. You are the supreme illusion which is the source of this universe. Oh Devi, you have kept the whole world under this illusion. If you are pleased that is the cause of liberation.

6. विद्याः समस्तास्तव देवि भेदाः
स्त्रियः समस्ताः सकला जगत्सु ।
त्वयैकया पूरितमम्बयैतत्
का ते स्तुतिः स्तव्यपरापरोक्तिः ॥

हे देवि, समस्ताः विद्याः तव भेदाः जगत्सु सकलाः समस्ताः स्त्रियः तव भेदाः । अम्बया त्वया एकया एतत् पूरितं स्तव्यपरापरोक्तिः स्तुतिः का ।

हे देवि-Oh Devi सपस्ताः विद्याः-all knowledge तव भेदाः-various forms जगत्सु-in the three worlds सकलाः समस्ताः स्त्रियः -all the women तव भेदाः-your forms अम्बया त्वया एकया-by you, the mother alone एतत् पूरितं-filled in this world स्तव्यपरापरोक्तिः स्तुतिः-your praise with words having primary and secondary meanings का-what.

Oh! Devi, all kinds of knowledge are only your different forms. All the women in three worlds, endowed with all the arts are the different



forms of you alone. How to praise you since you are beyond words having primary and secondary meanings.

7. सर्वभूता यदा देवी भुक्तिमुक्तिप्रदायिनी ।
त्वं स्तुता स्तुतये का वा भवन्तु परमोक्तयः ॥

यदा सर्वभूता भुक्तिमुक्तिप्रदायिनी त्वं स्तुता स्तुतये काः परमोक्तयः वा भवन्तु ।

यदा-when सर्वभूता-the embodiment of all beings भुक्तिमुक्तिप्रदायिनी-the bestower of enjoyment and liberation त्वं स्तुता-you praised स्तुतये-for praising काः परमोक्तयः वा भवन्तु-what greater words are there.

You are the embodiment of all beings and the bestower of enjoyment and liberation. You are already praised. What greater words are there than there to praise you?

8. सर्वस्य बुद्धिरूपेण जनस्य हृदि संस्थिते ।
स्वर्गापवर्गदे देवि नारायणि नमोऽस्तु ते ॥

सर्वस्य जनस्य हृदि संस्थिते बुद्धिरूपेण स्वर्गापवर्गदे देवि नारायणि ते नमः अस्तु ।

सर्वस्य जनस्य-of all beings हृदि-in the heart बुद्धिरूपेण-in the form of intelligance संस्थिते-existing स्वर्गापवर्गदे - the bestower of enjoyment and

liberation देवि–Devi नारायणि–Narayani नमः अस्तु–salutations to you.

Oh Devi Narayani, who remains in the heart of all beings in the form of intelligence, the bestower of enjoyment and liberation, to you my salutations.

9. कलाकाष्ठादिरूपेण परिणामप्रदायिनि ।
विश्वस्योपरतौ शक्ते नारायणि नमोऽस्तु ते ॥

कलाकाष्ठादिरूपेण परिणामप्रदायिनि विश्वस्य उपरतौ शक्ते, नारायणि ते नमः अस्तु ।

कलाकाष्ठादिरूपेण–in the form of minutes, moments and other divisions of time परिणामप्रदायिनी–bring about change in things विश्वस्य–of the universe उपरतौ–in the destruction, शक्ते–powerful.

Oh Devi, you are the cause of all changes in the form of minutes, moments and other divisions of time, and the power behind the destruction, of the universe. To you, Oh Narayani, my salutations.

10. सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नरायणि नमोऽस्तु ते ॥

सर्वमङ्गलमाङ्गल्ये, शिवे, सर्वार्थसाधिके, शरण्ये, त्र्यम्बके, गौरि नारायणि ते नमः अस्तु ।



सर्वमङ्गलमाङ्गल्ये–you are the good in every thing good शिवे–Oh! auspicious protector of all beings सर्वार्थसाधिके–giver of all purusharthas! शरण्ये–giver of refuge! त्र्यंबके–three eyed.

Oh! Devi, you are the good in everything good. You are the auspicious bestower of all purusharthas giver of refuge, three eyed, golden coloured To you Narayani, my salutations.

11. सृष्टिस्थितिविनाशानां शक्तिभूते सनातनि ।
गुणाश्रये गुणमये नारायणि नमोऽस्तु ते ।

सृष्टिस्थितिविनाशानां शक्तिभूते सनातनि गुणाश्रये गुणमये नारायणि ते नमः अस्तु ।

सृष्टिस्थितिविनाशानां–the cause of creation, sustenance and destruction शक्तिभूते–source of power सनातनि–eternal गुणाश्रये–substratum of three gunas गुणमये–embodiment of gunas.

h! Devi, you are the power behind creation, sustenance and destruction. You are eternal and substratum and embodiment of three the gunasn. To you Narayani my salutation.

12. शरणागतदीनार्तपरित्राणपरायणे ।
सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते ॥

शरणागतदीनार्तपरित्राणपरायणे सर्वस्य आर्तिहरे देवि, नारायणि ते नमः अस्तु ।

शरणागतदीनार्तपरित्राणपरायणे-you are ever bent up the protection of those who are distressed and take refuge in you सर्वस्य आर्तिहरे-remover of sorrows of all.

Oh Devi, you who are ever bent upon the protection of those who are distressed and take refuge in you, remover of the sufferings of all, to you Narayani my Salutations.

13. हंसयुक्तविमानस्थे ब्रह्माणीरूपधारिणि ।
कौशाम्भःक्षरिके देवि नारायणि नमोऽस्तु ते ॥

हंसमुक्तविमानस्थे ब्रह्माणीरूपधारिणि कौशाम्भःक्षरिके नारायणि ते नमः अस्तु ।

हंसमुक्तविमानस्थे-you who ride in the heavenly chariot yoked with swans ब्रह्माणीरूपधारिणि-assuming the form of Brahmani कौशांभःक्षरिके-you who sprinkle water with Kusa grass.

Oh! Devi, you are in the from of Brahmani and ride in the heavenly chariot yoked with swans. You who sprinkle water with Kusa grass, to you Narayani, my Salutation.

14. त्रिशूलचन्द्राहिधरे महावृषभवाहिनि ।
माहेश्वरीस्वरूपेण नारायणि नमोऽस्तु ते ॥

माहेश्वरीस्वरूपेण महावृषभवाहिनि त्रिशूलचन्द्राहिधरे नारायणि ते नमः अस्तु ।



माहेश्वरीस्वरूपेण-in the form of Maheswari, महावृषभवाहिनि-riding on the great bull त्रिशूल-चन्द्राहिधरे-wearing the trident, the moon, the serpent.

Oh Devi, you who are in the form of Maheswari, riding on the great bull and having as weapons the trident, the moon and the serpent, to you, Narayani, my salutations.

15. मयूरकुक्कुटवृते महाशक्तिधरेऽनघे ।
कौमारीरूपसंस्थाने नारायणि नमोऽस्तु ते ॥

कौमारीरूपसंस्थाने, मयूरकुक्कुटवृते, महाशक्तिधरे अनघे नारायणि ते नमः अस्तु ।

कौमारीरूपसंस्थाने-existing in the form of Kaumari मयूरकुक्कुटवृते-having he company of pea-cock and cock महाशक्तिधरे-wearing the spear as weapon अनघे-sinless.

Oh Devi, in the form of Kaumari, having the company of pea-cock and cock, holding the spear as weapon, to you, the sinless, Oh Narayani our salutations.

16. शङ्खचक्रगदाशाङ्गर्गृहीतपरमायुधे ।
प्रसीद वैष्णवीरूपे नारायणि नमोऽस्तु ते ॥

शंङ्खचक्रगदाशाङ्गर्गृहीतपरमायुधे वैष्णवीरूपे प्रसीद । नारायणि ते नमः अस्तु ।

शंङ्खचक्रगदाशार्ङ्गगृहीतपरमायुधे–holding the great weapons, conch, discus, club and bow वैष्णवीरूपे-in the form of Vaisnavi प्रसीद–be gracious.

Oh Devi, you are in the form of Vaisnavi holding the great weapons, conch, discus, club and bow please be gracious. To you Oh, Narayani, our salutations.

17. गृहीतोग्रमहाचक्रे दंष्ट्रोद्धृतवसुन्धरे ।
वराहरूपिणि शिवे नारायणि नमोऽस्तु ते ।।

शिवे वराहरूपिणि गृहीतोग्रमहाचक्रे दंष्ट्रोद्धृतवसुन्धरे नारायणि ते नमः अस्तु ।

शिवे–the auspicious one वराहरूपिणि–having the form of boar गृहीतोग्रमहाचक्रे-holding the powerful great discus दंष्ट्रोद्धृतवसुन्धरे-you who lifted the earth by your tusk.

Oh auspicious Devi you, taking the form of boar, holding the great and sharp discus, who lifted the earth with your tusk, to you, Oh Narayani our salutations.

18. नृसिंहरूपेणोग्रेण हन्तुं दैत्यान् कृतोद्यमे ।
त्रैलोक्यत्राणसहिते नारायणि नमोऽस्तु ते ।।

उग्रेण नृसिंहरूपेण दैत्यान् हन्तुं कृतोद्यमे त्रैलोक्यत्राणसहिते नारायणि ते नमः अस्तु ।



उग्रेण नृसिंहरूपेण–by the terrible form of man-lion दैत्यान् हन्तुं–to kill Asuras कृतोद्यमे–you attempted त्रैलोक्यत्राणसहिते–protector of the three worlds.

Oh Devi, you taking the terrible form of man-lion, attempted to kill Asuras, you are ever anxious to protect the three worlds. Oh, Narayani our salutations to you.

19. किरीटिनि महावज्रे सहस्रनयनोज्ज्वले ।
वृत्रप्राणहरे चैन्द्रि नारायणि नमोऽस्तु ते ।।

ऐन्द्रि किरीटिनि महावज्रे सहस्रनयनोज्ज्वले वृत्रप्राणहरे नारायणि ते नमः अस्तु ।

ऐन्द्रि–Oh Indrani किरीटिनि–wearing a diadem महावज्रे–the great thunderbolt सहस्रनयनोज्ज्वले–dazzling with a thousand eyes वृत्रप्राणहरे–took away the life of Vrtra.

In the form of Indrani wearing a diadem and a great thunderbolt, dazzling with a thousand eyes, you took away the life of Vrtra. Oh, Narayani our salutations to you.

20. शिवदूतीस्वरूपेण हतदैत्यमहाबले ।
घोररूपे महारावे नारायणि नमोऽस्तु ते ।।

शिवदूतीस्वरूपेण हतदैत्यमहाबले घोररूपे महारावे नारायणि ते नमः अस्तु ।

शिवदूतीस्वरूपेण–in the form of Sivadooti हृतदैत्यमहाबले–who killed the mighty host of daityas, घोररूपे–terrible form महारावे–terrible, voice

Oh Devi, you taking the form of Sivadooti, killed the mighty hosts of daityas. You have terrible form and loud voice. To you Oh, Narayani our salutations.

21. दंष्ट्राकरालवदने शिरोमालाविभूषणे ।
चामुण्डे मुण्डमथने नारायणि नमोऽस्तु ते ।।

दंष्ट्राकरालवदने शिरोमालाविभूषणे चामुण्डे मुण्डमथने नारायणि ते नमः अस्तु ।

दंष्ट्राकरालवदने–you of face looking terrible with tusks, शिरोमालाविभूषणे–adorned with a garlands of heads चामुण्डे–Oh Chamunda मुण्डमथने–Oh slayer of Munda.

Your face looking terrible with your tusks, adorned with a garland of heads, Chamundi, the slayer of Munda Oh, Narayani, our salutations.

22. लक्ष्मि लज्जे महाविद्ये श्रद्धे पुष्टि स्वधे ध्रुवे ।
महारात्रि महामाये नारायणि नमोऽस्तु ते ।।

लक्ष्मि लज्जे महाविद्ये श्रद्धे पुष्टि स्वधे ध्रुवे महारात्रि महामाये नारायणि ते नमः अस्तु ।



लक्ष्मि–Lakshmi (good fortune) लज्जे–modesty महाविद्ये–great wisdom श्रद्धे–faith पुष्टि–nourishment स्वधे–swadha ध्रुवे–immovable महारात्रि–great night महामाये–great illusion.

Oh Devi, you are the good fortune, modesty, great wisdom, faith, nourishment and swadha. Oh! you are immovable Oh! you great illusion Salutations to thee Oh! Narayani.

23. मेधे सरस्वति वरे भूति बाभ्रवि तामसि ।
नियते त्वं प्रसीदेशे नारायणि नमोऽस्तु ते ।।

मेधे सरस्वति शिवे भूति बाभ्रवि तामसि ईशे नियते त्वं प्रसीद ।

मेधे–intelligence सरस्वति–Saraswathi शिवे–auspicious भूति –satuaguna बाभ्रवि–rajoguna तामसि–of tamoguna नियते–dispenser of fortunes ईशे–Parvathy त्वं प्रसीद–you be pleased to bless us.

Oh Devi, you are intelligence, Saraswati good fortune, giver of prosperity, consort of Vishnu, Kali, Parvathy. Oh Narayani, our salutations. Be pleased to bless us.

24. सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ।।

सर्वस्वरूपे सर्वेशे सर्वशक्ति समन्विते नः भयेभ्यः त्राहि हे देवि, दुर्गे ते नमः ।

सर्वस्वरूपे–you exist in the form of all सर्वेशे–queen of all सर्वशक्तिसमन्विते–the reservoir of all strength भयेभ्यः–from all fear त्राहि–protect, नः–us.

Oh Devi, you exist in all forms. You are the Queen of all beings. You are the reservoir of all strength, protect us from all fears. Oh Devi, Durga, to you our salutations,

25. एतत्ते वदनं सौम्यं लोचनत्रयभूषितम् ।
पातु नः सर्वभूतेभ्यः कात्यायनि नमोऽस्तु ते ॥

ते एतत् लोचनत्रयभूषितम् सौम्यं वदनं नः सर्वभूतेभ्यः पातु । कात्यायनि ते नमः अस्तु ।

एतत् ते–your this लोचनत्रयभूषितं–adorned with three eyes सौम्यं–gentle वदनं–face नः–us सर्वभीतिभ्यः–from all fears पातु–protect.

May this face of yours adorned with three eyes and very gentle to look at, protect us from all fears. Oh Karthyayani, salutations to you.

26. ज्वालाकरालमत्युग्रमशेषासुरसूदनम् ।
त्रिशूलं पातु नो भीतेर्भद्रकालि नमोऽस्तु ते ॥

ज्वालाकरालं, अत्युग्रं, अशेषासुरसूदनं त्रिशूलं नः भीतेः पातु । भद्रकालि, ते नमः अस्तु ।



ज्वालाकरालं terrible with flames अत्युग्रं–very fierce अशेषासुरसूदनं–capable of destroying all Asura enemies त्रिशूलं–the trident नः–us भीतेः–from fear पातु–protect.

Let the trident which is terrible with flames and very fierce, and destroyer of all Asura enemies protect us from fear.

27. हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत् ।
सा घण्टा पातु नो देवि पापेभ्यो नः सुतानिव ॥

या स्वनेन जगत् आपूर्य दैत्यतेजांसि हिनस्ति सा घण्टा हे देवि सुतान् इव नः पापेभ्यः पातु ।

या स्वनेन–which with its sound जगत् आपूर्य–filling the world दैत्यतेजांसि–valour of the daityas हिनस्ति–destroys सा घण्टा–that bell हे देवि–Oh Devi स्वसुतान् इव–like one's own children नः–us पापेभ्यः–from sins पातु–protect.

Let the bell which filling the world with its sound destroys the might of the Asuras, protect us from all sins as one's own children are protected.

28. असुरासृग्वसापङ्कचर्चितस्ते करोज्ज्वलः ।
शुभाय खड्गो भवतु चण्डिके त्वां नता वयम् ॥

असुरासृग्वसापङ्कचर्चितः करोज्वलः ते खड्गः शुभाय भवतु । चण्डिके वयं त्वां नताः ।

असुरासृग्वसापङ्कचर्चित:–smeared with blood and fat of Asuras करोज्ज्वल:–shining in your hand ते खड्ग: –your sword शुभाय भवतु–be for our welfare चण्डिके–Oh Chandika वयं त्वां नता:–we prostrate before you.

Let your sword which smeared with blood and fat of Asuras shines in your hand be for our welfare. Oh Chandika, our prostrations to you.

29. रोगानशेषानपहंसि तुष्टा
रुष्टा तु कामान् सकलानभीष्टान् ।
त्वामाश्रितानां न विपन्नराणां
त्वामाश्रिता ह्याश्रयतां प्रयान्ति ॥

तुष्टा त्वं अशेषान् रोगान् अपहंसि । रुष्टा तु सकलान् अभीष्टान् कामान् अपहंसि । त्वां आश्रितानां नराणां न विपत् । त्वां आश्रिता: आश्रयतां प्रयान्ति हि ।

तुष्टा–when pleased त्वं–you अशेषान् रोगान्–all illness अपहंसि–destroy रुष्टा–when angry सकलान् अभीष्टान् कामान्–all desires longed for अपहंसि–destroy त्वां आश्रितानां नराणां–to those who take refuge in you न विपत्–there is no danger त्वां आश्रिता:–your devotees आश्रयतां प्रयान्ति–become refuge to others.



When you are pleased you destroy all illness. When you are displeased you destroy the long cherished desires. Those who take refuge in you have no danger and they become a source of protection to others also.

30. एतत्कृतं यत्कदनं त्वयाद्य
धर्मद्विषां देवि महासुराणाम् ।
रूपैरनेकैर्बहुधात्ममूर्ति
कृत्वाम्बिके तत्प्रकरोति कान्या ॥

आत्ममूर्ति बहुधा कृत्वा अनेकै: रूपै: धर्मद्विषां महासुराणां यत् कदनं एतत् हे देवि त्वया अद्य कृतं तत् अन्या का प्रकरोति ।

आत्ममूर्ति बहुधा कृत्वा–multiplying your own form into many अनेकै: रूपै:–with several forms धर्मद्विषां महासुराणां–great Asuras who hate righteousness यत् कदनं एतत्–this sorrow हे देवि–Oh Devi त्वया–by you अद्य–today कृतं–done तत् अन्या का प्रकरोति–who else will do that.

Oh Devi, you multiplying your own self and taking many forms, the sorrow you have brought upon these Asuras who are haters of righteousness, who else will do that for us.

31. विद्यासु शास्त्रेषु विवेकदीपे-
ष्वाद्येषु वाक्येषु च का त्वदन्या ।
ममत्वगर्तेऽतिमहान्धकारे
विभ्रामयत्येतदतीव विश्वम् ॥

विवेकदीपेषु शास्त्रेषु आद्येषु वाक्येषु विद्यासु च एतत् विश्वं त्वदन्या का अतिमोहान्धकारे ममत्वगर्ते अतीव विभ्रामयति ।

विवेकदीपेषु – in the scriptures where the knowledge of discrimination is revealed आद्येषु वाक्येषु–vedic sayings विद्यासु च–branches of arts शास्त्रेषु–in sciences त्वदन्या का–who is there except you अतिमोहान्धकारे–in the darkness of delusion ममत्वगर्ते-depths of attachment अतीव विभ्रामयति–to whirl about again and again.

Who else is described except you in the scriptures revealing the great knowledge of discrimination in the vedic sayings in the other branches of knowledge ? Who else is hurling this world in the darkness of delusion and depth of attachment ?

32· रक्षांसि यत्रोग्रविषाश्च नागा
यत्रारयो दस्युबलानि यत्र ।
दावानलो यत्र तथाब्धिमध्ये
तत्र स्थिता त्वं परिपासि विश्वम् ॥

रक्षांसि यत्र उग्रविषाः नागाः यत्र दस्युबलानि यत्र दावानलः यत्र अब्धिमध्ये च तत्र स्थिता त्वं विश्वम् परिपासि ।

रक्षांसि यत्र–where there are demons उग्रविषाः नागाः यत्र–where there are highly poisonous snakes दस्युबलानि यत्र-where foes and hosts of robbers



exist दावानलः यत्र–where forest fire exists अब्धिमध्ये–in the midst of ocean तत्र स्थिता त्वं-there every where you appear विश्वं परिपासि–rescue the world.

Where ever evil spirits exist, where exist virulent poisonous snakes, where exist foes and hosts of robbers, where exists forest fire, in the midst of ocean every where you appear and protect the world.

33· विश्वेश्वरि त्वं परिपासि विश्वं
विश्वात्मिका धारयसीति विश्वम् ।
विश्वेशवन्द्या भवती भवन्ति
विश्वाश्रया ये त्वयि भक्तिनम्राः ॥

विश्वेश्वरि त्वं विश्वं परिपासि । विश्वात्मिका त्वं विश्वं धारयसि इति । भवती विश्वेशवन्द्या । ये त्वयि भक्तिनम्राः ते विश्वाश्रयाः भवन्ति ।

विश्वेश्वरि–Oh Queen of the universe त्वं विश्वं परिपासि–you protect the world विश्वात्मिका–the self of the universe त्वं विश्वं धारयसि–you support the universe भवती विश्वेशवन्द्या–you are worshipped by the Lord of the universe ये–those who त्वयि–in you भक्तिनम्राः–humble with devotion ते–they विश्वाश्रयाः भवन्ति–they become refuge of the universe.

Oh Queen of the universe, you protect the universe. As the self of the universe, you support the world. You are worshipped by Lord Siva. Those who are humble with devotion to you become the refuge of the world.

34. देवि प्रसीद परिपालय नोऽरि भीते-
नित्यं यथासुरवधादधुनैव सद्यः ।
पापानि सर्वजगतां प्रशमं नयाशु
उत्पातपाकजनितांश्च महोपसर्गान् ॥

देवि प्रसीद, असुरवधात् यथा अधुना सद्यः एव तथा नित्यं अरिभीतेः नः परिपालय । सर्वजगतां पापानि उत्पातपाकजनितान् महापसर्गान् च आशु प्रशमं नय ।

देवि प्रसीद-Oh mother, be gracious असुरवधात्-by killing of Asuras यथा-just as अधुना-now सद्यः एव-soon नित्यं तथा-in the same way always अरिभीतेः-from the fear of enemies नः-us परिपालय-protect सर्वजगतां पापानि-the sins of the whole world उत्पातपाकजनितान्-those arising from the maturing of evil omens महोपसर्गान्-great calamities आशु-quickly प्रशमं नय-destroy.

Oh Devi, be pleased. Protect us always from fear of enemies as you have now done by soon killing the Asuras. Destroy the sins of the entire world as also the great calamities arising when evil omens mature.



35. प्रणतानां प्रसीद त्वं देवि विश्वार्तिहारिणि ।
त्रैलोक्यवासिनामीड्ये लोकानां वरदा भव ॥

देवि, विश्वार्तिहारिणी, त्रैलोक्यवासिनां ईड्ये, प्रणतानां प्रसीद, लोकानां त्वं वरदा भव ।

देवि-Oh Goddess विश्वार्तिहारिणि-the destroyer of all sorrows त्रैलोक्यवासिनां ईड्ये-adored by the dwellers of the three worlds प्रणतानां प्रसीद-be gracious to those who prostrate before you लोकानां-of the universe त्वं-you वरदा-bestower of boon भव-be.

Oh Goddess, Oh destroyer of the sorrows of the whole world and adored by the dwellers of the three worlds, be gracious to those who prostrate before you. Kindly be bountiful to the universe.

36. देव्युवाच ॥

देवी उवाच-the Devi said.

37. वरदाहं सुरगणा वरं यन्मनसेच्छथ ।
तं वृणुध्वं प्रयच्छामि जगतामुपकारकम् ॥

सुरगणाः, अहं वरदा । यत् वरं मनसा इच्छथ जगतां उपकारकं तं वृणुध्वं प्रयच्छामि ।

सुरगणाः-O, Devas अहं वरदा-I am pleased to bestow boons यत् वरं-what boon मनसा

इच्छथ–you desired in mind जगतां उपकारकं तं–for the welfare of the world वृणुध्वं-you choose that प्रयच्छसि–I will bestow that.

O' Devas, I am pleased to bestow boons. You ask for whatever you desire, I will bestow that for the welfare of the world.

38. देवा ऊचुः ॥

देवाः ऊचुः-the Devas said

39. सर्वबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि ।
एवमेव त्वया कार्यमस्मद्वैरिविनाशनम् ॥

अखिलेश्वरि त्रैलोक्यस्य सर्वबाधाप्रशमनं एवं एव अस्मद् वैरिविनाशनं च त्वया कार्यं ।

अखिलेश्वरि–Queen of the universe त्रैलोक्यस्य–of the three worlds सर्वबाधा-प्रशमनं-destroying afflictions of the three worlds एवं एव-in the same way अस्मद् वैरिविनाशनम् च–destroying all our enemies त्वया कार्यं–to be done by you.

Oh ruler of the universe, you please remove all the afflictions of the three worlds and destroy all our enemies.

40. देव्युवाच ।

देवी उवाच–the Devi said



41. वैवस्वतेऽन्तरे प्राप्ते अष्टाविंशतिमे युगे ।
शुम्भो निशुम्भश्चैवान्यावुत्पत्स्येते महासुरौ ॥

वैवस्वते अन्तरे अष्टाविंशतिमे युगे प्राप्ते शुम्भः निशुम्भः एव च अन्यौ महासुरौ उत्पत्स्येते ।

वैवस्वते अन्तरे–during the period of Vaivaswatha Manu अष्टाविंशतिमे युगे प्राप्ते-during 28th age शुम्भः निशुम्भः एव च अन्यौ महासुरौ उत्पत्स्ये-two other great Asuras Sumbha and Nisumbha will be born.

During the period of Vaivaswatha Manu in the twenty eighth age, two other great Asuras named Sumbha and Nisumbha will be born.

42. नन्दगोपगृहे जाता यशोदागर्भसम्भवा ।
ततस्तौ नाशयिष्यामि विन्ध्याचलनिवासिनी ॥

ततः नन्दगोपगृहे यशोदागर्भसंभवा जाता विन्ध्याचलनिवासिनी तौ नाशयिष्यामि ।

ततः-afterwards यशोदागर्भसंभवा–with origin in womb of Yasoda नन्दगोपगृहे जाता–born in the house of Nandagopa विन्ध्याचलनिवासिनी–dwelling in the Vindhya mountains तौ–them नाशयिष्यामि–will destroy.

Afterwards I shall be born in the house of Nandagopa as the daughter of Yasoda and dwelling on Vindhya mountains, I will destroy them.

43. पुनरप्यतिरौद्रेण रूपेण पृथिवीतले ।
अवतीर्य हनिष्यामि वैप्रचित्तांस्तु दानवान् ।।

पुनः अपि अतिरौद्रेण रूपेण पृथिवीतले अवतीर्य वैप्रचित्तान् महासुरान् हनिष्यामि ।

पुनः अपि-then again अतिरौद्रेण रूपेण-with a terrible form पृथिवीतले-on the earth अवतीर्य-having born वैप्रचित्तान्-descendants of Vipracitti महासुरान्-great Asuras हनिष्यामि-shall slay.

Again I will be born on the earth with a terrible form and slay the great Asuras, descendants of Vipracitti.

44. भक्षयन्त्याश्च तानुग्रान् वैप्रचित्तान् महासुरान् ।
रक्ता दन्ता भविष्यन्ति दाडिमीकुसुमोपमाः ।।

वैप्रचित्तान् तान् उग्रान् महासुरान् भक्षयन्त्याः दन्ताः दाडिमीकुसुमोपमाः रक्ताः भविष्यन्ति च ।

वैप्रचित्तान्-the descendants of Vipracitti तान्-them उग्रान्-fierce महासुरान्-great Asuras भक्षयन्त्याः-eating दन्ताः- teeth दाडिमीकुसुमोपमाः-resembling the flowers of pomegranate रक्ताः-red भविष्यन्ति च-will become.

When I shall eat the fierce great Asuras, descendants of Vipracitti my teeth will become red as the flowers of the pomegranate tree.



45. ततो मां देवताः स्वर्गे मर्त्यलोके च मानवाः ।
स्तुवन्तो व्याहरिष्यन्ति सततं रक्तदन्तिकाम् ।।

ततः स्वर्गे देवताः मर्त्यलोके मानवाः च मां स्तुवन्तः सततं रक्तदन्तिकां व्याहरिष्यन्ति ।

ततः-then स्वर्गे-in the heaven देवताः-the Devas मर्त्यलोके-on the earth मानवाः-human beings च-and मां स्तुवन्तः-praising me सततं-always रक्तदन्तिकां-red toothed व्याहरिष्यन्ति-will call.

Then the Devas in heaven and the human beings on the earth will always praise me referring to me by the name 'Red-toothed.'

46. भूयश्च शतवार्षिक्यामनावृष्टयामनम्भसि ।
मुनिभिः संस्तुता भूमौ सम्भविष्याम्ययोनिजा ।।

भूयः च भूमौ शतवार्षिक्यां अनावृष्टयां अनंभसि मुनिभिः संस्तुता अयोनिजा संभविष्यामि ।

भूयः च-again भूमौ-on the earth शतवार्षिक्यां-for a hundred years अनावृष्टयां-without rain अनंभसि-without water मुनिभिः-by the sages संस्तुता-praised अयोनिजा-without entering the womb संभविष्यामि-will appear.

Once again when for a hundred years without rains the earth becomes draught ridden the sages propitiate me and then I will appear without entering a womb.

47· ततः शतेन नेत्राणां निरीक्षिष्यामि यन्मुनीन् ।
कीर्तयिष्यन्ति मनुजाः शताक्षीमिति मां ततः ॥

ततः नेत्राणां शतेन तान् मुनीन् यत् निरीक्षिष्यामि ततः मुनयः मां शताक्षीं इति कीर्तयिष्यन्ति ।

ततः–then नेत्राणां शतेन–by hundred eyes तान् मुनीन्–these sages निरीक्षिष्यामि–look at ततः मुनयः–and the sages मां–me शताक्षीं इति–as hundred eyed कीर्तयिष्यन्ति–will praise.

Then with hundred eyes, I will look upon the sage and the sages will praise me referring to me as hundred eyed.

48· ततोऽहमखिलं लोकमात्मदेहसमुद्भवैः ।
भरिष्यामि सुराः शाकैरावृष्टेः प्राणधारकैः ॥

हे सुराः ततः अहं आत्मदेहसमुद्भवैः प्राणधारकैः शाकैः आवृष्टेः अखिलं लोकं भरिष्यामि ।

हे सुराः–Oh Devas ततः–then अहं–I आत्मदेहसमुद्भवैः–born out of my own body प्राणधारकैः–sustaining life शाकैः–vegetables आवृष्टेः–till the rains set in अखिलं–all the लोकं–world भरिष्यामि–maintain.

Till the rains set in I will sustain the whole world with the vegetables created from my own body.

49· शाकम्भरीति विख्यातिं तदा यास्याम्यहं भुवि ।
तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरम् ॥



तदा अहं शाकम्भरी इति विख्यातिं यास्यामि तत्र एव दुर्गमाख्यं महासुरं वधिष्यामि च ।

तदा–then अहं–I शाकम्भरी इति–by the name Sakambhari यास्यामि–attain तत्र एवं–then and there दुर्गमाख्यं–by name Durgama महासुरं–great Asura वधिष्यामि च–will slay also.

Then I will be known by the famous name Sakambhari. Then and there I will slay the great Asura Durgama.

50· दुर्गादेवीति विख्यातं तन्मे नाम भविष्यति ।
पुनश्चाहं यदा भीमं रूपं कृत्वा हिमाचले ॥
51· रक्षांसि क्षययिष्यामि मुनीनां त्राणकारणात् ।
तदा मां मुनयः सर्वे स्तोष्यन्त्यानम्रमूर्तयः ॥
52· भीमादेवीति विख्यातं तन्मे नाम भविष्यति ।
यदारुणाख्यस्त्रैलोक्ये महाबाधां करिष्यति ॥

तत् मे दुर्गादेवी इति विख्यातं नाम भविष्यति । पुनः च अहं मुनीनां त्राणकारणात् हिमाचले भीमं रूपं कृत्वा यदा रक्षांसि क्षययिष्यामि तदा सर्वे मुनयः आनम्रमूर्तयः मां स्तोष्यन्ति । तत् मे भीमादेवी इति विख्यातं नाम भविष्यति ।

तत्–then मे–mine दुर्गादेवी–Goddess Durga इति नाम–the name विख्यातं भविष्यति–will become famous पुनः च–again अहं–I मुनीनां त्राणकारणात्–for the protection of the sages हिमाचले–on the Himalayas भीमं रूपं कृत्वा–taking a huge form यदा–

when रक्षांसि–Asuras क्षययिष्यामि–destroy तदा–then me सर्वे मुनयः– all the sages आनम्रमूर्तयः–bending their heads in humility मां–me स्तोष्यन्ति–will praise तत्–then मे–mine भीमादेवी इति नाम–name Bhima Devi विख्यातं भविष्यति - will become famous.

Then my name Durgadevi will become famous. Then again for the protection of the sages taking a huge form on the Himalayas when I destroy the great Asuras then all the sages bending their heads with devotion will praise me and my name Bhimadevi will become famous.

53· तदाऽहं भ्रामरं रूपं कृत्वासङ्ख्येयषट्पदम् ।
त्रैलोक्यस्य हितार्थाय वधिष्यामि महासुरम् ॥
54· भ्रामरीति च मां लोकास्तदा स्तोष्यन्ति सर्वतः ।
इत्थं यदा यदा बाधा दानवोत्था भविष्यति ॥
55· तदा तदाऽवतीर्याहं करिष्याम्यरिसंक्षयम् ॥

यदा अरुणाख्यः त्रैलोक्ये महाबाधां करिष्यति तदा त्रैलोक्यस्य हितार्थाय अहं असंख्येय षट्पदं भ्रामरं रूपं कृत्वा महासुर वधिष्यामि । तदा लोकाः मां भ्रामरी इति सर्वतः स्तोष्यन्ति ।

इत्थं यदा यदा दानवोत्था बाधा भविष्यति तदा तदा अहं अवतीर्य अरिसक्षयं करिष्यामि ।

यदा–when अरुणाख्यः–the Asura named Aruna त्रैलोक्ये–in the three worlds महाबाधां–great havoc



करिष्यति–will do तदा–then त्रैलोक्यस्य हितार्थाय–for the welfare of the world अहं–I असंख्येय several bees षटपदं भ्रामरं–pertaining to bees रूपं कृत्वा–taking the form महासुरं–the great Asura वधिष्यामि–will kill तदा–then लोकाः–people मां–me भ्रामरी इति–by the name Bhramari स्तोष्यन्ति–praise सर्वतः–every where. इत्थं–in this way यदा यदा–whenever दानवोत्था बाधा–havoc caused by the Asuras भविष्यति–occur तदा तदा–then अहं–I अवतीर्य-incarnating अरिसंक्षयं–destruction of the enemies करिष्यामि–will do.

When the Asura named Aruna will cause havoc to the three worlds, then for the welfare of the world I will assume the form of a bee and with several bees kill that great Asura. Then people every where will praise me by the name Bhrāmari. In this way whenever the asuras cause havoc, then and there I incarnate and destroy the enemies.

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
नारायणीस्तुतिर्नाम एकादशोऽध्यायः ॥

## ॥ अथ द्वादशोऽध्यायः ॥

1· देव्युवाच ॥

देवी उवाच–The Devi said

2· एभिः स्तवैश्च मां नित्यं स्तोष्यते यः समाहितः ।
तस्याहं सकलां बाधां नाशयिष्याम्यसंशयम् ॥

यः समाहितः एभिः स्तवैः मां नित्यं स्तोष्यते तस्य सकलाः बाधाः अहं असंशयं शमयिष्यामि ।

यः – he who समाहितः-with concentration एभिः-by these स्तवैः-hymns मां-me नित्यं-constantly स्तोष्यते-praise तस्य-his सकलाः बाधाः-all sufferings अहं-I नाशयिष्यामि-shall destroy असंशयं-without doubt.

Whoever with a concentrated mind praises me with these hymns constantly, I shall destroy all his suffenings without doubt·

3· मधुकैटभनाशं च महिषासुरघातनम् ।
कीर्तयिष्यन्ति ये तद्वद्वधं शुम्भनिशुम्भयोः ॥

4· अष्टम्यां च चतुर्दश्यां नवम्यां चैकचेतसः ।
श्रोष्यन्ति चैव ये भक्त्या मम माहात्म्यमुत्तमम् ॥

5· न तेषां दुष्कृतं किञ्चिद्दुष्कृतोत्था न चापदः ।
भविष्यति न दारिद्रयं न चैवेष्टवियोजनम् ॥



ये मधुकैटभनाशं महिषासुरघातनं तद्वत् शुम्भनिशुम्भयोः वधं च कीर्तयिष्यन्ति ।

ये एकचेतसः नवम्यां अष्टभ्यां च चतुर्दश्यां च मम उत्तमं माहात्म्यं भक्त्का श्रोष्यन्ति च ।

तेषां दुष्टकृतं किञ्चित् न भविष्यति । दुष्टकृतोत्थाः आपदः च न । दारिद्रयं न भविष्यति । इष्टवियोजनं च न एवं भविष्यति ।

ये–those who मधुकैटभनाशं-the destruction of Madhu and Kaitabha महिषासुरघातनं-the slaughter of Mahishasura तद्वत्-in the same way शुम्भनिशुम्भयोः वधं-the killing of Sumbha and Nisumbha कीर्तयिष्यन्ति-shall praise अष्टभ्यां च चतुर्दश्यां नवम्यां च-on the eighth, the fourteenth and ninth days of the fort night एकचेतसः-those who have concentration ये who मम–my उत्तमं-sublime माहात्म्यं-greatness भक्त्या-with devotion श्रोष्यन्ति-hear तेषां-for them दुष्कृतं sin किञ्चित्-slight न भविष्यति-will not occur दुष्कृतोत्था-calamities arising out of sinful acts च न-will not occur दारिद्रयं नं भविष्यति इष्टवियोजनं च न एव neither poverty nor separation from the dear ones will occur.

Those who will chant the destruction of Madhu Kaitabha, Sumbha & Nisumbha and Mahishasura, with concentration and devotion, and

those who will listen to this sublime greatness of mine on the eighth fourteenth and ninth days of the fort night, to them no sins or calamities arising from sins will befall - Neither shall they suffer from poverty or separation from near and dear ones.

6. शत्रुतो न भयं तस्य दस्युतो वा न राजतः ।
न शस्त्रानलतोयौघात् कदाचित् सम्भविष्यति ॥

तस्य कदाचित् शत्रुतः, दस्युतः, राजतः, शस्त्रानलतोयौधात् वा भयं न संभविष्यति ।

तस्य-for him कदाचित्-at any time भयं-fear न शत्रुतः-neither from enemies न दस्युतः-nor from robbers न राजतः-nor from kings न शस्त्रानल-तोयौधात्-nor from weapons, fire or flood भय-fear संभविष्यति-will occur.

He will never have fear from enemies, or from robbers, or from kings, or from weapons, fire or floods.

7. तस्मान्ममैतन्माहात्म्यं पठितव्यं समाहितैः ।
श्रोतव्यं च सदा भक्त्या परं स्वस्त्ययनं हि तत् ॥

तस्मात् मम एतत् माहात्म्यं समाहितैः पठितव्यं सदा भक्त्या श्रोतव्यं च तत् परं स्वस्त्ययनं हि ॥

तस्मात्-therefore मम-my एतत् माहात्म्यं-this poem of my greatness समाहितैः- by men of



concentrated minds पठितव्यं-is to be chanted च-and सदा-always भक्त्या-with devotion श्रोतव्यं- to be heard तत्-that परं-supreme स्वस्त्ययनं-path to well-being

For this reason this hymn of my greatness should be chanted by people with concentrated minds and should be heard always with devotion, for it will bring supreme good fortune to all beings.

8. उपसर्गानशेषांस्तु महामारीसमुद्भवान् ।
तथा त्रिविधमुत्पातं माहात्म्यं शमयेन्मम ॥

मम माहात्म्यं महामारीसमुद्भवान् अशेषान् उपसर्गान् तथा त्रिविधं उत्पातं शमयेत् ।

मम माहात्म्यं -the hymn about my greatness महामारीसमुद्भवान् – arising from torrential rain अशेषान् उपसर्गान् – all calamities तथा in the same way त्रिविधं-three fold उत्पातं-natural calamities शमयेत् will destroy.

The chanting of my greatness will destroy all epidemic calamities, as also the three fold natural calamities.

9. यत्रैतत्पठ्यते सम्यङ्नित्यमायतने मम ।
सदा न तद्विमोक्ष्यामि सान्निध्यं तत्र मे स्थितम् ॥

यत्र मम आयतने नित्यं एतत् सम्यक् पठ्यते सदा तत् न विमोक्ष्यामि । तत्र मे सान्निध्यं स्थितम् ।

यत्र–where मम आयतने in my temple नित्यं–daily एतत्–this hymn सम्यक्–duly पठ्यते–is chanted सदा–always तत्–that न विमोक्ष्यामि–I shall not forsake तत्र–there मम सान्निध्यं–my presence स्थितं–will exist

Where in my temple this hymn in praise of me is chanted daily I will never forsake that place and my presence will be there always.

10. बलिप्रदाने पूजायामग्निकार्ये महोत्सवे ।
सर्वं ममैतच्चरितमुच्चार्यं श्राव्यमेव च ॥

बलिप्रदाने पूजायां अग्निकार्ये महोत्सवे मम एतत् चरितं सर्वं उच्चार्यं श्राव्यं च एव ।

बलिप्रदाने-during sacrifice पूजायां–worship अग्निकार्ये-homa महोत्सवे–great festival मम-my एतत् चरितं–this hymn about me सर्वं–all उच्चार्यं–ought to be chanted श्राव्यं–ought to be heard च एव–also.

This hymn about me should be chanted and also heard during sacrifice, worship and Homa.

11. जानताजानता वापि बलिपूजां तथा कृताम् ।
प्रतीच्छिष्याम्यहं प्रीत्या वह्निहोमं तथाकृतम् ॥

जानता अजानता वा अपि तथा कृतां बलिपूजां तथाकृतं वह्निहोमं च अहं प्रीत्या प्रतीच्छिष्यामि ।



जानता–knowingly अजानता–without knowing वा अपि–or तथाकृतां बलिपूजां–the sacrificial worship thus done तथाकृतं वह्निहोमं–fire-sacrifice (homa) done in the same way अहं–I प्रीत्या–gladly प्रतीच्छिष्यामि–will accept.

I will accept with gratification the offerings during sacrifice, worship and fire offering irrespective of whether they are performed knowingly or unknowingly.

12. शरत्काले महापूजा क्रियते या च वार्षिकी ।
तस्यां ममैतन्माहात्म्यं श्रुत्वा भक्तिसमन्वितः ॥

13. सर्वबाधाविनिर्मुक्तो धनधान्यसुतान्वितः ।
मनुष्यो मत्प्रसादेन भविष्यति न संशयः ॥

शरत्काले च या महापूजा क्रियते या च वार्षिकी, तस्यां मम एतत् माहात्म्यं भक्तिसमन्वितः श्रुत्वा मनुष्यः मत्प्रसादेन सर्वबाधाविनिर्मुक्तः धनधान्यसुतान्वितः भविष्यति ।

शरत्काले-during autumn या महापूजा-which great worship क्रियते-is done या च वार्षिकी-and also the annual तस्यां-there मम माहात्म्यं-my greatness भक्तिसमन्वितः-with devotion श्रुत्वा-hearing मनुष्यः-man मत्प्रसादेन-because of my pleasure सर्वबाधाविनिर्मुक्तः-free from all troubles धनधान्यसुतान्वितः-with riches, grains and children भविष्यति-will become.

During the autumn when the annual worship is performed man hearing my greatness with devotion, by my being pleased will be free from all troubles and be blessed with wealth, grain and children.

14. श्रुत्वा ममैतन्माहात्म्यं तथा चोत्पत्तय: शुभा: ।
पराक्रमं च युद्धेषु जायते निर्भय: पुमान् ।।

मम शुभा: उत्पत्तय: युद्धेषु पराक्रमं च तथा एतत् माहात्म्यं च श्रुत्वा पुमान् निर्भय: जायते ।

मम–mine शुभा: auspicious उत्पत्तय:–appearances युद्धेषु पराक्रमं–valour in war च–and तथा–likewise एतत् माहात्म्यं–also this narration of glory श्रुत्वा–hearing पुमान्–man निर्भय: जायते–will become fearless.

A man if he hears about the auspicious appearances, my valour in battle and also my eulogy will become fearless.

15. रिपव: संक्षयं यान्ति कल्याणं चोपपद्यते ।
नन्दते च कुलं पुंसां माहात्म्यं मम श्रृण्वताम् ।।

मम माहात्म्यं श्रृण्वतां पुंसां रिपव: संक्षयं यान्ति । कल्याणं उपपद्यते च कुलं च नन्दते ।

मम–mine माहात्म्यं श्रृण्वतां–those who hear about my glory पुंसां–for those men रिपव:–enemies संक्षयं यान्ति–perish कल्याणं-welfare उपपद्यते–accrues कुलं च नन्दते–family rejoices.



Those who listen to this eulogium of mine, their enemies are destroyed, welfare accrues to them and their family rejoices.

16. शान्तिकर्मणि सर्वत्र तथा दु:स्वप्नदर्शने ।
ग्रहपीडासु चोग्रासु माहात्म्यं श्रृणुयान्मम ।।

सर्वत्र शान्तिकर्मणि तथा दु:स्वप्नदर्शने, उग्रासु ग्रहपीडासु च मम माहात्म्यं श्रृणुयात् ।

सर्वत्र–every where शान्तिकर्मणि–during propitiatory ceremony तथा–same way दु:स्वप्नदर्शने–on seeing a bad dream उग्रासु ग्रहपीडासु-troubles arising from evil influence of planets मम माहात्म्यं–my eulogium श्रृणुयात्–will hear.

During all propitiatory ceremonies and on seeing bad dreams and when there is a great evil influence of planets let one listen to my eulogium.

17. उपसर्गा: शमं यान्ति ग्रहपीडाश्च दारुणा: ।
दु:स्वप्नं च नृभिर्दृष्टं सुस्वप्नमुपजायते ।।

उपसर्गा: शमं यान्ति ग्रहपीडाच: दारुणा: । नृभि: दृष्टं दु:स्वप्नं च सुस्वप्नं उपजायते ।

उपसर्गा:–evil omens शमं यान्ति–subside दारुणा:–terrible ग्रहपीडा: च–bad influence of planets also

नृभिः-by men दृष्टं दुस्वप्नं-bad dreams seen सुस्वप्नं-good dreams उपजायते-turn into.

Evil portents subside, also terribly bad influences of planets. Bad dreams seen by men turn into good ones.

18. बालग्रहाभिभूतानां बालानां शान्तिकारकम् ।
सङ्घातभेदे च नृणां मैत्रीकरणमुत्तमम् ।।

बालग्रहाभिभूतानां बालानां शान्तिकारकं । नृणां संङ्घातभेदे उत्तमं मैत्रीकरणं च ।

बालग्रहाभिभूतानां बालानां-to children who are possessed by evil spirits शान्तिकारकं - creates peacefulness नृणां-of men संघातभेदे-split in union उत्तमं-best मैत्रीकरणं-promoting friendship च-also.

To children who are possessed of evil spirits it brings peace, where there is split among men and in their union it promotes friendship also.

19. दुर्वृत्तानामशेषाणां बलहानिकरं परम् ।
रक्षोभूतपिशाचानां पठनादेव नाशनम् ।।

पठनादेव अशेषाणां दुर्वृत्तानां परं बलहानिकरं रक्षोभूत पिशाचानां नाशनं च ।

पठनात् एव-simply by chanting अशेषाणां दुर्वृत्तानां-all men of evil ways परं-most बलहानिकरं-destroyer of strength रक्षोभूतपिशाचानां-all sorts of evil spirits च नाशनं-destroyer too.



By simply reading it destroys the power of all men of evil ways and also it curtails the power of evil spirits.

20. सर्वं ममैतन्माहात्म्यं मम सन्निधिकारकम् ।
पशुपुष्पार्घ्यधूपैश्च गन्धदीपैस्तथोत्तमैः ।।

21. विप्राणां भोजनैर्होमैः प्रोक्षणीयैरहर्निशम् ।
अन्यैश्च विविधैर्भोगैः प्रदानैर्वत्सरेण या ।।

22. प्रीतिर्मे क्रियते सास्मिन्सकृत्सुचरिते श्रुते ।
श्रुतं हरति पापानि तथारोग्यं प्रयच्छति ।।

मम एतत् माहात्म्यं सर्वं मम सन्निधिकारकम् । पशुपुष्पार्घ्यधूपैः तथा उत्तमैः गन्धदीपैः विप्राणां भोजनैः होमैः च प्रोक्षणीयैः अन्यैः विविधैः भोगैः प्रदानैः च अहर्निशं वत्सरेण या प्रीतिः मे क्रियते सा अस्मिन् सुचरिते सकृत् श्रुते भवति, श्रुतं पापानि हरति तथा आरोग्यं प्रयच्छति ।

मम-my एतत्-this माहात्म्यं-eulogium सर्वं-as a whole सन्निधिकारकं-causes my presence पशुपुष्पार्घ्यधूपैः-with cattle, flowers arghya and incenses तथा उत्तमैः-in the same way with the best गन्धदीपैः perfumes and lamps विप्राणां भोजनैः-by feeding the Brahmins होमैः-sacrifies च-and अन्यैः-others प्रोक्षणीयैः-by sprinkling of holy water

भोगै:-gifts प्रदानै: च-offerings वत्सरेण-through out one year अहिनशं-day and night या मे प्रीति: क्रियते-who pleases me सा-that अस्मिन् सुचरिते सकृत् श्रुते-by hearing this glorification of mine once श्रुतं-hearing पापानि हरति-removes sins तथा-same way आरोग्यं प्रयच्छति-bestows health.

This my eulogium as a whole causes my presence by performing my worship through out a year day and night with cattle, flowers, argha and incenses and in the same way with best of perfumes and lights, feeding Brahmins, sacrifices and also other beautiful offerings what joy I derive, that is got by once hearing this glorification of mine. Once heard it destroys all sins and bestows good health.

23. रक्षां करोति भूतेभ्यो जन्मनां कीर्तनं मम ।
युद्धेषु चरितं यन्मे दुष्टदैत्यनिबर्हणम् ।।

यत् मम जन्मनां कीर्तनं, मे युद्धेषु दुष्टदैत्यनिबर्हणं चरितं च तत् भूतेभ्य: रक्षां करोति ।

यत्-which is मम जन्मनां कीर्तनं-recital of my various incarnations मे चरितं-my story युद्धेषु-in war दुष्टदैत्यनिबर्हणं-killing of wicked Asuras तत्-that भूतेभ्य:-from evil spirits रक्षां करोति-gives protection.



This glorification of my various incarnations and the story of my killing of wicked Asuras saves one from evil spirits.

24. तस्मिञ्छ्रुते वैरिकृतं भयं पुंसां न जायते ।
युष्माभि: स्तुतयो याश्च याश्च ब्रह्मर्षिभि: कृता: ।।

25. ब्रह्मणा च कृतास्तास्तु प्रयच्छन्ति शुभां मतिम् ।
अरण्ये प्रान्तरे वापि दावाग्निपरिवारित: ।।

26. दस्युभिर्वा वृत: शून्ये गृहीतो वापि शत्रुभि: ।
सिंहव्याघ्रानुयातो वा वने वा वनहस्तिभि: ।।

27. राज्ञा क्रुद्धेन चाज्ञप्तो वध्यो बन्धगतोऽपि वा ।
आघूर्णितो वा वातेन स्थित: पोते महार्णवे ।।

28. पतत्सु चापि शस्त्रेषु सङ्ग्रामे भृशदारुणे ।
सर्वाबाधासु घोरासु वेदनाभ्यर्दितोऽपि वा ।

29. स्मरन् ममैतच्चरितं नरो मुच्येत सङ्कटात् ।
मम प्रभावात्सिंहाद्या दस्यवो वैरिणस्तथा ।।

30. दूरादेव पलायन्ते स्मरतश्चरितं मम ।

तस्मिन् श्रुते पुंसां वैरिकृतं भयं न जायते । युष्माभि: ब्रह्मर्षिभि: च या: या: स्तुतय: कृता: ब्रह्मणा च या:कृता: ता: शुभां मतिं प्रयच्छन्ति ।

तस्मिन् श्रुते-when it is heard पुंसां-for men वैरिकृतं-inflicted by enemies भयं fear न जायते-does not occur.

When it is chanted people will have no fear from enemies.

युष्माभि:-by you ब्रह्मर्षिभि: च-and by the sages या: या: स्तुतय: कृता:-those hymns which were sung ब्रह्मणा च या: कृता:-those chanted by Brahma also शुभां मतिं प्रयच्छन्ति-bestow pious mind.

Those hymns sung by you and the great sages in praise of me and also those chanted by Brahma bestow a pious mind.

अरण्ये प्रान्तरे वा अपि दावाग्निपरिवारित: शून्ये दस्युभि: वृत: वा शत्रुभि: गृहीत: वा अपि सिंहव्याघ्रानुयात: वा वने वनहस्तिभि: अनुयात: वा क्रुद्धेन राज्ञा वध्य: आज्ञप्त: च बन्धगत: अपि वा महार्णवे पोते स्थित: वातेन आधूर्णित: वा भृशदारुणे संग्रामे शस्त्रेषु घोरासु सर्वाबाधासु पतत्सु वा वेदनाभ्यर्दित: अपि वा मम एतत् चरितं स्मरन् नर: सङ्कटात् मुच्येत ।

अरण्ये-in the forest प्रान्तरे-lonely spot दावाग्निपरिवारित:-surrounded by forest fire दस्युभि:-by robbers वृत: वा-surrounded शून्ये-lonely place शत्रुभि:-by enemies गृहीत:-caught वने-in the forest सिंहव्याघ्रानुयात:- followed by lions and tigers वनहस्तिभि:-by wild elephants अनुयात:-followed by क्रुद्धेन-by wrathful राज्ञा-by king वध्य:-to be killed आज्ञप्त:-ordered बन्धगत:-gone into bondage महार्णवे



पोते स्थित:-standing in a boat on the high seas वातेन आधूर्णित: वा-tossed by winds भृशदारुणे संग्रामे-in the midst of fierce battle शस्त्रेषु पतत्सु च- and in the shower of weapons घोरासु सर्वाबाधासु-in the midst of dreadful troubles वेदनाभ्यर्दित:-suffering from pain मम एतत् चरितं-this story of mine स्मरन्-remembering नर:-man सङ्कटात्-from sorrow मुच्येत्-is saved

Those who remember this glorification of my life even if they are alone in a thick-forest or surrounded by a forest fire or in the midst of robbers or caught by enemies in a lonely spot or in a forest followed by lion, tiger and wild elephants or if ordered by a wrathful king to be killed or if in bondage or tossed in a boat by high winds in violent sea or in the midst of fierce battle under a shower of weapons or in the midst of dreadful troubles or suffering from pain even in the midst of al lthese sufferings, man is saved.

मम चरितं स्मरत: मम प्रभावात् सिंहाद्या: दस्यव: तथा वैरिण: दूरादेव पलायन्ते ।

मम चरितं-my story स्मरत:-who remembers मम प्रभावात्-through my power सिंहाद्या-lions and the like दस्यव:-robbers तथा-likewise वैरिण:-enemies दूरादेव-from a distance पलायन्ते-flee.

Through my power lions and other wild animals, robbers and enemies, flee from a distance from him who remembers this story of mine.

31. ऋषिरुवाच ॥

ऋषि: उवाच–the sage said

32. इत्युक्त्वा सा भगवती चण्डिका चण्डविक्रमा ।
पश्यतामेव देवानां तत्रैवान्तरधीयत ॥

इति उक्त्वा भगवती चण्डविक्रमा सा चण्डिका देवानां पश्यतां एव तत्र एव अन्तरधीयत ।

इति उक्त्वा – telling this सा–that भगवती–Goddess चण्डविक्रमा–of great valour चण्डिका–Chandika देवानां पश्यतां एव–when the Devas were looking on तत्र एव–there itself अन्तरधीयत–disappeared.

Having told this that Goddess Chandika of great valour disappeared there itself even when the Devas were looking on.

33. तेऽपि देवा निरातङ्काः स्वाधिकारान्यथा पुरा ।
यज्ञभागभुजः सर्वे चक्रुर्विनिहतारयः ॥

ते सर्वे देवाः अपि यज्ञभागभुजः विनिहतारयः निरातङ्काः यथा पुरा स्वाधिकारान् चक्रुः ॥



ते देवाः–those Gods अपि–also निरातङ्काः–without sorrow यथा पुरा–as before स्वाधिकारान् चक्रुः–resumed their own duties सर्वे–all यज्ञभागभुजः–partaking of their share in sacrifices विनिहतारयः–enemies destroyed.

Those Gods, their enemies having been killed, were relieved of their sorrows and resumed their duties as before. They became participants in their share of sacrificial offerings too as their enemies were destroyed.

34. दैत्याश्च देव्या निहते शुम्भे देवरिपौ युधि ।
जगद्विध्वंसिनि तस्मिन् महोग्रेऽतुलविक्रमे ॥

35. निशुम्भे च महावीर्ये शेषाः पातालमाययुः ॥

अतुलविक्रमे महोग्रे जगद्विध्वंसिनि देवरिपौ तस्मिन् दैत्ये शुम्भे महावीर्ये निशुम्भे च देव्या युधि निहते, शेषाः दैत्याः पाताले आययुः ।

अतुलविक्रमे–unparallel in prowess महोग्रे–fierce जगद्विध्वंसिनि–causing ruin to the world देवरिपौ च–enemies of God तस्मिन् दैत्ये–that Asura शुम्भे महावीर्ये निशुम्भे च–Sumbha and the mighty Nisumbha देव्या युधि निहते–killed in battle by the Devi शेषाः दैत्याः–the remaining Asuras पातालं–patala आययुः–went.

When the exceedingly valorous Sumbha and the most fierce foe of Devas Nisumbha, who brought ruin on the world and who were unparalleled in prowess had been slain by the Devi in battle, the remaining daityas went to patala.

36. एवं भगवती देवी सा नित्यापि पुनः पुनः ।
सम्भूय कुरुते भूप जगतः परिपालनम् ॥

भूप, सा भगवती देवी नित्या अपि एवं पुनः पुनः संभूय जगतः परिपालनं कुरुते ।

भूप–Oh king एवं–thus सा भगवती देवी–that adorable Devi नित्या अपि–though eternal पुनः पुनः again and again संभूय–manifesting जगतः–of the world परिपालनं कुरुते–protects.

O! King, thus that adorable Devi, although she is eternal incarnates again and again and gives protection to the world.

37. तयैतन्मोह्यते विश्वं सैव विश्वं प्रसूयते ।
सा याचिता च विज्ञानं तुष्टा ऋद्धिं प्रयच्छति ॥

तया एतत् विश्वं मोह्यते । सा एव विश्वं प्रसूयते । सा मयाचिता विज्ञानं तुष्टा विज्ञानं ऋद्धिं च प्रयच्छति ।

तया–by her एतत् विश्वं मोह्यते–this universe is deluded सा एव–she alone विश्वं–world प्रसूयते–creates याचिता सा–prayed for, she विज्ञानं–knowledge तुष्टा–pleased ऋद्धिं च–prosperity too प्रयच्छति–bestows.

This universe is deluded by her. She indeed creates this world. When entreated she bestows the supreme knowledge and if pleased prosperity also.



38. व्याप्तं तयैतत्सकलं ब्रह्माण्डं मनुजेश्वर ।
महाकाल्या महाकाले महामारीस्वरूपया ॥

हे मनुजेश्वर, महाकाले महामारीस्वरूपया महादेव्या, महाकाल्या तया एतत् सकलं ब्रह्माण्डं व्याप्तम् ।

हे मनुजेश्वर–O! king महामारीस्वरूपया–in the form of great pestilence महादेव्या–the great Goddess तया महाकल्या–by that Mahakali महाकाले–at the time of deluge एतत् ब्रह्माण्डं–this universe व्याप्तं–is pervaded.

Oh! king, by the Goddess Mahakali who takes the form of great pestilence at the time of deluge, this cosmos is pervaded.

39. सैव काले महामारी सैव सृष्टिर्भवत्यजा ।
स्थितिं करोति भूतानां सैव काले सनातनी ॥

सा अजा एव सृष्टिः भवति । सनातनी सा एव काले भूतानां स्थितिं करोति । काले सा एव महामारी ।

सा–she अजा–unborn एव सृष्टिः भवति–becomes the creating force सनातनी–eternal being सा एव–

she indeed काले-at the time of protection भूतानां-beings स्थितिं करोति-sustains काले-at the time of deluge सा एव-she indeed महामारी च-the great destructive pestilence.

Even though she is unborn she creates the universe. As a sustainer she protects all beings. At the time of the deluge, she is the destroyer in the form of great pestilence.

40 भवकाले नृणां सैव लक्ष्मीर्वृद्धिप्रदा गृहे ।
सैवाभावे तथालक्ष्मीर्विनाशायोपजायते ॥

नृणां भवकाले सा एव गृहे वृद्धिप्रदा लक्ष्मीः । तथा अभावे सा एव विनाशाय अलक्ष्मीः उपजायते ।

नृणां-for men भवकाले-at the time of prosperity सा एव-she indeed गृहे-at the house वृद्धिप्रदा लक्ष्मीः-bestower of prosperity, Lakshmi तथा-likewise अभावे-at the time of ruin सा एव-she herself विनाशाय for destruction अलक्ष्मीः उपजायते-becomes misfortune.

In times of prosperity, she is Lakshmi, who bestows prosperity in the homes of men, and at times of misfortune she herself becomes the Goddess of misfortune and brings about ruin.

41. स्तुता सम्पूजिता पुष्पैर्धूपगन्धादिभिस्तथा ।
ददाति वित्तं पुत्रांश्च मतिं धर्मे गतिं शुभाम् ॥



पुष्पैः तथा धूपगन्धादिभिः संपूजिता स्तुता वित्तं पुत्रान् धर्मे मतिं शुभां गतिं च ददाति ।

पुष्पैः-with flowers तथा-in the same way धूपगन्धादिभिः-with incense, perfumes etc. संपूजिता-worshipped स्तुता-praised वित्तं-wealth पुत्रान्-sons (progeny) धर्मे मतिं-a mind bent on righteousness शुभां गतिं-good life here after ददाति-bestows.

If she is propitiated and worshipped with flowers as well as incense, perfumes etc, she bestows on men wealth, progeny, a mind bent on righteousness and a blessed life here after.

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
फलस्तुतिर्नाम द्वादशोऽध्यायः ॥

## अथ त्रयोदशोऽध्याय: ॥

1· ऋषिरुवाच ॥

ऋषि: उवाच–the sage said

2 एतत्ते कथितं भूप देवीमाहात्म्यमुत्तमम् ॥

हे भूप एतत् उत्तम देवीमाहात्म्यं ते कथितम् ।

हे भूप–O! king एतत्–this उत्तमं–**sublime. देवीमाहात्म्यं**–glory of the Devi ते–to you कथितं–**recited.**

O! king I have recited to you this **sublime poem on** the glory of Devi.

3· एवम्प्रभावा सा देवी ययेदं धार्यते जगत् ।
विद्या तथैव क्रियते भगवद्विष्णुमायया ॥

यया इदं जगत् धार्यते सा देवी एवंप्रभावा । तथा एव भगवद्विष्णुमायया विद्या क्रियते ।

यया–by whom इदं जगत्–this universe धार्यते–**is** upheld सा देवी–that Goddess एवंप्रभावा–of this power तथा एव–in the sme way भगवद्विष्णुमायया–by the illusive power of Vishnu विद्या क्रियते–knowledge is bestowed.

That Devi, indeed by whom this universe is sustained and is of this prowess bestows knowledge with the illusive power of Vishnu.



4· तया त्वमेष वैश्यश्च तथैवान्ये विवेकिन: ।
मोह्यन्ते मोहिताश्चैव मोहमेष्यन्ति चापरे ॥

तया त्वं एष: वैश्य: तथा एव अन्ये विवेकिन: । मोह्यन्ते, मोहिता: च एव अपरे मोहं एष्यन्ति च ।

तया–By her त्वं–you एष–this वैश्य:–vaisya **तथा एव–and in the same way** अन्ये विवेकिन:–**others with discrimination** मोह्यन्ते–**are deluded** मोहिता: **एव च–were deluded too** अपरे मोहं एष्यन्ति च–**others also will be deluded.**

**Thus you and this vaisya and others with descrimination are deluded, were deluded in the past, and others will be deluded in the future also.**

5· तामुपैहि महाराज शरणं परमेश्वरीम् ।
आराधिता सैव नृणां भोगस्वर्गापवर्गदा ॥

हे महाराज, तां परमेश्वरीं शरणं उपैहि । आराधिता सा एव नृणां भोगस्वर्गापवर्गदा ।

हे महाराज–O! **great king** तां परमेश्वरीम्–that **great Devi** शरण–refuge उपैहि–seek आराधिता–when **propitiated** सा एव–she indeed is नृणां–**for men** भोगस्वर्गापवर्गदा–the bestower of worldly pleasure **heavenly enjoyment and final emancipation.**

**Oh ! Great King, take refuge in that Great Devi, who propitiated is the bestower of worldby enjoyment, heavenly bliss and final liberation.**

6· मार्कण्डेय उवाच ॥

मार्कण्येच उवाच–Markandeya said

7· इति तस्य वचः श्रुत्वा सुरथः स नराधिपः ।
प्रणिपत्य महाभागं तमृषिं संशितव्रतम् ॥

8· निर्विण्णोऽतिममत्वेन राज्यापहरणेन च ।
जगाम सद्यस्तपसे स च वैश्यो महामुने ॥

हे महामुने, इति तस्य वचः श्रुत्वा सुरथः सः नराधिपः वैश्यः च महाभागं संशितव्रतं तं ऋषिं प्रणिपत्य ममत्वेन राज्यापहरणेन च अतिनिर्विण्णः सद्यः तपसे जगाम ।

इति–thus तस्य वचः श्रुत्वा–hearing his words स नराधिपः सुरथः–king suratha वैश्यः च–and the vaisya महाभागं संशितव्रतं तं ऋषिं प्रणिपत्य–saluting the illustrious sage of severe penances ममत्वेन–by attachment राज्यापहरणेन च–by the loss of his kingdom अतिनिर्विण्ण,–utterly disgusted. सद्यः–immediately तपसे जगाम–went to do penance महामुने–Oh! great sage.

Oh ! Greaet Sage, king Suratha who was sorrow-stricken with excessive attachment and the loss of his kingdom and the Vaisya also prostrated before the illustrious Sage of severe penance and went to perform austerites·



9· सन्दर्शनार्थमम्बाया नदीपुलिनसंस्थितः ।
स च वैश्यस्तपस्तेपे देवीसूक्तं परं जपन् ॥

अम्बायाः सन्दर्शनार्थं नदीपुलिनं आस्थितः सः च वैश्यः परं देवीसूक्तं जपन् तपः तेपे ।

अम्बायाः सन्दर्शनार्थं–to obtain a vision of Mother नदीपुलिनं आस्थितः–sitting on the bank of the river सः च वैश्यः–both he & vaisya परं देवीसूक्तं जपन्–chanting the supreme Devi Sukta तपः तेपे–performed penance.

Both the king and the vaisya, in order to obtain the vision of the great Mother, went and sat on the bank of the river and chanting the supreme Devi Sukta, performed penance·

10· तौ तस्मिन् पुलिने देव्याः कृत्वा मूर्तिं महीमयीम् ।
अर्हणां चक्रतुस्तस्याः पुष्पधूपाग्नितर्पणैः ॥

तस्मिन् पुलिने तौ महीमयीं देव्याः मूर्तिं कृत्वा तस्याः पुष्पधूपाग्नितर्पणैः अर्हणां चक्रतुः ।

तस्मिन् पुलिने–on the bank of the river तौ–both of them महीमयीं देव्याः शूर्ति कृत्वा–having made the earthen image of the Mother तस्याः–of that image पुष्पधूपाग्नितर्पणैः–with flowers, incenses and fire and offering of water अर्हणं चक्रतुः–performed worship.

Both of them made earthen image of the Mother on the bank of the river and performed worship with flowers, incenses, fire sacrifices and offering of water.

11. निराहारौ यताहारौ तन्मनस्कौ समाहितौ ।
ददतुस्तौ बलिं चैव निजगात्रासृगुक्षितम् ॥

तौ यताहारौ निराहारौ तन्मनस्कौ समाहितौ निजगात्रासृगुक्षितं बलिं ददतुः च एव ।

तौ–they यताहारौ-controlling the diet निराहारौ–abstaining from taking food तन्मनस्कौ–meditating on the mother समाहितौ with concentrated minds निजगात्रासृगुक्षित–sacrifices with blood taken from their own bodies बलिं ददतुः च एव–offered sacrifices.

They did penance controlling, their food and fasting and meditated on the Mother with concentrated minds They also offered sacrifices with the blood taken from their own bodies.

12. एवं समाराधयतोस्त्रिभिर्वर्षैर्यतात्मनोः ।
परितुष्टा जगद्धात्री प्रत्यक्षं प्राह चण्डिका ॥

एवं समाराधयतोः यतात्मनोः त्रिभिः वर्षैः जगद्धात्री चण्डिका परितुष्टा प्रत्यक्षं प्राह ।

एवं–thus समाराधयतः–worshipping in the proper way यतात्मनोः–having mental restraint



त्रिभिः वर्षैः–by three years जगद्धात्री चण्डिका–Chandika the sustainer of the world परितुष्टा – greatly pleased प्रत्यक्षं–appearing before प्राह–spoke.

When they completed three years thus worshipping with controlled minds in the proper way, Chandika the upholder of the universe was pleased and appeared before them and spoke thus.

13. देव्युवाच ॥

देवी उवाच–the Devi said

14. यत्प्रार्थ्यते त्वया भूप त्वया च कुलनन्दन ॥

15. मत्तस्तत्प्राप्यतां सर्वं परितुष्टा ददामि तत् ॥

हे भूप त्वया, कुलनन्दन, त्वया च यत् प्रार्थ्यते तत् सर्वं मत्तः प्राप्यताम् । परितुष्टा तत् ददामि ।

हे भूप–Oh! king त्वया-by you कुलनन्दन त्वया–Oh! Vaisya, by you यत् प्रार्थ्यते–what is reqnested for by you तत् सर्वं–all that मत्तः–from me प्राप्यतां–you will receive परितुष्टा–pleased as I am तत् ददामि–I will bestow that.

Oh ! king, Oh ! Vaisya, As I am pleased with your penance I am ready to bestow on you all that you have requested for from me.

16· मार्कण्डेय उवाच ।।

मार्कण्डेयः उवाच–Markandeya said

17· ततो वव्रे नृपो राज्यमविभ्रंश्यन्यजन्मनि ।
अत्र चैव निजं राज्यं हतशत्रुबलं बलात् ।।

ततः नृपः अन्यजन्मनि अविभ्रंशि राज्यं अत्र अपि बलात् हतशत्रुबलं निजं राज्यं च वव्रे ।

ततः–afterwards नृपः–the king अन्यजन्मनि–in the next birth अविभ्रंशि राज्यं–imperishable kingdom अत्र अपि–in this life also बलात्–by force हतशत्रुबलं–the strength of the enemies destroyed निजं राज्यं–his own kingdom वव्रे–requested for.

Then the king requested for an imperishable kingdom in his next life and in this life his kingdom with a force defeating his enemies.

18. सोऽपि वैश्यस्ततो ज्ञानं वव्रे निर्विण्णमानसः ।
ममेत्यहमिति प्राज्ञः सङ्गविच्युतिकारकम् ।।

ततः निर्विण्णमानसः प्राज्ञः सः वैश्यः अपि मम इति अहं सङ्गविच्युतिकारकं ज्ञानं वव्रे ।

ततः–then निर्विण्णमानसः–mind with full dispassion प्राज्ञः सः वैश्यः the wise merchant मम



इति अहं इति सङ्गविच्युतिकारकं ज्ञानं–knowledge which removes attachment due to feelings of 'I' and 'my' वव्रे–chose.

Then the Vaisya who was wise with a dispassionate mind chose for knowledge which removes the whole attachment· in the form of 'I' and 'mine'·

19· देव्युवाच ।

देवी उवाच–Devi said.

20· स्वल्पैरहोभिर्नृपते स्वराज्यं प्राप्स्यते भवान् ।।

21· हत्वा रिपूनस्खलितं तव तत्र भविष्यति ।।

नृपते भवान् स्वल्पैः अहोभिः स्वं राज्यं प्राप्स्यते । रिपून् हत्वा तव तत्र अस्खलितं भविष्यति ।

नृपते–Oh! king भवान्–you स्वल्पैः अहोभिः–in a few days स्वं राज्यं–your kingdom प्रप्स्यते–will recover रिपून् हत्वा–by destroying your enemies तव–for you तत्र–there अस्खलित भविष्यति–you will have no fall.

Oh! king, in a few days you will recover your lost kingdom and by destroying your enemies· your kingdom will last without any fall.

22· मृतश्च भूयः सम्प्राप्य जन्म देवाद्विवस्वतः ।।

23· सावर्णिको नाम मनुर्भवान्भुवि भविष्यति ॥

भवान् मृतः च भूयः विवस्वतः देवात् जन्म संप्राप्य भुवि सावर्णिकः नाम मनुः भविष्यति ।

भवान्-you मृतः-dead भूयः-again विवस्वतः देवात्-from the sun God जन्म संप्राप्य-getting birth भुवि-in the world सावर्णिकः नाम मनु -Manu with the name Savarnika भविष्यति-will become.

After death again you will be born as the son of Vivaswan and in the world you will be known as Savarnika Manu·

24· वैश्यवर्य त्वया यश्च वरोऽस्मत्तोऽभिवाञ्छितः ॥

25· तं प्रयच्छामि संसिद्ध्यै तव ज्ञानं भविष्यति ॥

वैश्यवर्य अस्मत्तः यः वरः च अभिवाञ्छितः तं संसिध्यै प्रयच्छामि, तव ज्ञानं भविष्यति ।

वैश्यवर्य-Oh! great Vaisya अस्मत्तः-from me यः वरः-which boon अभिवाञ्छितः-you desired तं-that boon संसिद्ध्यै-for realisation प्रयच्छामि-I will grant तव ज्ञानं भविष्यति-you will have self realisation,

Oh ! great Vaisya, what boon you had desired of me for self realisation that boon· I will grant· You will have self realisation·



26· मार्कण्डेय उवाच ॥

मार्कण्डेयः उवाच-Markandeya said

27· इति दत्वा तयोर्देवी यथाभिलषितं वरम् ॥
बभूवान्तर्हिता सद्यो भक्त्या ताभ्यामभिष्टुता ॥

इति देवी तयोः यथाभिलषितं वरं दत्वा ताभ्यां भक्त्या अभिष्टुता सद्यः अन्तर्हिता बभूव ।

इति-thus देवी-the Goddess तयोः-for them यथाभिलषितं वरं-the boon as they desired दत्वा-after giving ताभ्यां भक्त्या अभिष्टुता-praised by them with devotion. सद्यः-immediately अन्तर्हिता बभूव-disappeared.

Granting the boon as desired by them and being praised by them with devotion the Devi disappeared.

28· एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः ।

29· सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः ॥
सावर्णिर्भविता मनुः क्लीं ओम् ।

एवं क्षत्रियर्षभः सुरथः देव्याः वरं लब्ध्वा सूर्यात् जन्म समासाद्य सावर्णिः मनुः भविता ।

एवं-thus क्षत्रियर्षभः-the bull among Kshathriyas सुरथः-Suratha देव्याः वरं लब्ध्वा-getting the boon from Devi सूर्यात् जन्म समासाद्य-receiving

birth from sun god सार्वणि: मनुः भविता—will become Savarnika Manu.

Thus the great king Suratha getting the boon from the Goddess shall receive birth from Sun God and become Savarnika Manu.

इति श्रीमार्कण्डेयपुराणे सार्वणिके मन्वन्तरे देवीमाहात्म्ये सुरथवैश्ययोर्वरप्रदानं नाम त्रयोदशोऽध्यायः ॥

श्रीसप्तशतीदेवीमाहात्म्यं समाप्तम्

ओं तत् सत् ओम् ॥

---

# क्षमाप्रार्थना

1. अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोऽयमिति मां मत्वा क्षम्यतां परमेश्वरि ॥

O ! Supreme Goddess, day and night I commit many mistakes. Please forgive me thinking, this fellow is my slave.

2. आवाहनं न जानामि
न जानामि विसर्जनं ।
पूजां चैव न जानामि
क्षम्यतां परमेश्वरि ॥

I do not know the Avahan or Visarjan (ceremonial rites of invoking gods or goddesses for worship and sending them back at the close of worship.) I do not know proper worship. O ! Supreme Goddess, please forgive me.

3. मन्त्रहीनं क्रियाहीनं
भक्तिहीनं सुरेश्वरि ।
यत्पूजितं मया देवि
परिपूर्णं तदस्तु मे ॥

O! Mother, if my worship is lacking in the matter of sacred syllables, sacred rites or devotion, let it be complete by your grace.

4. अपराधशतं कृत्वा जगदंबेति चोच्चरेत् ।
यां गतिं समवाप्नोति न तां ब्रह्मादयः सुराः ॥

Even after committing a hundred sins, if one utters the name Jagadamba just once, he attains a state that is not obtained even by Brahma and other Gods.

5. सापराधोऽस्मि शरणं प्राप्तस्त्वां जगदम्बिके ।
इदानीमनुकम्प्योऽहं यथेच्छसि तथा कुरु ॥

O! mother, I am a sinner and I have sought refuge in you. Now I am worthy of your compassion and you may do as you like.

6. अज्ञानाद्विस्मृतेर्भ्रान्त्या यन्न्यूनमधिकं कृतम् ।
तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरि ॥

O ! Mother, if due to ignorance forgetfulness or misunderstanding, my worship is imperfect or over done, please forgive me for all that and bestow grace on me.

7. कामेश्वरि जगन्मातः सच्चिदानन्दविग्रहे ।
गृहाणार्चामिमां प्रीत्या प्रसीद परमेश्वरि ॥

O ! Kamesvari, O ! Mother of universe, O! embodiment of eternal Brahman, (sat, Chit and Ananda) please accept this worship with pleasure and O ! Supreme Goddess, bless me.



8. गुह्यातिगुह्यगोप्त्री त्वं
गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि
त्वत्प्रसादात्सुरेश्वरि ॥

O ! Goddess of Gods, you protect the most sacred secrets of Tantras. Please accept this chanting of mine and by your blessings may I attain fruits thereof.

---